कक्षा 10

प्रवेशिका

संस्कृत-द्वितीयपत्रम्

# काव्यकौमुदी

(द्वितीयो भागः)



कक्षा 10
काव्यकौमुदी (द्वितीयो भागः)

# काव्यकौमुदी (द्वितीयो भागः)

(प्रवेशिकाकक्षायै स्वीकृतं पाठ्यपुस्तकम्)

**माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः**

# पाठ्यपुस्तक-लेखन-समितिः

काव्यकौमुदी (द्वितीयो भागः)
(प्रवेशिकाकक्षायै स्वीकृतं पाठ्यपुस्तकम्)


सङ्कलयितारो व्याख्याकाराश्च
**बहादुरसिंह गुर्जरः ( संयोजकः )**
सहायक-निदेशकः
संस्कृतशिक्षाविभागः, राजस्थानम्, जयपुरम्

**डॉ. जयप्रकाश मिश्रः**
व्याख्याता (संस्कृतवाङ्मयम्)
राजकीय-शास्त्रि-संस्कृत-महाविद्यालयः
महापुरा, जयपुरम् (राज.)

**डॉ. धर्मसिंह गुर्जरः**
व्याख्याता (व्याकरणशास्त्रम्)
राजकीय-शास्त्रि-संस्कृत-महाविद्यालयः
बौंली, सवाईमाधोपुरम् (राज.)

**डॉ. शिवचरण शर्मा**
प्रधानाचार्यः
राजकीय-वरिष्ठोपाध्याय-संस्कृतविद्यालयः
बानूड़ा, सीकरम् (राज.)

# पाठ्यक्रम–निर्माण–समितिः

काव्यकौमुदी (द्वितीयो भागः)

(प्रवेशिका कक्षा–10)

संयोजक– श्री विमल कुमार जैन (आई.ए.एस.)
निदेशक संस्कृत शिक्षा, राजस्थान, जयपुर

सदस्य–

1. श्री बहादुर सिंह गुर्जर
   सहायक–निदेशक, संस्कृत–शिक्षा, राजस्थान, जयपुर

2. डॉ. नाथूलाल सुमन, पूर्व–संयुक्तसचिव
   उच्च–शिक्षा, शासन–सचिवालय, जयपुर

3. श्री योगेन्द्र धामा, व्याख्याता
   राजकीय महाविद्यालय, अलवर

4. डॉ. हरिसिंह राजपुरोहित, व्याख्याता,
   राजकीय महाविद्यालय, ओसियां, जोधपुर

5. श्री हरिओम गौतम
   संभागीय–संस्कृत–शिक्षाधिकारी, भरतपुर–संभाग, भरतपुर

6. श्री रामावतार सिंह, प्रधानाध्यापक,
   राजकीय आदर्श प्रवेशिका संस्कृत विद्यालय, धौलपुर

7. श्री प्रदीप कुमार भट्ट, प्रधानाध्यापक,
   राजकीय आदर्श प्रवेशिका संस्कृत विद्यालय, डूंगरपुर

8. श्री महेशचन्द्र शर्मा, प्राध्यापक
   राजकीय वरिष्ठ उपाध्याय संस्कृत विद्यालय
   कुण्डगेट सावर, अजमेर

# प्रास्ताविकं किञ्चित्

संसारस्य सर्वासु भाषासु प्राचीनतमा परिष्कृता च संस्कृतभाषा भारतीयसंस्कृतेः प्राणभूता वर्तते। संस्कृतसाहित्यस्य वैभवबलेन एव भारतः विश्वगुरुपदं प्राप्तवानासीत्। विश्ववाङ्मयमुकुटमणिभूता वेदाः, उपनिषदः, आरण्यक-ब्राह्मणग्रन्थाः, स्मृतयः पुराणादीनि च संस्कृतभाषानिबद्धानि एव सन्ति। संस्कृतसाहित्यस्य विशालता, व्यापकता वैज्ञानिकता च सुविदिता अस्ति।

संस्कृतसाहित्ये, शास्त्राध्ययनेन सहैव काव्यमाध्यमेन सरसतासम्पादनपूर्वकं सदुपदेशदानस्य सुप्रथिता परम्परा विराजते। संस्कृतभाषायां प्रमुखतया गद्य-पद्य-भेदेन काव्यं द्विविधमङ्गीक्रियते। नाटकादीनि गद्यपद्यमिश्रितानि प्रसिद्धानि एव। संस्कृतभाषाया अध्यापनक्रमे व्याकरणशास्त्रेण सहैव काव्यशिक्षणस्यापि महत्त्वपूर्णा भूमिका वर्तते। व्याकरणसिद्धान्तानां प्रायोगिकं स्वरूपं काव्येषु सम्यक्तया द्रष्टुमवगन्तुं च शक्यते।

संस्कृतशिक्षाविभागस्य प्रवेशिकाकक्षायां संस्कृतभाषाया विशिष्टशिक्षणं लक्ष्यीकृत्य माध्यमिकशिक्षा-बोर्ड-राजस्थान, अजमेर-द्वारा संस्कृतस्य प्रश्नपत्रद्वयं निर्धारितं वर्तते। तदनुसारं प्रथमे प्रश्नपत्रे व्याकरणशास्त्रस्य द्वितीये प्रश्नपत्रे च काव्यशिक्षणस्य व्यवस्था कल्पिता वर्तते। द्वितीये प्रश्नपत्रे गद्य-पद्य-काव्यशिक्षणेन सहैव छन्दोऽलङ्कारकोश-रचना-शब्दरूप-धातुरूप-सन्निवेशोऽपि छात्राणां संस्कृतभाषादक्षतावर्धनाय कृतो वर्तते।

माध्यमिक-शिक्षा-बोर्ड, राजस्थानस्य प्रवेशिका-कक्षायाः पाठ्यक्रमानुसारं सज्जीकृतेऽस्मिन् ''काव्यकौमुदी-द्वितीयो भागः'' नामके संस्कृतपाठ्यपुस्तके स्तरीयपाठ्यवस्तुना सहैव अभ्यासप्रश्नानामपि समुचितः समावेशः कृतो विद्यते। भाषादक्षतासम्पादनाय चात्र प्रकृतिप्रत्ययादीनामपि यथावसरं परिचयः प्रदत्तः अस्ति।

पाठ्यपुस्तकस्यास्य पद्यभागे महर्षिवेदव्यासविरचितमहाभारताङ्गभूतश्रीमद्भगवद्गीतातः 'गीतामृतम्' श्रीभर्तृहरिविरचितात् नीतिशतकात् 'सुभाषितानि', श्रीमद्वाल्मीकिरामायणात् 'रामो द्विर्नाभिभाषते', डॉ. श्रीधरभास्करवर्णेकरविरचितात् 'विवेकानन्दविजय'नाटकात् 'विवेकानन्दाष्टकम्', महाकविकालिदास-विरचिताद् रघुवंशमहाकाव्याच्च 'रघुकौत्ससंवादः इत्येते पाठाः सङ्कलिताः सन्ति।

गद्यभागे श्रीविष्णुशर्मविरचितस्य पञ्चतन्त्रस्य पञ्चभ्यः तन्त्रेभ्यः एकैकां कथां चित्वा पञ्च कथाः सङ्कलिताः सन्ति। छन्दोऽलङ्कारकोशादीनां पाठ्यक्रमानुसारं निर्धारितांशोऽपि पुस्तके यथास्थानं संयोजितो वर्तते। रचनाभागे निबन्ध-पत्र-लेखन-कौशलवर्धनाय चावश्यक-दिशानिर्देशेन सहैव पञ्च पत्राणि द्वादश निबन्धाश्च प्रस्तुताः सन्ति। पाठ्यक्रमे निर्धारितानि शब्दरूपाणि धातुरूपाणि चापि पाठरूपेण गुम्फितानि सन्ति। सर्वमाहत्य पुस्तके पञ्चदश पाठाः सन्ति।

आशासे यद् गद्य-पद्य-काव्य-कोशच्छन्दोऽलङ्कार-रचना-शब्दरूप-धातुरूप-समृद्धं प्रवेशिकाच्छात्राणां कृते निर्धारितं संस्कृतपाठ्यपुस्तकमिदं 'काव्यकौमुदी-द्वितीयो भागः' अध्येतॄणां ज्ञानवर्धने, रसानुभूतिकरणे सदुपदेशप्रदाने च सर्वथा सफलं भविष्यतीति शम्।

**संयोजकः**

# पाठ्यक्रमः

## प्रवेशिका - कक्षा-१०

## विषयः – संस्कृतम् ( द्वितीय-प्रश्नपत्रम् )

(गद्य-पद्य-कोष-अलङ्कार-रचना-शब्द-धातुरूपाणि)

**समयः** – सपादहोरात्रयम् **पूर्णाङ्कः** - ८०+२० = १००

| | | |
|---|---|---|
| १. | गद्यकाव्यम् | २५ |
| २. | रचना (निबन्ध-पत्रलेखनम्, शब्दरूप-धातुरूपाणि च) | १५ |
| ३. | पद्यकाव्यम् | २५ |
| ४. | छन्दांसि | ०५ |
| ५. | अलङ्काराः | ०५ |
| ६. | कोशः | ०५ |

**गद्यकाव्यम्** **२५**

(क) पाठ्यपुस्तकात् द्वयोः गद्ययोः सप्रसङ्ग-व्याख्या १+४ =५×२ = १०

(ख) अतिलघूत्तरात्मक-प्रश्नाः ०५

(ग) लघूत्तरात्मकप्रश्नाः ०५

(घ) एकस्य पाठस्य संस्कृतभाषायां सारांश-लेखनम् ०५

**रचना** **१५**

(क) निबन्धाः – मम प्रिय कविः, भारतीयसंस्कृतिः, अहिंसा परमो धर्मः, स्वच्छता, स्वस्थवृत्तम्, संस्कृते विज्ञानम्, संस्कृतदिवसः, कालिदासः, माघः, वर्षप्रतिपदा (नूतनवर्षम्), महाराणाप्रतापः, श्रीरामः, श्रीकृष्णः, एतेषु एकः निबन्धः। ४

(ख) पत्रम्– रुग्णता-विवाह-भ्रमणादिविषयेषु अवकाशाय प्रार्थनापत्रम्। ३

अथवा

ग्रामस्य/नगरस्य/ विकासाय जनप्रतिनिधीनां कृते कमपि विषयमाधृत्य पत्रमेकम्।

(ग) शब्दरूपाणि– ४

बालक, लता, पति, सखि, भानु, मधु, वधू, मातृ, जगत्, भवत्, करिन् अस्मद्, युष्मद्, तत् (त्रिषु लिङ्गेषु)।

(घ) धातुरूपाणि– ४

अस्, कृ, चुर्, नृत्, लभ्, धाव्, क्रीड्, प्रच्छ्, दा, जि, तुद्, वद्-इत्यादि-धातूनाम्।

**पद्यकाव्यम्** **२५**

(क) पाठ्यपुस्तकात् द्वयोः पद्ययोः सप्रसङ्ग-व्याख्या ३×२ = ०६

(ख) विषयवस्तुसम्बन्धिनः अतिलघूत्तरात्मकप्रश्नाः ०५

(ग) विषयवस्तुसम्बन्धिनः लघूत्तरात्मकप्रश्नाः ०५

(घ) कृति-कृतिकारयोर्विषये लघूत्तरात्मकप्रश्नाः ०५

(ङ) द्वयोः श्लोकयोः सप्रसङ्गभावार्थलेखनम् २×२ = ०४

**छन्दांसि** **०५**

प्रहर्षिणी, वसन्ततिलका, मालिनी, मन्दाक्रान्ता, स्रग्धरा, हरिणी, शिखरिणी, शार्दूलविक्रीडितम्।

**अलङ्काराः** **०५**

अनुप्रासः, यमकः, श्लेषः, विभावना, उपमा, रूपकम्, दृष्टान्तः, विशेषोक्तिः।

**कोशः** **०५**

अमरकोशस्य प्रथमकाण्डस्य सप्तमश्लोकतः चतुश्चत्वारिंशत्-श्लोकपर्यन्तम्।

(स्वर्गवर्गतः देवनामतः इन्द्रनामपर्यन्तम्)

**निर्धारित-पुस्तकम्**

**काव्यकौमुदी (द्वितीयो भागः)**

# विषयानुक्रमणिका


| क्र.सं. | पाठः | लेखकः/ स्त्रोतोग्रन्थविवरणम् | पृष्ठसङ्ख्या |
|---|---|---|---|
| | **पद्य-भागः** | | |
| १. | प्रथमः पाठः – गीतामृतम् | महर्षिवेदव्यासविरचित- महाभारताङ्गभूत-श्रीमद्भगवद्गीतातः | १ |
| २. | द्वितीयः पाठः – सुभाषितानि | श्रीभर्तृहरिविरचित-नीतिशतकात् | १४ |
| ३. | तृतीयः पाठः – रामो द्विर्नाभिभाषते | श्रीमद्वाल्मीकिरामायणात् | २७ |
| ४. | चतुर्थः पाठः – विवेकानन्दाष्टकम् | डॉ. श्रीधरभास्करवर्णेकरविरचितात् 'विवेकानन्दविजय' नाटकात् | ३७ |
| ५. | पञ्चमः पाठः – रघुकौत्ससंवादः | महाकविकालिदासविरचित- 'रघुवंश' महाकाव्यात् | ४८ |
| ६. | षष्ठः पाठः – छन्दांसि | सङ्कलितानि | ६५ |
| ७. | सप्तमः पाठः – अलङ्काराः | सङ्कलिताः | ७५ |
| ८. | अष्टमः पाठः – अमरकोशः | श्री अमरसिंहविरचित-अमरकोशात् | ८१ |
| | **गद्य-भागः** | | |
| ९. | नवमः पाठः – काष्ठभ्रष्टकच्छपकथा | पण्डितविष्णुशर्मविरचितस्य 'पञ्चतन्त्रस्य मित्रभेदनामकात् प्रथमात् तन्त्रात् | ९९ |
| १०. | दशमः पाठः – हिरण्यकताम्रचूडकथा | पण्डितविष्णुशर्मविरचितस्य 'पञ्चतन्त्रस्य मित्रसम्प्राप्तिनामकात् द्वितीयात् तन्त्रात् | १०४ |
| ११. | एकादशः पाठः – स्वर्णहंस-स्वर्णपक्षिराजकथा | पण्डितविष्णुशर्मविरचितस्य 'पञ्चतन्त्रस्य काकोलूकीयनामकात् तृतीयात् तन्त्रात् | ११२ |
| १२. | द्वादशः पाठः – सिंहशिशुशृगालपुत्रकथा | पण्डितविष्णुशर्मविरचितस्य 'पञ्चतन्त्रस्य लब्धप्रणाशनामकात् चतुर्थात् तन्त्रात् | ११६ |
| १३. | त्रयोदशः पाठः – शतबुद्ध्यादिमत्स्यकथा | पण्डितविष्णुशर्मविरचितस्य 'पञ्चतन्त्रस्य अपरीक्षितकारकनामकात् पञ्चमात् तन्त्रात् | १२२ |
| | **रचना-भागः** | | |
| १४. | चतुर्दशः पाठः – निबन्ध-पत्र-लेखनम् | डॉ. शिवचरण शर्मा | १२७ |
| १५. | पञ्चदशः पाठः – शब्दरूपाणि धातुरूपाणि च | सङ्कलितानि | १३८-१५३ |

# पद्य-भागः

## प्रथमः पाठः
## गीताऽमृतम्

**लेखकपरिचयः, गीतायाः वैशिष्ट्यं च –**

संस्कृतसाहित्ये आदिकवेः महर्षेः वाल्मीकेरनन्तरं महर्षिः वेदव्यासः सर्वमान्यः कविः स्वीक्रियते। अस्य जनकः महर्षिः पराशरः जननी च सत्यवती आसीत्। अयं महर्षिः महाभारतकाले आसीद्, एतदर्थम् अस्य कालः महाभारतस्य समये स्वीकर्तुं शक्यते। आचार्यबलदेवोपाध्यायमते महाभारतस्य कालः ईसापूर्व-पञ्चमी षष्ठी वा शताब्दी आसीद्, अतः अस्यापि समयः अयमेव आसीदिति स्वीकरणीयः।

महर्षिवेदव्यासविरचितं महाभारतम् एकम् अतिविशालम् आर्षकाव्यमस्ति। अस्यैव आर्षकाव्यस्य अंशभूता श्रीमद्भगवतद्गीता मन्यते। श्रीमद्भगवद्गीता साक्षाद् भगवतः श्रीकृष्णस्य दिव्यवाग् अस्ति। अत्र सर्वेषां वेदानां सारभागो निबद्धोऽस्ति। महाभारते अस्य ग्रन्थस्य विषये उक्तं यत्- 'सर्वशास्त्रमयी गीता' (भीष्म. ४३/२) इति। अस्य ग्रन्थस्य वैशिष्ट्यं प्रतिपादयता महर्षिणा वेदव्यासेन उक्तं यत् –

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रसङ्ग्रहैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता।।** (महा.भी.प. ३-१)

भगवान् श्रीकृष्णः अर्जुनस्य माध्यमेन मानवमात्रस्य कल्याणार्थं श्रीमद्भगवद्गीतायाः उपदेशमयच्छत्। श्रीमद्भगवद्गीता वर्ण-आश्रम-देश-काल-सम्प्रदायादिबन्धनैः निर्मुक्तः सार्वभौमः ग्रन्थः वर्तते। गीतायाः ज्ञानं मानवमात्रस्य कृते परमावश्यकं मन्यते। गीतायाः भाषा सरलाऽस्ति, परन्तु अर्थः नितान्तगूढः वर्तते। अस्याः गीतायाः माहात्म्यं वाचा वक्तुं न शक्यते, यतोहि अयमेको रहस्यमयः ग्रन्थोऽस्ति। अस्याः माहात्म्यं प्रायशः विद्वांसः स्व-स्वरीत्या कृतवन्तः। तद्यथा –

**गीताध्ययनशीलस्य प्राणायामपरस्य च।**
**नैव सन्ति हि पापानि पूर्वजन्मकृतानि च।।**
**मलनिर्मोचनं पुंसां जलस्नानं दिने-दिने।**
**सकृद्गीताम्भसि स्नानं संसारमलनाशनम्।।**
**भारताऽमृतसर्वस्वं विष्णोर्वक्त्राद्विनिःसृतम्।**
**गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते।।**

अत एव एतादृशस्य ज्ञानामृतपरिपूरितस्य ग्रन्थरत्नस्य आश्रयणम् नूनमेव करणीयं येन मानवजीवनोद्देश्यं सार्थकं स्यादिति।

**पाठपरिचयः-**

महर्षिवेदव्यासविरचितस्य **महाभारतम्** इति नामधेयस्य आर्षग्रन्थस्य अंशभूतः श्रीमद्भगवद्गीताग्रन्थः वर्तते। एतस्मादेव ग्रन्थात् केचन विशिष्टाः जीवनदर्शनप्रदर्शकाः श्लोकाः अत्र सङ्कलिताः सन्ति। श्रीमद्भगवद्गीतायां

भगवान् श्रीकृष्णः आत्मनः नित्यत्वमतीव सरलशैल्या प्रतिपादितवान्। भगवान् श्रीकृष्णानुसारम् आत्मनः उत्पत्तिः निधनं च न भवति, एष आत्मा अजः नित्यः शाश्वतश्च वर्तते। मनुष्यः यथा प्राचीनं वस्त्रं परित्यज्य अपरं नूतनं, वस्त्रं धारयति तथैव एष आत्मा अपि जीर्णं शरीरं विहाय नूतनं शरीरं गृह्णाति। अयं च आत्मा शस्त्रेण छेदनयोग्यः अग्निना दहनयोग्यः जलेन आर्द्रीकरणयोग्यः, वायुना शोषणयोग्यश्च नास्ति। लोके त्रिविधाः आहाराः प्रसिद्धाः सन्ति – (१) सात्विकः आहारः (२) राजसिकः आहारः (३) तामसिकः आहारः। सात्विकप्रकृतीनां राजसिकप्रकृतीनां तामसिकप्रकृतीनां च जनानां कृते कीदृशाः आहाराः परिगणिताः सन्ति इत्येतेषां विवेचनमत्र विद्यते। त्रिविधं तपः लोके विख्यातमस्ति– (१) शारीरं तपः (२) वाङ्मयं तपः (३) मानसं तपश्च।

अत्र एतेषां तपसां क्रमेण पृथक्-पृथक् परिगणनं कृतमस्ति। दानविषयक-प्रकरणे सात्विक-राजस-तामस-इत्येतेषां दानस्य भेदानां निरूपणं विद्यते। प्रकीर्णप्रकरणे कर्मयोगस्य वैशिष्ट्यम्, आत्मा एव आत्मनः बन्धुः शत्रुश्च वर्तते इति प्रतिपादितमस्ति। एवञ्च नरकस्य काम-क्रोध-लोभाख्यं त्रिविधं द्वारं मन्यते, एतत् त्रयं सर्वथा सर्वैः जनैः नूनमेव त्याज्यम्। इह लोके नैके महापुरुषाः सञ्जाताः तेषां चरितान्यपि अस्माकं कृते अनुकरणीयानि सन्ति। एवंविधं अस्मिन् पाठे शीर्षकचतुष्टयं विद्यते। अत्र स्थिताः श्लोकाः नूनमेव मानवजीवनोपयोगिनः सन्ति।

# गीताऽमृतम्

**सन्दर्भः** – अयं श्लोकः योगेश्वरस्य भगवतः श्रीकृष्णस्य मुखारविन्दतः निःसृतश्रीमद्भगवद्गीतानामधेयात् ग्रन्थरत्नाद् गृहीतोऽस्ति।

**प्रसङ्गः**– अस्मिन् श्लोके आत्मनः नित्यत्वविषयकं वर्णनमस्ति –

**न जायते म्रियते वा कदाचि-**
**न्नायं भूत्वा भविता वा न भूयः।**
**अजो नित्यः शाश्वतोऽयं पुराणो**
**न हन्यते हन्यमाने शरीरे।।१।।**

**पदच्छेदः**– न जायते म्रियते वा कदाचित् न अयम् भूत्वा भविता वा न भूयः। अजः नित्यः शाश्वतः अयम् पुराणः न हन्यते हन्यमाने शरीरे।।

**अन्वयः**– अयम् (आत्मा) कदाचित् न जायते (न) म्रियते वा, न वा (अयम्) भूत्वा भूयः भविता। अयम् अजः नित्यः शाश्वतः पुराणः (अस्ति), शरीरे हन्यमाने (अपि) न हन्यते।

**व्याख्या** – अयम् = एषः आत्मा, कदाचित् = कस्मिन्नपि काले, न = नहि, जायते = उत्पद्यते (उत्पन्नं भवति) (न=नहि), म्रियते = मृत्युं प्राप्नोति (निधनमेति), वा = अथवा, न = नहि, वा = अथवा, (अयम्) भूत्वा = सम्भूय (उत्पद्य) भूयः = पुनः, भविता = वर्तिता (भविष्यति)। अयम् = एष आत्मा, अजः = उत्पत्तिरहितः (अजन्मा), नित्यः = अविनाशी, (विनाशरहितः) शाश्वतः = सनातनः, पुराणः = पुरातनः, शरीरे = काये (देहे), हन्यमाने = हिंस्यमाने (अपि), न = नैव, हन्यते = हिंस्यते।

**भावार्थः**– अयम् आत्मा कस्मिन्नपि काले नोत्पद्यते न च विनश्यति। एषः प्रादुर्भूय पुनः न जायते। एषः अजन्मा ध्रुवः सनातनः पुरातनश्च वर्तते। पाञ्चभौतिकस्य शरीरस्य विनष्टे सत्यपि एष न विनश्यति। एतादृशगुणसम्पन्नः एषः आत्मा विद्यते इति भावः।

**व्याकरणात्मकटिप्पणी –**

कदाचित् = किम्+दा+चित् (अव्य.)। जायते = जन्+लट्+त (प्र.पु.ए.व.)। म्रियते = मृ+लट्+त (प्र.पु.ए.व.)। भूत्वा = भू+क्त्वा (त्वा) (अव्य.)। भूय: = भूयस् (सकारस्य रुत्वविसर्ग:) (अव्य.)। भविता = भू+लुट्+तिप् (प्र.पु.ए.व.)। अज: = न जायते इति अज: (नञ्-तत्पु.) नञ्+जन्+ड+सु (प्र.वि.ए.व.)। नित्य: = नियमेन भव: नित्य: – नि+त्यप् (य)+सु (प्र.वि.ए.व.)। शाश्वत: -शाश्वद् भव: – शश्वद्+अण् (अ) + सु (प्र.वि.ए.व.)। शरीरे = शॄ+ईरन् (ईर) (धातो: गुण: रपरत्वञ्च)+ङि (स.वि.ए.व.)। हन्यमाने = हन्+यक् (य)शानच् (आन)+मुक् + ङि (स.वि.ए.व.)।

**छन्द:**– अस्मिन् पद्ये उपजाति-नामधेयं वृत्तं वर्तते।

**प्रसङ्ग:**– अत्र जीर्णवस्त्रस्य दृष्टान्तम् उपस्थाप्य आत्मन: नित्यत्वं प्रतिपादितम् –

**वासांसि जीर्णानि यथा विहाय,**
**नवानि गृह्णाति नरोऽपराणि।**
**तथा शरीराणि विहाय जीर्णा-**
**न्यन्यानि संयाति नवानि देही।।२।।**

**पदच्छेद:**– वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नर: अपराणि तथा शरीराणि विहाय जीर्णानि, अन्यानि संयाति नवानि देही।

**अन्वय:**– यथा नर: जीर्णानि वासांसि विहाय अपराणि नवानि गृह्णाति, तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति।

**व्याख्या**– यथा = येन प्रकारेण, नर: = पुरुष:, जीर्णानि = विशीर्णानि (प्राचीनानि), वासांसि = वस्त्राणि, (वसनानि), विहाय = परित्यज्य, अपराणि = अन्यानि (इतराणि), नवानि = नूतनानि, गृह्णाति = धारयति, तथा = तेनैव प्रकारेण, देही = आत्मा, जीर्णानि = शिथिलाङ्गानि, शरीराणि = देहान् (कायान्), विहाय = त्यक्त्वा (परित्यज्य), अन्यानि = इतराणि, नवानि = नूतनानि, संयाति = धारयति।

**भावार्थ:**– अस्मिन् जगति मनुष्य: येन प्रकारेण प्राचीनानि जीर्णानि च वस्त्रादीनि परित्यज्य, अन्यानि नूतनानि वस्त्रादीनि वस्तूनि स्वीकरोति (धारणं करोति) तेनैव प्रकारेण अस्माकं शरीरे विद्यमान: एष: आत्मा पुरातनानि वार्द्धक्यगतानि शरीराणि त्यक्त्वा अन्यानि नूतनानि शरीराणि धारयति। अत: जीर्णस्य शरीरस्य परिवर्तनं ध्रुवमस्ति। अत: अस्मिन् विषये चिन्ता न करणीया।

**व्याकरणात्मकटिप्पणी** – यथा – यद्+थाल् (था) (अव्य.)। नर: = नृ+अच् (अ)+सु (प्र.वि.ए.व.)। जीर्णानि = जॄ+क्त (त) (तस्य नत्वं णत्वम्)+शस् (द्वि.वि.ब.व.)। वासांसि वस्+असि, णिच्च+शस् (द्वि.वि.ब.व.)। विहाय = वि+ (ओहाक्) हा+ल्यप् (य) (अव्य.)। अपराणि = अपर+शस् (द्वि.वि.ब.व.)। नवानि = नु+अप् (अ) + शस् (द्वि.वि.ब.व.)। गृह्णाति = ग्रह्+लट्+ति (क्र्यादि-प्र.पु.ए.व.)। देही = देह्+इनि (इन्)+सु (प्र.वि.ए.व.)। शरीराणि = शॄ+ईरन् (ईर)+शस् (द्वि.वि.ब.व.)। अन्यानि = अन्य + शस् (द्वि.वि.ब.व.)। संयाति = सम्+या+लट्+तिप् (प्र.पु.ए.व.)

**छन्द:**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्ग:**– एनम् आत्मानं केनापि प्रकारेण कोऽपि नाशयितुं न प्रभवति –

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावक:।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुत:।।३।।**

**पदच्छेदः**– न एनम् छिन्दन्ति शस्त्राणि न एनम् दहति पावकः। न च एनम् क्लेदयन्त्यापः न शोषयति मारुतः।

**अन्वयः**– एनं शस्त्राणि न छिन्दन्ति, एनं पावकः न दहति, एनम् आपः न क्लेदयन्ति, मारुतः च (एनं) न शोषयति।

**व्याख्या**– एनम् = इममात्मानम्, शस्त्राणि = आयुधानि (खड्गतोमरादीनि), न = नहि, छिन्दन्ति = कृन्तन्ति (नाशयितुं प्रभवन्ति), एनम् = इममात्मानम्, पावकः = अग्निः (अनलः), न = नहि, दहति = ज्वालयति (दग्धुं शक्नोति), एनम् = इममात्मानम्, आपः = पयांसि (जलानि), न = नहि, क्लेदयन्ति = आर्द्रीकुर्वन्ति, मारुतः = वायुः (अनिलः), च = तथा, (एनम्), न = नहि, शोषयति = शुष्कीकरोति (शोषयितुं शक्नोति)।

**भावार्थः**– इह जगति शस्त्राणि सर्वाणि वस्तूनि छेत्तुं प्रभवन्ति, अग्निः दग्धुं प्रभवति, आपः (जलानि) सर्वान् पदार्थान् आर्द्रीकरणे समर्थाः भवन्ति, वायुः अखिलान् पदार्थान् शोषयितुं शक्तोऽस्ति, किन्तु शरीराभ्यन्तरे स्थितः यः आत्मा वर्तते तं प्रभावयितुं कश्चन अपि समर्थः नास्ति।

**व्याकरणात्मकटिप्पणी** – शस्त्राणि = शस्+ष्ट्रन् (त्र)+जस् (प्र.वि.ब.व.)। नैनम् = न+एनम् (वृद्धिसन्धिः)। छिन्दन्ति = छिद्+लिट्+झि (प्र.पु.ब.व.)। पावकः = पू+ण्वुल् (वु = अक) + सु (प्र.वि.ए.व.)। दहति = दह+लट्+तिप् (प्र.पु.ए.व.)। चैनम् = च+एनम् (वृद्धिसन्धिः)। आपः = अप्+जस् (प्र.वि.ब.व.)। क्लेदयन्ति = क्लिद्+णिच्+झि (अन्ति) (प्र.पु.ब.व.)। शोषयति = शुष्+णिच्+लट्+तिप् (प्र.पु.ए.व.)। मारुतः = मरुत्+अण् (अ)+सु (प्र.वि.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

## त्रिविध आहारः

**प्रसङ्गः**– अस्मिन् श्लोके सात्विक-आहारस्य स्वरूपं तत्कार्यं च वर्णितमस्ति –

**आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**
**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।।४।।**

**पदच्छेदः** – आयुः सत्त्व-बल-आरोग्य-सुख-प्रीतिविवर्धनाः। रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः।।

**अन्वयः**– आयुःस त्त्व-बल-आरोग्य-सुख-प्रीतिविवर्धनाः,र स्याःि स्नग्धाि स्थराःहृ द्याःस ात्त्विकप्रियाः आहाराः (सन्ति)।

**व्याख्या** – आयुः = वयः, सत्त्वम् = बुद्धिः, बलम् = शक्तिः, आरोग्यम् = रोगाभावः (नैरुज्यम्), सुखम् = इन्द्रियानुकूलवेद्यत्वम् (आनन्दः), प्रीतिविवर्धनाः = स्नेहवर्धकाः, रस्याः = रसपरिपूर्णाः, स्निग्धाः = स्नेहसंयुक्ताः, (स्नेहप्रदाः), स्थिराः = सुदृढाः, हृद्याः = मनःप्रियाः (चेतोहराः), सात्विकप्रियाः = सात्विकप्रकृतियुक्तानां जनानां कृते रुचिकराः, आहाराः = खाद्यपदार्थाः (सन्ति)।

**भावार्थः**– लोके मनुष्याणाम् आयुः-बुद्धि-बल-सुख-प्रीति-एतेषां गुणानामभिवर्धका आहाराः सात्विकाः सन्ति। सात्विकाहारेण शरीरमरोगं भवति, मनसि प्रसन्नता, शान्तिश्च प्रादुर्भवति अन्तःकरणञ्च निर्मलं भवति। सात्विकेनाहारेण शरीरे उत्साहस्य संचारो भवति। सात्विकः पुरुषः नीरोगी दीर्घायुश्च भवति।

**व्याकरणात्मकटिप्पणी** – आयुः = आ+इ+उस्+सु (प्र.वि.ए.व.)। आरोग्यम् = आरोग+ष्यञ् (य)+सु (अम्) (प्र.वि.ए.व.)। प्रीतिः = प्री+क्तिन् (ति)+सु (प्र.वि.ए.व.)। विवर्धनाः = वि+वृध्+ल्युट् (यु+अन)+जस् (प्र.वि.ब.व.)। रस्याः = रम्+यत्+जस् (प्र.वि.ब.व.)। स्निह्+क्त (त)+जस् (प्र.वि.ब.व.)। स्थिराः = स्था+किरच्

(इर)+जस्( प्र.वि.ब.व.) ह्व द्या:= ह्व द्+यत्( य)+जस्( प्र.वि.ब.व.) ।स ात्विकप्रिया:= स ात्विकेभ्य:ſ प्रय: सात्विकप्रिय: (च.त.पु.) ते। आहारा: = आ+हृ+घाञ् (अ)+जस् (प्र.वि.ब.व.)।

**छन्द:**– अत्र अनुष्टुप् 'नामधेयं' वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् श्लोके राजस–आहारविषयकं वर्णनं वर्तते –

**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन:।**
**आहारा राजसस्येष्टा दु:खशोकामयप्रदा:।।५।।**

**पदच्छेद:**– कटु–अम्ल–लवण–अत्युष्ण–तीक्ष्ण–रूक्ष–विदाहिन:। आहारा: राजसस्य इष्टा: दु:ख–शोक–आमयप्रदा:।

**अन्वय:**– कटु–अम्ल लवण–अत्युष्ण–तीक्ष्ण–रूक्ष–विदाहिन: आहारा राजसस्य इष्टा: दु:ख–शोक–आमयप्रदा: (सन्ति)।

**व्याख्या**– कटु–अम्ल–लवण–अत्युष्ण–तीक्ष्ण–रूक्ष–विदाहिन: = कटु: = तीक्ष्ण:, अम्ल: = रसविशेष:, लवणम् = सैन्धवम्, अत्युष्णम् = अतीव संतप्तम्, तीक्ष्ण: = उत्तेजक:, रूक्ष: = कर्कश:, अमृदु, विदाहिन: = दाहकारका: (दाहप्रदा:), आहारा: = भोज्यपदार्था:, राजसस्य = रजोगुणयुक्तस्य पुरुषस्य, इष्टा: = प्रिया: (अभीष्टा:), दु:खशोकामयप्रदा: = दु:ख (विषाद)–चिन्तारोगप्रदायका: (सन्ति)।

**भावार्थ:** – लोके त्रिविधा आहारा: प्रसिद्धा: सन्ति। तेषु त्रिविधेषु आहारेषु कटु–अम्ल–सैन्धव–अत्युष्ण–तीक्ष्ण–अमृदु–दाहोत्पादका: आहारा: राजसिका: सन्ति। एते आहारा: दु:खचिन्तारोगोत्पादका: भवन्ति। एतदर्थम् इमे आहारा: राजपुरुषेभ्य: रोचन्ते।

**व्याकरणात्मकटिप्पणी** – कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिन: = कटु: च अम्ल: च लवण: च अत्युष्ण: च तीक्ष्ण: च रूक्ष: च विदाही च (द्व.स.) ते। आहारा: = (आङ्) आ+हृ+घाञ् (अ)+जस् (प्र.वि.ब.व.)। राजसस्येष्टा = राजसस्य इष्टा: = (गुणसन्धि:)। दु:खशोकामयप्रदा: = दु:खं च शोक: च आमय: च ते दु:खशोकामया: (द्व.स.), तेषां प्रदा: दु:खशोकामयप्रदा: (ष.त.)। प्रदा: = प्रददातीति प्रद:, ते–प्रदा:।

**छन्द:** – अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः** – अस्मिन् श्लोके तामस–आहारविषयकं वर्णनं विद्यते –

**यातयामं गतरसं पूति पर्युषितं च यत्।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।।६।।**

**पदच्छेद:** – यातयामं गतरसं पूति पर्युषितं च यत्। उच्छिष्टम् अपि च अमेध्यम् भोजनम् तामसप्रियम्।

**अन्वय:** – यत् च भोजनं यातयामं, गतरसं, पूति, पर्युषितम् उच्छिष्टम् अमेध्यं च अपि (अस्ति, तद् भोजनम्) तामसप्रियम् (भवति)।

**व्याख्या** – यातयामम् = अर्धपक्वम् (भोजनम्), गतरसम् = रसशून्यम् (रसविरहितम्) (भोजनम्), पूति = दुर्गन्धियुक्तम्, (भोजनम्), पर्युषितम् = पूर्वदिवसे निर्मितम् (भोजनम्) उच्छिष्टम् = अवशिष्टम् (अस्वीकृतम्), अमेध्यम् = अपवित्रम् (दूषितम्) चापि = तथापि (अस्ति, तद्भोजनम्) तामसप्रियम् = तामसिकजनानां कृते रुचिकरम् (भवति)।

**भावार्थ:**– लोके यद् भोजनम् अर्धपक्वम्, रसरहितम्, दुर्गन्धियुक्तम्, गतदिवसावशिष्टम्, अस्वीकृतम्, अपवित्रं च भवति तदेव भोजनं तामसिकवृत्तीनां जनानां कृते रुचिकरं भवति। य: पुरुष: यादृशमन्नं खादति तस्य स्वभावोऽपि तादृश एव भवति। अत: एवंविधं भोजनं सर्वथा सर्वे परित्यजेयु:।

**व्याकरणात्मकटिप्पणी** – यातयामम् = या+क्त (त) यम् + घञ् (अ)+ सु (अम्) (प्र.वि.ए.व.)। पूति = पूय् + क्तिच् (ति)+ सु (नपु.) (प्र.वि.ए.व.) । पर्युषितम् = परि+वस्+क्त+सु (अम्) (प्र.वि.ए.व.)। उच्छिष्टम् = उत् + शिष्+क्त (त)+सु (अम्) (प्र.वि.ए.व.)। अमेध्यम् = न मेध्यम् इति अमेध्यम् (नञ्–तत्पु.)। भोजनम् = भुज्+ल्युट् (यु=अन)+सु (अम्) (प्र.वि.ए.व.)। तामसप्रियम् = तमस्+अण् (अ) = तामस, प्री+क (अ) = प्रिय+सु (अम्) (प्र.वि.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

## त्रिविधं तपः

**प्रसङ्गः**– अस्मिन् श्लोके किं तपः शारीरिकमुच्यते? इति वर्णितमस्ति –

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।७।।**

**पदच्छेदः**– देव–द्विज–गुरु–प्राज्ञपूजनम्, शौचम् आर्जवम्। ब्रह्मचर्यम् अहिंसा च शारीरम् तपः उच्यते।

**अन्वयः**– देव–द्विज–गुरु–प्राज्ञपूजनं शौचम् आर्जवम्, ब्रह्मचर्यम्, अहिंसा च शारीरं तप उच्यते।

**व्याख्या** – देव (पूजनम्) = देवानां पूजनम्, द्विज (पूजनम्) = ब्राह्मणानां पूजनम्, गुरु (पूजनम्) = गुरूणां पूजनम्, प्राज्ञपूजनम् = ज्ञानिनां पूजनम्, शौचम् = शारीरिकपवित्रता, आर्जवम् = सारल्यम्, ब्रह्मचर्यम् = ब्रह्मचर्यस्य पालनम्, अहिंसा = अनिष्टकारिताया अभावः, च = तथा शारीरम् = शरीरविषयकम् तपः = तपश्चरणम्, उच्यते = कथ्यते, (निगद्यते)।

**भावार्थः** – किं तपः शारीरिकमितिजिज्ञासायामुच्यते यत् – देवानाम्, ब्राह्मणानाम्, गुरूणाम्, ज्ञानिनाञ्च पूजनम्, देहस्य शुचिता, सारल्यम्, ब्रह्मचर्यस्य पालनम् प्राणिनः प्रति हिंसाभावनायाः परित्यागः एतानि सर्वाणि आचरणानि शारीरिकतपांसि सन्ति।

**व्याकरणात्मकटिप्पणी** – देवद्विजगुरुप्राज्ञपूजनम् = देवश्च द्विजश्च गुरुश्च प्राज्ञश्च = देवद्विजगुरुप्राज्ञाः (द्वन्द्व स.) तेषां पूजनम् देवद्विजगुरुप्राज्ञपूजनम् (ष.त.)। आर्जवम् = ऋजु+अण् (अ)+सु (अम्) (प्र.वि.ए.व.)। ब्रह्मचर्यम् = ब्रह्म आचरतीति ब्रह्म + चर् + यत् (य)+ सु (अम्) (प्र.वि.ए.व.)। शारीरम् = शरीरे भवं शरीर+अण् (अ) + सु (अम्) (प्र.वि.ए.व.)। उच्यते = ब्रू (वच्) यक् + लट् + त (प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये वाङ्मयतपोविषयकं वर्णनं विद्यते –

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।८।।**

**पदच्छेदः**– अनुद्वेगकरम् वाक्यम् सत्यम् प्रियहितम् च यत्। स्वाध्याय अभ्यसनम् च एव वाङ्मयम् तप उच्यते।

**अन्वयः**– यत् अनुद्वेगकरं, प्रियं, हितं, सत्यं च वाक्यम् (अस्ति) यत् च स्वाध्याय–अभ्यसनम् (अस्ति, तद्) एव वाङ्मयं तपः उच्यते।

**व्याख्या** – यत् = यद्वचनम्, अनुद्वेगकरम् = अखेदप्रदम् (अक्षोभोत्पादकम्) प्रियम् = रमणीयम् (रुचिकरम्), हितम् =हितकरम् (कल्याणप्रदम्) सत्यम् = यथार्थम्, (वास्तविकम्), च = तथा, वाक्यम् = वचनम् (वाग्) (अस्ति), यत् = यद्वचनम्, च = तथा, स्वाध्याय–अभ्यसनम् = वेदादिशास्त्राणामध्ययनम्, परमेश्वरस्य गुणानां

सङ्कीर्तनम्, एव = नूनमेव, वाङ्मयम् = वाचिकम् (वाग्विषयकम्), तपः = धर्माचरणम्, उच्यते = कथ्यते (निगद्यते)।

**भावार्थः**– लोके यद्वचनम् अनुद्वेगोत्पादकम्, रुचिकरम्, हितकरम्, यथार्थं चास्ति, यद् च वचनं वेदादिशास्त्राणामध्ययनपरम्, परमेश्वरस्य नामोच्चारणपरमस्ति, तदेव वाग्विषयकं तपः कथ्यते। अर्थात् अनुद्वेगकरम्, सत्यम्, प्रियम्, हितकरं च वाक्यं वाक्तपः मन्यते। अतः वाचा यानि श्रेष्ठानि कार्याणि सम्पाद्यन्ते तानि वाक्तपसि समाविष्टानि सन्ति।

**व्याकरणात्मकटिप्पणी** – अनुद्वेगकरम् = न उद्वेगकरमिति अनुद्वेगकरम् (नञ्–तत्पु.)। वाक्यम् = वच्+ण्यत् (य) (चस्य कः)+सु (प्र.वि.ए.व.)। स्वाध्यायाभ्यसनम् = स्वाध्याय+अभ्यसनम् (दीर्घसन्धिः)। चैव = च + एव (वृद्धिसन्धिः), वाङ्मयम् = वाच्+मयट् (मय)+ सु (प्र.वि.ए.व.)। तपः = तप्+असुन् (अस्)+सु, (नपुं.प्र.वि.ए.व.)। उच्यते = ब्रू (वच्) +यक्+लट्+त (आ.प्र.पु.ए.व.)।

**छन्दः** – अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं छन्दः वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये मानसतपोविषयकं वर्णनं विद्यते –

**मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**
**भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।।९।।**

**पदच्छेदः**– मनःप्रसादः सौम्यत्वम् मौनम् आत्मविनिग्रहः। भावसंशुद्धिः इति एतत् तपः मानसम् उच्यते।

**अन्वयः**– मनः प्रसादः, सौम्यत्वं, मौनम् आत्मविनिग्रहः, भावसंशुद्धिः इति एतत् मानसं तपः उच्यते।

**व्याख्या** – मनःप्रसादः = अन्तःकरणस्य हर्षः (चेतसः स्वच्छभावः), सौम्यत्वम् = शान्तस्वरूपत्वम्, मौनम् = तूष्णीं भावम्, आत्मनिग्रहः = मनसः नियन्त्रणम्, भावसंशुद्धिः = विचाराणां पवित्रता, इति = एतादृशम्, एतत् = इदम्, तपः = तपश्चरणम्, मानसम् = मानसिकम् (मनोविषयकम्), उच्यते = निगद्यते (कथ्यते)।।

**भावार्थः** – इह लोके तपसः स्वरूपं नैकविधं दृश्यते। तेषु मानसिकं तपः, मनसः प्रसादत्वम्, विचाराणां शान्तस्वरूपत्वम्, ईश्वरचिन्तनम्, मनसः वशीकरणत्वम् अन्तःकरणस्य पावनत्वञ्चेति कथ्यते। अतः सततं मानसिकं तपः सर्वैः आचरणीयम्।

**व्याकरणात्मकटिप्पणी** – प्रसादः = प्र+सद्+घञ् (अ)+सु (प्र.वि.ए.व.)। सौम्यत्वम् = सौम्य+त्व (भावे त्व प्रत्ययः)+सु (प्र.वि.ए.व.)। मौनम् = मुनेर्भावः मुनि+अण्+सु (प्र.वि.ए.व.)। आत्मनिग्रहः = आत्मनः निग्रहः (ष.त.)। भावसंशुद्धिः = भावानां संशुद्धिः (ष.त.)। मानसम् = मनसः इदम् मनस्+अण्+सु (प्र.वि.ए.व.)। उच्यते = ब्रू (वच्)+यक्+लट्+त (आ.प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

## ध्यातव्यानि पद्यानि

**प्रसङ्गः**– अस्मिन् श्लोके मनुष्यैः सर्वदा कार्यं करणीयम् इति प्रतिपादितमस्ति –

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।१०।।**

**पदच्छेदः**– कर्मणि एव अधिकारः ते मा फलेषु कदाचन। मा कर्मफलहेतुः भूः मा ते सङ्गः अस्तु अकर्मणि।

**अन्वयः**– (हे अर्जुन!) ते कर्मणि एव अधिकारः (अस्ति) फलेषु कदाचन मा, (त्वम्) कर्मफलहेतुः मा भूः, अकर्मणि (च) ते सङ्गः मा अस्तु।

**व्याख्या** – (हे अर्जुन! = हे पार्थ) ते = तव, कर्मणि = कर्मविधाने (कार्यसम्पादने), एव = नूनम्, अधिकारः

= स्वामित्वभाव: (अस्ति), फलेषु = कर्मणां परिणामेषु, कदाचन = कदाचित्, मा = नैव (त्वम्) कर्मफलहेतु: = कर्मपरिणामप्रेरित: मा = नैव, भू:=स्था:, अकर्मणि=कर्मत्यागे (च) ते = तव, सङ्ग: = आसक्ति: मा = नैव, अस्तु = भवतु।

**भावार्थ:** – भगवान् श्रीकृष्ण: कुरुक्षेत्रसमराङ्गणे अर्जुनस्य व्याजेन सर्वान् लोकान् उपदिशन् कथयति यत–अर्जुन! तव अधिकार: कार्यसम्पादने अस्ति, कर्मण: फलप्राप्तौ नास्ति। कदापि कर्मफलस्य हेतुरपि त्वं न स्या:, तव आसक्ति: अकर्मणि अपि न स्यादिति। अत्र अयमभिप्राय: वर्तते यत् कार्यसम्पादनमेव मनुष्याणां परमं कर्त्तव्यमस्ति इति ज्ञेयम्।

**व्याकरणात्मकटिप्पणी** – कर्मण्येव = कर्मणि+एव (यण्–सन्धि:)। अधिकार: = अधि+कृ+अण्+सु (प्र.वि.ए.व.)। कदाचन = किम्+दा+चन (अव्य.)। कर्मफलहेतु: – कर्मफलानां हेतु: (ष.त.)। सङ्ग: = सञ्ज्+घञ्+सु (प्र.वि.ए.व.)। सङ्गोऽस्त्वकर्मणि = सङ्ग:+अस्तु+अकर्मणि (विसर्ग–यण्–सन्धि:)। अकर्मणि = न कर्म इति अकर्म (नञ्तत्पु.) तस्मिन् अकर्मणि (स.वि.ए.व.)।

**छन्द:**– अत्र 'अनुष्टुप्' नामधेयं वृत्तम् अस्ति।

**प्रसङ्ग:**– अस्मिन् पद्ये आत्मा एव आत्मन: बन्धु: रिपुश्च वर्तते इति प्रतिपादितमस्ति –

**उद्धरेदात्मनाऽत्मानं नात्मानमवसादयेत्।**
**आत्मैव आत्मनो बन्धुरात्मैव रिपुरात्मन:।।११।।**

**पदच्छेद:**– उद्धरेद् आत्मना आत्मानम् न आत्मानम् अवसादयेत्। आत्मा एव आत्मन: बन्धु: आत्मा एव रिपु: आत्मन:।

**अन्वय:**– आत्मना आत्मानम् उद्धरेत्, आत्मानं न अवसादयेत्, हि आत्मा एव आत्मन: बन्धु: (अस्ति) आत्मा एव आत्मन: रिपु: (अस्ति)।

**व्याख्या** – आत्मना = स्वात्मना (निजकर्मणा), आत्मानम् = स्वकीयम् (संसारसागरत:), उद्धरेत् = उद्धारं कुर्यात्, आत्मानम् = स्वयमेवात्मानम्, न = नहि, अवसादयेत् = अधो नयेत् (अध:पतनं कुर्यात्), हि = यतोहि, आत्मा = जीवात्मा, (मनुष्य:), एव = नूनमेव, आत्मन: = स्वकीयस्य, बन्धु: = मित्रम् (सुहृद्, सखा) (अस्ति =वर्तते), आत्मा = जीवात्मा (मनुष्य:), एव = अवश्यमेव, आत्मन: = स्वस्य (जीवात्मन:), शत्रु: = रिपु: (अस्ति = वर्तते)।

**भावार्थ:**– मनुष्याणां कृते उचितानुचितकार्यसम्पादक: कश्चिद् अन्य: जन: देवो वा न वर्तते, अपितु मनुष्य एव स्वकीयजीवने तथाविधं कार्यं करोति। मनुष्य: यदा स्वयमेव आत्मन: कल्याणं विचिन्त्य श्रेष्ठं कार्यं करोति तदानीमेव अन्ये जना: तस्य साहाय्यं कुर्वन्ति। यदि मनुष्य: धर्मं नाचरति तर्हि तस्य कल्याणं साहाय्यं वा कोऽपि न कर्तुं शक्नोति। पुण्यकर्मणां फलं सुखप्राप्ति:, पापकर्मणां फलं दु:खप्राप्तिश्च मन्यते। अत एव इह लोके य: नर: यथा कर्म करोति तथैव फलमपि लभते।

**व्याकरणात्मकटिप्पणी** – आत्मना = अत् +मनिण् (मन्)+टा (आ) (तृ.वि.ए.व.)। आत्मानम् = अत् + मनिण् (मन्)+अम् (द्वि.वि.ए.व.)। उद्धरेत् = उद्+धृ+विधिलिङ्+तिप् (प्र.पु.ए.व.)। अवसादयेत् = अव+सद्+णिच् (इ)+विधिलिङ्+तिप् (प्र.पु.ए.व.)। आत्मैव = आत्मा+एव (वृद्धिसन्धि:)। ह्यात्मन: = हि+आत्मन: = (यण्सन्धि:)। बन्धुरात्मैव = बन्धु:+आत्मा+एव (विसर्गसन्धि: वृद्धिसन्धि:)। रिपुरात्मन: = रिपु:+आत्मन: (विसर्गसन्धि:)।

**छन्द:**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्ग:** – अस्मिन् पद्ये आत्मा कस्य कृते बन्धु: कस्य च कृते शत्रुरस्ति इति प्रतिपादितम् –

**बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जित:।**

**अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्।।१२।।**

**पदच्छेदः**– बन्धुः आत्मा आत्मनः तस्य येन आत्मा एव आत्मना जितः। अनात्मनः तु शत्रुत्वे वर्तेत आत्मा एव शत्रुवत्।

**अन्वयः**– येन आत्मना एव आत्मा जितः तस्य आत्मनः बन्धुः आत्मा (अस्ति), अनात्मनः तु शत्रुत्वे आत्मा एव शत्रुवत् वर्तेत।

**व्याख्या** – येन = येन पुरुषेण, आत्मना = जीवात्मना (पुरुषेण), एव = नूनमेव, आत्मा = जीवात्मा, जितः = वशीकृतः, तस्य = तस्य जनस्य, आत्मनः = जीवात्मनः (पुरुषस्य), बन्धुः = सखा (मित्रम्, सुहृत्), आत्मा = जीवात्मा (अस्ति = वर्तते), अनात्मनस्तु = अवशेन्द्रियस्य तु (अजितेन्द्रियस्य तु), शत्रुत्वे = शत्रुताप्रदर्शने (अमैत्रीभावप्रकटीकरणे), आत्मा = जीवात्मा (मनुष्यः) एव = अवश्यमेव, शत्रुवत् = रिपुसदृशः (अरि- तुल्यः), वर्तेत = व्यवहरेत् (आचरेत्)।

**भावार्थः**– इह लोके प्रायशः बन्धुः संरक्षणं करोति शत्रुश्च विनाशम्, एतदर्थं यः जीवः अधोगतिं गमनात् आत्मानं संरक्षति तज्जीवः आत्मनः मित्रं बन्धुश्च मन्यते, किन्तु यः जीवः स्वयं दुर्गतिम् आचरति स स्वयमेव आत्मनः शत्रुः अस्ति। यदा मनुष्यः जितेन्द्रियः भूत्वा योगयुक्तः भवति तदानीमेव संसारसागरात् तरति, पुनर्जन्म च न लभते। एतस्मात् पृथक् यः जीवः वशेन्द्रियः भूत्वा सांसारिकसुखेषु लिप्तो भवति स आत्मनः विनाशं स्वयमेव करोति।

**व्याकरणात्मकटिप्पणी** – बन्धुरात्मा = बन्धुः + आत्मा (विसर्गसन्धिः)। आत्मनस्तस्य = आत्मनः+तस्य (विसर्गसन्धिः)। येनात्मैवात्मना = येन+आत्मा+एव+आत्मना (दीर्घ+वृद्धि+दीर्घसन्धिः)। जितः = जि+क्त (त)+सु (प्र. वि.ए.वि.)। शत्रुत्वे = शत्रु+त्व+ङि. (स.वि.ए.व.)। वर्तेतात्मैव = वर्तेत+आत्मा+एव = (दीर्घ+वृद्धिसन्धिः)। वर्तेत = वृत्+विधिलिङ्+त (प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये काम–क्रोध–लोभ–इत्येतेषां मनोविकाराणां त्यागः करणीय इति प्रतिपादितम् –

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत्।।१३।।**

**पदच्छेदः**– त्रिविधम् नरकस्य इदम् द्वारम् नाशनम् आत्मनः। कामः क्रोधः तथा लोभः तस्माद् एतत् त्रयं त्यजेत्।

**अन्वयः**– कामः क्रोधः तथा लोभः इदं नरकस्य त्रिविधं द्वारम् आत्मनः नाशनम् (अस्ति) तस्मात् एतत् त्रयं त्यजेत्।

**व्याख्या** – कामः = विषयोपभोगेच्छा (कामना), क्रोधः = क्रोधानलः (कोपः), तथा = च, लोभः = लोलुपता (तृष्णाधिक्यम्), इदम् = एतत्, नरकस्य = घृण्यप्रदेशस्य (निमित्तलोकस्य), आत्मनः = जीवात्मनः (स्वस्य) नाशनम् = विनाशकारकम् (अस्ति = वर्तते), तस्मात् = एतस्मात् कारणात्, एतत् = इदम्, त्रयम् = त्रिसंख्याकम्, त्यजेत् = परित्यागं कुर्यात्।

**भावार्थः** – आसुरीप्रकृतिसम्पन्नाः पुरुषाः काम–क्रोध–लोभादिभिः समाकृष्टाः सन्तः पापकर्माणि कुर्वन्ति, एतदर्थं ते नरकं गच्छन्ति। नरकप्राप्तिः एव आत्मनः विनाश इत्युच्यते। नरकस्य काम–क्रोध–लोभाख्यानि त्रीणि द्वाराणि भवन्ति। यस्मिन् पुरुषे इमे त्रयो दुर्गुणाः भवन्ति तस्मिन् अन्ये सर्वे दुर्गुणाः समायान्ति। सर्वेषु दुर्गुणेषु काम–क्रोध–लोभाख्याः मुख्याः सन्ति। एतेषां दुर्गुणानां परित्यागानन्तरमेव मानवाः परमगतिं (मोक्षं) प्राप्नुवन्ति।

**व्याकरणात्मकटिप्पणी** – नरकस्येदम् = नरकस्य+इदम् (गुणसन्धिः)। द्वारम् = द्वृ+णिच्+अच्+सु

(अम्) (प्र.वि.ए.व.)। नाशनम् = नश्+णिच्+ल्युट् (यु=अन)+सु (अम्) (प्र.वि.ए.व.)। आत्मनः = अत् + मनिण् (मन्)+ङस् (ष.वि.ए.व.)। कामः = कम् +घाञ् (अ)+सु (प्र.वि.ए.व.)। क्रोधः = क्रुध्+घाञ् (अ)+सु (प्र.वि.ए.व.)। क्रोधस्तथा = क्रोधः + तथा (विसर्गसन्धिः)। तस्मात् = तत्+ङसि (स्मात्) (पं.वि.ए.व.)। त्यजेत् = त्यज् + विधिलिङ्+तिप् (प्र.पु.ए.व.)।

**छन्दः** – अत्र 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये मानवः केन विधिना सिद्धिं प्राप्नोतीति प्रतिपादितमस्ति –

**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।**
**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।।१४।।**

**पदच्छेदः** – यतः प्रवृत्तिः भूतानां येन इदं ततम्। स्वकर्मणा तम् अभ्यर्च्य सिद्धिं विन्दति मानवः।

**अन्वयः** – यतः (सर्वेषां) भूतानां प्रवृत्तिः येन इदं सर्वं ततम्, तम् (ईश्वरं) स्वकर्मणा अभ्यर्च्य मानवः सिद्धिं विन्दति।

**व्याख्या** – (हे अर्जुन!) यतः = यस्मात् परमात्मनः, (सर्वेषाम् = अखिलानाम्), भूतानाम् = प्राणिनाम् (शरीरिकाणाम्), प्रवृत्तिः = उत्पत्तिः (अभवत्) येन = येन परमात्मना, इदम् = एतत् जगत् (पुरो दृश्यमानं विश्वम्), सर्वम् = अखिलम् (समस्तम्), ततम् = व्याप्तम् (अस्ति)। तम् = तं परमेश्वरम्, स्वकर्मणा = आत्मनः स्वाभाविककर्मविधिना, अभ्यर्च्य = समर्च्य (अर्चनं कृत्वा), मानवः = मनुष्यः (नरः), सिद्धिम् = परमेश्वरस्य सायुज्यम्, विन्दति = प्राप्नोति।

**भावार्थः**– अस्मिन् लोके यत्किञ्चित् वस्तु दृश्यते तत् सर्वम् ईश्वरेण व्याप्तमस्ति, तेनैव ईश्वरेण सर्वे प्राणिनः समुत्पन्नाः सन्ति, स एव अस्मिन् जगति सर्वत्र व्याप्तोऽस्ति। अस्य लोकस्य मानवाः स्वकीयश्रेष्ठकर्मभिः तं सम्पूज्य तस्य सायुज्यं प्राप्नुवन्ति।

**व्याकरणात्मकटिप्पणी** – यतः = यत्+तसिल् (तस्) (अव्य.)। भूतानाम् = भूत+आम् (ष.वि.ब.व.)। प्रवृत्तिः = प्र+वृत्+क्तिन् (ति)+सु (प्र.वि.ए.व.)। ततम् = तन्+क्त (त)+सु (अम्) (प्र.वि.ए.व.)। स्वकर्मणा = स्वस्य कर्म–स्वकर्म (ष.त.) तेन। अभ्यर्च्य = अभि+अर्च्+ल्यप् (य) (अव्य.)। सिद्धिम् = सिध्+क्तिन् (ति) + अम् (द्वि.वि.ए.व.)। विन्दति = विद्+लट्+तिप् (प्र.पु.ए.व.)।

**छन्दः** – अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये श्रेष्ठपुरुषाणां मार्गस्याश्रयणं प्रमाणरूपेण लोके मन्यते इति प्रतिपादितमस्ति –

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।१५।।**

**पदच्छेदः**– यद् यद् आचरति श्रेष्ठः तत् तत् एव इतरः जनः स यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते।

**अन्वयः** – श्रेष्ठः यत् यत् आचरति, इतरः जनः तत् तत् एव (आचरति) सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते।

**व्याख्या** – श्रेष्ठः = उत्तमः पुरुषः, यत् यत् = यद्यत् कर्म, आचरति = अनुतिष्ठति (करोति), इतरः = अन्यः (अपरः), जनः = मनुष्यः (नरः), तत् तत् = तत्तत् कर्म, एव = नूनमेव (आचरति), सः = असौ पुरुषः, यत् प्रमाणम् = यस्य वाक्यस्य निर्धारणम्, कुरुते = करोति, लोकः = जनसमूहः, तत् = तद्वाक्यम्, (तत् कर्म), अनुवर्तते = अनुकरोति (अनुसरति)।

**भावार्थः**– लोके महापुरुषाः यथाविधमाचरन्ति तस्यैवानुकरणम् अन्ये जनाः कुर्वन्ति। सर्वे जनाः महापुरुषैः निर्दिष्टान् आदर्शान् पालयन्ति। अर्थात् श्रेष्ठाः महापुरुषाः यद् वस्तु प्रमाणरूपेण स्वीकुर्वन्ति तदेव वस्तु सर्वेऽपि

प्रमाणत्वेन अङ्गीकुर्वन्ति। एतदर्थं महापुरुषैः सदैव श्रेष्ठाचरणमेव आश्रयणीयम्। यतोहि तेषां चारित्र्योन्नतिं विलोक्य सर्वे जनाः स्वकीयं कल्याणं कर्तुं शक्नुयुः। एवंविधं समाजकल्याणस्य महत्तमं दायित्वं महापुरुषाणामुपरि वर्तते।

**व्याकरणात्मकटिप्पणी** – यद्यदाचरति = यत्+यत्+आचरति (तकारस्य जश्त्वं, हल्सन्धिः)। आचरति = आङ्+चर्+लट्+तिप् (प्र.पु.ए.व.)। श्रेष्ठः = अतिशयेन प्रशस्यः, प्रशस्य + इष्ठन् (इष्ठ)+सु (प्रशस्य इत्यस्य स्थाने श्र आदेशः, गुणः) (प्र.वि.ए.व.)। तत्तदेवेतरः = तत्+तत्+एव+इतरः = (द्वितीयस्य तत्पदस्य तकारस्य जश्त्वं, गुणसन्धिः च)। प्रमाणम् = प्र+मा+ल्युट् (यु = अन)+सु (अम्) (प्र.वि.ए.व.)। कुरुते = कृ+लट्+त (आ.प्र.पु.ए.व.)। अनुवर्तते = अनु+वृत्+लट्+त (प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

## अभ्यास-प्रश्नाः

**(क) बहुविकल्पात्मकप्रश्नाः–**

**अधोलिखितानां प्रश्नानाम् उत्तराणि सङ्केताक्षरमाध्यमेन कोष्ठके लेखनीयानि–**

१. देही कानि विहाय अपराणि नवानि गृह्णाति–
   (क) नूतनानि शरीराणि (ख) जीर्णानि शरीराणि
   (ग) स्वस्थशरीराणि (घ) स्थूलशरीराणि ( )

२. आत्मानं कानि न छिन्दन्ति–
   (क) पाषाणखण्डानि (ख) आभूषणानि
   (ग) शस्त्राणि (घ) कटुवचनानि ( )

३. अमेध्यं भोजनं कीदृशम् उच्यते–
   (क) ब्राह्मणप्रियम् (ख) तामसप्रियम्
   (ग) राजसप्रियम् (घ) सात्विकप्रियम् ( )

४. ब्रह्मचर्यम् अहिंसा च कीदृशं तपः उच्यते–
   (क) शारीरं तपः (ख) बौद्धिकं तपः
   (ग) मानसिकं तपः (घ) वाङ्मयं तपः ( )

५. अर्जुनस्य अधिकारः कुत्र भवेत्–
   (क) अकर्मणि (ख) वर्त्मनि
   (ग) कर्मणि (घ) परमात्मनि ( )

**(ख) अतिलघूत्तरात्मकाः प्रश्नाः–**

(क) हन्यमाने शरीरे कीदृशः आत्मा न हन्यते?
(ख) आत्मानं के न क्लेदयन्ति कश्च न शोषयति?
(ग) दैवीसम्पदः काः सन्ति?
(घ) कीदृशं दानं सात्विकमुच्यते?
(ङ) इतरः जनः किं करोति?

**( ग ) लघूत्तरात्मकाः प्रश्नाः –**

(क) देही किं कृत्वा अन्यानि नवानि संयाति?

(ख) वाङ्मयं तपः किम् उच्यते?

(ग) राजसं दानं किं भवति?

(घ) आत्मना आत्मानं किं कुर्यात्? आत्मन आत्मा किं किम् अस्ति?

(ङ) नरकस्य त्रिविधं द्वारं किमुच्यते? तेन किं जायते?

**( घ ) सामान्यज्ञानप्रश्नाः –**

**१. निम्नलिखितपद्यानां संस्कृते व्याख्या कार्या –**

(क) वासांसि जीर्णानि ............................. नवानि देही।

(ख) आयु:सत्त्वबलारोग्य ............................. सात्त्विकप्रियाः।

(ग) मन:प्रसादः सौम्यत्वं ............................. मानसमुच्यते।

(घ) कर्मण्येवाधिकारस्ते ............................. अकर्मणि।

(ङ) यतः प्रवृत्तिर्भूतानां ............................. विन्दति मानवः।

**२. निम्नाङ्कितपद्यानां संस्कृतभावार्थः लेखनीयः –**

(क) न जायते म्रियते ............................. हन्यमाने शरीरे।

(ख) कट्वम्ललवण ............................. शोकामयप्रदाः।

(ग) देवद्विजगुरु ............................. तप उच्यते।

(घ) उद्धरेदात्मना ............................. रिपुरात्मनः।

(ङ) यद्यदाचरति श्रेष्ठः ............................. तदनुवर्तते।

**३. निम्नाङ्कितपद्यानाम् अन्वयः कार्यः –**

(क) नैनं छिन्दन्ति ............................. शोषयति मारुतः।

(ख) यातयामं गतरसं ............................. तामसप्रियम्।

(ग) बन्धुरात्मात्मनः ............................. शत्रुवत्।

**( ङ ) व्याकरणज्ञानविषयकाः प्रश्नाः –**

**१. निम्नाङ्कितपदानां सन्धिविच्छेदः कार्यः –**

(क) कदाचिन्नायम् = ............................. ।

(ख) नरोऽपराणि = ............................. ।

(ग) उच्छिष्टमपि = ............................. ।

(घ) प्रत्युपकारार्थम् = ............................. ।

(ङ) कर्मण्येवाधिकारस्ते = ............................. ।

(च) बन्धुरात्मैव = ............................. ।

**२. निम्नाङ्कितपदानां सन्धिः कार्यः –**

(क) क्लेदयन्ति + आपः = ............................. ।

(ख) राजसस्य+इष्टा = ............................. ।

(ग) इति+एतत्+तपः = ............................. ।

(घ) सङ्गः+अस्तु+अकर्मणि = ............................. ।

(ङ) वर्तेत+आत्मा+एव = ............................ ।

(च) लोभः+तस्मात्+एतत् = ............................ ।

**३. निम्नाङ्कितपदानां समासविग्रहः कार्यः–**

(क) आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः = ............................ ।

(ख) सात्त्विकप्रियाः = ............................ ।

(ग) दुःखशोकामयप्रदाः = ............................ ।

(घ) तामसप्रियम् = ............................ ।

(ङ) देवद्विजगुरुप्राज्ञपूजनम् = ............................ ।

(च) आत्मनिग्रहः = ............................ ।

**४. अधोलिखितानां पदानां समासः कार्यः–**

(क) कटुः च अम्लः च लवणः अत्युष्णः च रुक्षः च विदाही च = ......................... ।

(ख) न उद्वेगः अनुद्वेगः, तं करोति इति = ............................ ।

(ग) भावानां संशुद्धिः = ............................ ।

(घ) न उपकारिणः, तस्मिन् = ............................ ।

(ङ) कर्मफलस्य हेतुः = ............................ ।

(च) स्वस्य कर्म, तेन = ............................ ।

**५. निम्नलिखितक्रियापदेषु धातु-लकार-पुरुष-वचनानि निर्दिशत–**

(क) म्रियते = ............................ ।

(ख) हन्यते = ............................ ।

(ग) क्लेदयन्ति = ............................ ।

(घ) उच्यते = ............................ ।

(ङ) दीयते = ............................ ।

(च) अवसादयेत् = ............................ ।

**६. अधोलिखितेषु पदेषु मूलशब्दं, लिङ्गं, विभक्तिं, वचनं च निर्दिशत–**

(क) वासांसि = ............................ ।

(ख) शरीराणि = ............................ ।

(ग) अहिंसा = ............................ ।

(घ) वाङ्मयम् = ............................ ।

(ङ) सात्विकम् = ............................ ।

(च) आत्मनः = ............................ ।

**७. आत्मनः स्वरूपं स्वाधीतग्रन्थानुरूपं प्रतिपादयत।**

**८. अस्मिन् पाठे समागतानि क्रियापदानि चित्वा लिखत।**

**९. 'शत्रु' अथवा 'रिपु' शब्दस्य रूपाणि लिखत।**

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

१. ख   २. ग   ३. ख   ४. क   ५. ग

# द्वितीयः पाठः

# सुभाषितानि

मुक्तककाव्यपरम्परायां महाकविः भर्तृहरिः अन्यतमः मन्यते। अनेन विरचितेषु त्रिषु शतकेषु नीति- विषयकं विवेचनं 'नीतिशतकम्' इत्याख्ये काव्ये सञ्जातम्। अस्य महाकवेः जनिकालादिविषयकं वास्तविकं जीवनवृत्तं प्रामाणिकरूपेण न कुत्रापि दृश्यते, किन्तु अस्य विरचितवैराग्यशतकेन एतद् अनुमीयते यद् अस्य काले देशे शासनव्यवस्थाल घु-लघु-समूहेषुि वभक्ताअ ासीत्।भ ारतवर्षेए तादृशीि स्थतिःग ुप्तसाम्राज्यस्यप तनानन्तरंन ृपस्य हर्षवर्धनस्य पूर्वम् आसीत्। अत एव अस्यापि समयः तदेव भवितुमर्हति। यदा देशे नृपेषु विलासप्रवृत्तिः प्रबला आसीत् तदानींि वदुषां,म नीषिणांस म्मानंन ृपतयःन ैवकु र्वन्तिस् म ।ए तदि् वलोक्यअ यंक विःए तादृशान्न ृपान्उ द्दिश्य व्यङ्ग्यमपि अकरोत्। तदानीं नृपतयः धर्ममार्गं परित्यज्य आचरन्ति स्म। तेषां शासने निवासोऽपि दुष्करः आसीत्। यतोहि तेषु शासनक्षमता-यथार्थदान-ब्राह्मणपालन-मित्रसंरक्षणादि गुणाः न आसन्, एतदुद्दिश्य महाकविना उक्तं यत्-

**आज्ञा कीर्तिः पालनं ब्राह्मणानां, दानं भोगो मित्रसंरक्षणं च।**

**येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण।।** (नीति. ४० श्लो.)

अस्यय ुगस्यैवप ्रभावोव र्ततेय त्अ स्यन ीतिविषयकसुभाषितानिअ न्तःकरणादि् नःसृत्यल ोकानांप ुरतः समागतानि। अस्य मनः एकान्ते एव अरमत। अस्य उपास्यदेवः शिवः आसीत्।

**कवेः कृतिपरिचयः नीतिशतकस्य वर्ण्यविषयश्च-**

अयं कविः शतकत्रयस्य प्रणेता आसीत्। अस्य त्रीणि शतकानि इत्थं सन्ति-

(१) शृङ्गारशतकम् (२) नीतिशतकम् (३) वैराग्यशतकम्।

नीतिशतके १११ पद्यानि सन्ति। अस्य शतकस्य पद्यानि लक्षणग्रन्थेषु अपि प्रमाणरूपेण उद्धृतानि सन्ति। 'नीतिशतके' लोकजीवनव्यवहारस्य नानासूक्तयः विद्यन्ते। एताः सूक्तयः अद्यापि जीवनाय लोकहिताय च संजीवनीभूताः सन्ति।

अयं कविः वस्तुतः वैदर्भीरीतिमाश्रित्य एव समग्रं काव्यमरचयत्। अस्य भाषा अतीव प्राञ्जला वर्तते। नीतिशतकस्य रचनायां कवेः अनुभवः, पाण्डित्यं च सर्वतोभावेन दृश्यते। अस्य कृतौ छन्दसां बाहुल्यं दृश्यते।

**पाठपरिचयः-**

महाकविभर्तृहरिविरचिते 'नीतिशतके' यानि लोकोपकारकाणि विशिष्टतत्त्वयुक्तानि पद्यानि सन्ति तेषां सङ्ग्रहः अस्मिन् पाठे विद्यते। लोके मनस्विनः स्वभावः कथं दृश्यते, अर्थसम्पन्नः नरः लोके श्रेष्ठः मन्यते, गुणहीनोऽपि नरः सर्वत्र सम्मानं लभते। अस्य देशस्य भूमिः वसुसम्पन्ना वर्तते अस्याः संरक्षणेन नैकविधं फलं प्राप्तुं शक्यते। अस्माकं जीवनं लोकसेवायै विद्यते, किन्तु सेवाधर्मस्य निर्वहणमतीव दुष्करमस्ति योगिनोऽपि स्वामिनः आशयं ज्ञातुं न प्रभवन्ति तर्हि अन्येषां का कथा? खलानां सज्जनानां च मित्रतायाः लौकिकदृष्टान्तेन निदर्शनम्, महापुरुषाणां स्वाभाविकगुणानां विवेचनम्, पुण्यवन्तः जना इहलोके के सन्ति? मनस्वी, कार्यार्थी कथं स्वकीयं कार्यं सम्पादयति। इह लोके देवाः शक्तिसम्पन्नाः प्राणिनोऽपि भाग्यं विना कुत्रापि समर्थाः न भवन्ति अपितु सर्वत्र कष्टं लभन्ते। पूर्वसंचिततपोबलेनैव पुरुषाः सर्वत्र इष्टवस्तूनि प्राप्नुवन्ति। आलस्यं मनुष्याणां शरीरस्थः रिपुः उद्यमश्च मित्रमस्ति। शरीरस्य शोभाप्रदायकं तत्त्व

परोपकारोऽस्ति न तु स्वर्णाभूषणानि सन्ति, यानि कृत्रिमस्वर्णाभूषणानि सन्ति तानि कालान्तरे विनश्यन्ति, किन्तु चरित्राभूषणं कदापि न विनश्यति। अतः सर्वतोभावेन चरित्रं रक्षणीयं मनुष्यैः। एवंविधं नीतिशतकसागरात् विशिष्टानि रत्नाभूषणानि सम्यग् आलोड्य अस्मिन् पाठे सङ्गृहीतानि सन्ति।

## सुभाषितानि

**सन्दर्भः**– प्रस्तुतमिदं पद्यं महाकविभर्तृहरिविरचित 'नीतिशतकम्' इति नामधेयात् खण्डकाव्यादुद्धृतमस्ति।

**प्रसङ्गः**– मनस्विनः पुरुषस्य लोके द्विविधो व्यवहारः दृश्यते इति वर्णयन् कविः कथयति यत्–

**कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः।**
**मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा।।१।।**

**पदच्छेदः**– कुसुमस्तबकस्य इव द्वयी वृत्तिः मनस्विनः, मूर्ध्नि वा सर्वलोकस्य शीर्यते वने एव वा।

**अन्वयः**– कुसुमस्तबकस्य इव मनस्विनः द्वयी वृत्तिः। सर्वलोकस्य मूर्ध्नि वा वने एव शीर्यते वा।

**व्याख्या**– कुसुमस्तबकस्य = पुष्पगुच्छस्य, इव=यथा(तद्वत्) मनस्विनः= धैर्यशालिनः पुरुषस्य, द्वयी=द्विविधा, वृत्तिः=व्यापारः (भवति)। सर्वलोकस्य=सर्वेषां जनानाम्, मूर्ध्नि=मस्तके (शिरसि) तिष्ठति, वा=अथवा, वने=अरण्ये (कानने, विपिने), एव=नूनम्, शीर्यते=जीर्यति, वा=अथवा।

**भावार्थः**– लोके पुष्पगुच्छमिव मनस्वी जनः सर्वेभ्यः जनेभ्यः उत्कर्षं प्राप्तुं प्रयतते अथवा एकाकी भूत्वा शरीरं त्यक्तुमभिलषति। इयमेव पुरुषाणां श्रेयस्करी वृत्तिः वर्तते।

**व्याकरणात्मकटिप्पणी**– कुसुमस्तबकस्य=कुसुमानां स्तबकः=कुसुमस्तबकः (ष.त.) तस्य कुसुमस्तबकस्य। मनस्वी=मनस्+विनि(विन्)+ङस् (ष.वि.ए.व.) सर्वलोकस्य=सर्वः लोकः सर्वलोकः (कर्मधा.) तस्य सर्वलोकस्य। शीर्यते=शॄ+श्यन्+लट्+त (आ.प्र.पु.ए.व.)।

**छन्दः**– अत्र अनुष्टुप् नामवृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये धनस्य वैशिष्ट्यं प्रतिपादितमस्ति।

**श्लोकः**– **यस्यास्ति वित्तं स नरः कुलीनः,**
**स पण्डितः स श्रुतवान् गुणज्ञः।**
**स एव वक्ता स च दर्शनीयः,**
**सर्वे गुणाः काञ्चनमाश्रयन्ते।।२।।**

**पदच्छेदः**– यस्य अस्ति वित्तम्, सः नरः कुलीनः सः पण्डितः सः श्रुतवान् गुणज्ञः। सः एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनम् आश्रयन्ते।

**अन्वयः**– यस्य वित्तम् अस्ति स नरः कुलीनः, स पण्डितः, स श्रुतवान् (सः) गुणज्ञः, स एव वक्ता स दर्शनीयः च, सर्वे गुणाः काञ्चनम् आश्रयन्ते।

**व्याख्या**– यस्य=यस्य नरस्य, वित्तम्=धनम्, अस्ति=विद्यते, स नरः=स मनुष्यः, कुलीनः= उच्चकुलोत्पन्नः, सः=असौ जनः, पण्डितः=विद्वान्, सः=असौ, श्रुतवान्=शास्त्रज्ञः,(सः) गुणज्ञः=गुणग्राही, सः=असौ एव नूनमेव, वक्ता=वाग्मी, सः=असौ, दर्शनीयः=सुन्दरः(कमनीयः)च=तथा, सर्वे=अखिलाः, गुणाः=कुलीनत्वादयः गुणाः,काञ्चनम्=सुवर्णं धनमिति, आश्रयन्ते=आश्रयणं कुर्वन्ति(सेवन्ते)।

**भावार्थः**– इह लोके यस्य नरस्य समीपे धनं विद्यते, तं नरमेव जनाः कुलीनं, पण्डितं, शास्त्रज्ञं, गुणग्राहिणं, शोभनवक्तारं, दर्शनीयं च मन्यन्ते, अर्थात् पूर्वोक्तगुणाभावेऽपि धनिकः तत्तद्गुणयुक्तोऽस्ति, यतोहि कुलीनत्वादयः सर्वे

गुणाः वस्तुतः धनमेव आश्रयन्ते। वस्तुतः न्यायपूर्वकं धनमर्जनीयम्, तेन जीवनं सुखमयं भवति। अस्माकं भारतीयसंस्कृतेरिदमेव वैशिष्ट्यमस्तीति बोध्यम्।

**व्याकरणात्मकटिप्पणी-** वित्तम्=विद्+क्त+सु (प्र.वि.ए.व.)। कुलीनः=कुल+ख (ईन)+सु (प्र.वि.ए.व.)। श्रुतवान्=श्रुतम् अस्ति अस्य इति श्रुतवान्- श्रुत+मतुप् (मत्) (मस्य वः) (प्र.वि.ए.व.)। गुणज्ञः - गुणान् जानातीति गुणज्ञः, गुण +ज्ञा+क+सु (प्र.वि.ए.व.)। दर्शनीयः=दृश्+अनीयर्(अनीय)+सु (प्र.वि.ए.व.)।

**छन्दः**- अस्मिन् श्लोके 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- लोके प्रजापालनेनैव सर्वार्थसिद्धिः जायते इति प्रतिपादयन् कविः कथयति यत्-

**राजन्! दुधुक्षसि यदि क्षितिधेनुमेनां**
**तेनाद्यं वत्समिव लोकममुं पुषाण।**
**तस्मिंश्च सम्यगनिशं परिपुष्यमाणे**
**नानाफलं फलति कल्पलतेव भूमिः।।३।।**

**पदच्छेदः**- राजन् दुधुक्षसि यदि क्षितिधेनुम् एनाम् तेन अद्य वत्सम् इव लोकम् अमुम् पुषाण। तस्मिन् च सम्यग् अनिशम् परिपुष्यमाणे नानाफलम् फलति कल्पलता इव भूमिः।

**अन्वयः**- राजन्। यदि एनां क्षितिधेनुं दुधुक्षसि, तेन अद्य अमुं लोकं वत्सम् इव पुषाण। तस्मिन् च अनिशं सम्यक् परिपुष्यमाणे भूमिः कल्पलता इव नानाफलं फलति।

**व्याख्या-** राजन्= हे नृपते! यदि=चेत्, एनाम्=एताम्, क्षितिधेनुम्=गोसदृशीं पृथिवीम्, दुधुक्षसि=दोग्धुमिच्छ सि (तर्हि) तेन=अमुना हेतुना, अद्य=इदानीम्, अमुम्=इमम्, लोकम्=प्रजाजनम्, वत्सम्=गोवत्सम्, इव=यथा, पुषाण=परिपालय। तस्मिन्=एतदाख्ये लोके, च=तथा, अनिशम्=निरन्तरम् (सततम्), सम्यक्=सुष्ठुरूपेण, परिपुष्यमाणे=परिपाल्यमाने, भूमिः=धरणिः (मेदिनी) कल्पलता=कल्पवल्ली(कल्पवृक्षः) इव=यथा, नानाफलम्=बहुविधफलम्, फलति=निष्पादयति।

**भावार्थः**-रत्नगर्भायाः धरायाः विविधानि रत्नानि सम्प्राप्तुं नृपेण सर्वदा सावधानमनसा प्रजापालनं करणीयम्। लोके यथा वत्सेषु जीवत्सु गौः दुग्धं प्रयच्छति तथैव प्रजाजनेषु सुखं जीवत्सु एव तेषां कृते कृष्यादिद्वारा भूपतिना (राज्ञा) भूमितः धान्यादिफलं प्राप्तुं शक्यते।

**व्याकरणात्मकटिप्पणी**- क्षितिधेनुम्=क्षितिः धेनु इव इति क्षितिधेनुः ताम्(उपमित स.)। दुधुक्षसि= दोग्धुम् इच्छ सि इति दुह्+सन्+लट्+तिप् (प्र.पु.ए.व.)। पुषाण=पुष+लोट्+सिप् (म.पु.ए.व. क्र्यादिग.)। परिपुष्यमाणे=परि+पुष्+लट् कर्मणि, यक्+शानच् (आन) परिपुष्यमाणः-तस्मिन् (स.वि.ए.व.)।

**छन्दः**- अस्मिन् पद्ये 'वसन्ततिलका' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- अस्मिन् पद्ये सेवाधर्मस्य काठिन्यं प्रतिपादयन् कविः कथयति यत्-

**मौनान्मूकः प्रवचनपटुर्वाचको जल्पको वा**
**धृष्टः पार्श्वे भवति च वसन् दूरतोऽप्यप्रगल्भः।**
**क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः,**
**सेवाधर्मः परमगहनो योगिनाप्यगम्यः।।४।।**

**पदच्छेदः**- मौनात् मूकः प्रवचनपटुः वाचकः जल्पकः वा धृष्टः पार्श्वे भवति च वसन् दूरतः अपि अप्रगल्भः। क्षान्त्या भीरुः यदि न सहते प्रायशः न अभिजातः, सेवाधर्मः परमगहनः योगिनाम् अपि अगम्यः।

**अन्वयः**- मौनात् मूकः प्रवचनपटुः वाचकः जल्पकः वा, पार्श्वे च वसन् धृष्टः भवति, दूरतः अपि (वसन्)

अप्रगल्भ:( भवति) क्षान्त्या भीरु:, यदि न सहते प्रायश: अभिजात: न ( भवति), सेवाधर्म: परमगहन: योगिनाम् अपि अगम्य: ( अस्ति)।

**व्याख्या–** मौनात्=तूष्णीम्भावात्, मूक:=वाचा शून्य:( भवति), प्रवचनपटु:=समधिकभाषणे निपुण:, वाचक:=बहुभाषी, जल्पक:=असम्बद्धप्रलापी, वा=अथवा (भवति), पार्श्वे=निकटे (समीपे) च=तथा, वसन्=अवतिष्ठमान:, धृष्ट:=अविनीत: (भवति), दूरत: अपि=विप्रकृष्टेदेशे अपि( वसन्) ,अप्रगल्भ:=अप्रौढ: ( भवति), क्षान्त्या=असहनशीलतया, भीरु:=कातर:( भवति), यदि=चेत्, न सहते=न क्षमते( तर्हि), बहुधा, अभिजात:=सत्कुलोत्पन्न:, न=नहि (भवति), सेवाधर्म:=परिचर्याकर्म, परमगहन:=अतीव कठिन:, योगिनामपि=यतीनामपि, अगम्य:=अज्ञेय:, ( अस्ति=विद्यते)।

**भावार्थ:**– अस्मिन् जगति परिचर्याकर्म अतीव कठिनं मन्यते। यदि सेवक: मौनं तिष्ठति तर्हि स मूक: कथ्यते, यदि भाषणे स पटु: स्यात्तर्हि बहुभाषी उच्यते, निकटे वसति तर्हि धृष्ट: भवति, यदि दूरे वसति तर्हि स अप्रौढो भवति, यदि सहनशील: भवति तर्हि भीरु: उच्यते, यदि न सहते तर्हि अकुलीन: कथ्यते। एवं विधम् अतिगूढं सेवाधर्मं योगिनोऽपि न जानन्ति तर्हि अन्येषां का कथा?

**व्याकरणात्मकटिप्पणी–** मौनात्=मुने: भाव: कर्म वा मौनम्, तस्मात्=मौनात् ( मुनि+अण्)। प्रवचनपटु:– प्रवचने पटु: इति प्रवचनपटु: (स. तत्पु.)। वाचक:=वच्+ण्वुल् (वु=अक)+सु( प्र.वि.ए.व.)। क्षान्त्या=क्षम्+क्तिन्=क्षान्ति:, तया ( तृ.वि.ए.व.)। अभिजात:=अभि+जन्+क्त( त)+सु। सेवाधर्म:=सेवारूप: धर्म: – सेवाधर्म: ( मध्य.प.लो.स.)।

**छन्द:**– अस्मिन् श्लोके 'मन्दाक्रान्ता' नामधेयं वृत्तं वर्तते।

**प्रसङ्ग:**– अस्मिन् पद्ये महाकवि: भर्तृहरि: खलानां सज्जनानां च मैत्रीभेदं प्रदर्शयति–

**आरम्भगुर्वी क्षयिणी क्रमेण,**
**लघ्वी पुरा वृद्धिमुपैति पश्चात्।**
**दिनस्य पूर्वार्धपरार्धभिन्ना,**
**छायेव मैत्री खलसज्जनानाम्।।५।।**

**पदच्छेद:**– आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिम् उपैति पश्चात्। दिनस्य पूर्वार्धपरार्धभिन्ना छाया इव मैत्री खलसज्जनानाम्।

**अन्वय:**– आरम्भगुर्वी क्रमेण क्षयिणी, पुरा लघ्वी, पश्चात् वृद्धिम् उपैति दिनस्य पूर्वार्धपरार्धभिन्ना छाया इव खलसज्जनानां मैत्री ( भवति)।

**व्याख्या–** आरम्भगुर्वी=आदौ बृहती, क्रमेण=कालक्रमेण, क्षयिणी=क्षयशीला, पुरा=प्रारम्भकाले, लघ्वी=सूक्ष्मा, पश्चात्=अनन्तरम्, वृद्धिम् उपैति=वृद्धिं प्राप्नोति (वर्धते), दिनस्य=दिवसस्य, पूर्वार्धपरार्धभिन्ना= पूर्वार्धपरार्धाभ्यां भिन्ना( पृथग्विधा), छाया=अनातप:, इव=यथा खलसज्जनानाम्=दुर्जनसज्जनपुरुषाणाम्, मैत्री=मित्रता ( भवति=जायते)।

**भावार्थ:**– येन प्रकारेण दिनस्य पूर्वार्धे छाया बृहती भवति, तदनन्तरं क्रमश: क्षयिणी भवति तेनैव प्रकारेण दुर्जनस्य मैत्री आदौ महती जायते तत: परं स्वल्पात् स्वल्पतरा भवति, किन्तु सज्जनपुरुषाणां मैत्री एतद् विपरीता भवति अर्थात् यथा अपराह्णकाले छाया प्राक् लघ्वी भवति तत: परं क्रमेण वर्धते तथैव सज्जनानां मित्रतापि पूर्वं लघ्वी भवति पुन: क्रमश: परां वृद्धिं प्राप्नोति।

**व्याकरणात्मकटिप्पणी–** आरम्भगुर्वी=आरम्भे गुर्वी (स तत्पु.)। क्षयिणी=क्षेतुं शीलं यस्या: सा

(क्षि+णिनि+ङीप्+सु (प्र.वि.ए.व.)। पूर्वार्धपरार्धभिन्ना=पूर्वार्धश्च परार्धश्च इति पूर्वार्धपरार्धौ (द्व.स.) ताभ्यां भिन्ना इति पूर्वार्धपरार्धभिन्ना (तृ.तत्पु.)। खलसज्जनानाम्=खलाश्च सज्जनाश्च इति खलसज्जना: (द्व.स.) तेषाम्। छायेव=छाया+इव (आ+इ=ए) (गुणसन्धि:)।

**छन्द:**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्ग:**– अस्मिन् पद्ये महापुरुषाणां लक्षणं महाकविना भर्तृहरिणा प्रतिपादितम्–

**विपदि धैर्यमथाभ्युदये क्षमा,**
**सदसि वाक्पटुता युधि विक्रम:।**
**यशसि चाभिरतिर्व्यसनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम्।।६।।**

**पदच्छेद:**– विपदि धैर्यम् अभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रम:, यशसि च अभिरति: व्यसनं श्रुतौ प्रकृतिसिद्धम् इदं हि महात्मनाम्।

**अन्वय:**– विपदि धैर्यम् अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रम:, यशसि अभिरति:, श्रुतौ व्यसनं च, इदं हि महात्मनां प्रकृतिसिद्धम्।

**व्याख्या**– विपदि=विपत्तौ(संकटकाले) धैर्यम्=स्थिरचित्तता, अथ=अनन्तरम्, अभ्युदये= सम्पदि (उन्नतिकाले),क्ष मा=सहिष्णुता,स दसि=सभायाम्,व ाक्पटुता=वाक्चातुर्यम्,(वाणीनैपुण्यम्),य ुधि=स मरे(युद्धे), विक्रम:=पराक्रम:, यशसि=कीर्तौ, अभिरति:=सङ्ग्रहाभिलाष:, च=तथा, श्रुतौ=वेदादिशास्त्राभ्यासे, व्यसनम्= आसक्ति:(अनुराग:) इदम्=एतत्, हि=नूनम्, महात्मनाम्=महापुरुषाण ाम्, प्रकृतिसिद्धम्=स्वभावसिद्धम् (नैसर्गिकगुण:) (अस्ति)।

**भावार्थ:**– इह जगति महापुरुषेषु विपदि धैर्यम्, उन्नतौ क्षमा, सभायां वाक्चातुर्यं, युद्धे शौर्यं, यशसि अभिरुचि:, तथा च वेदादिशास्त्रेषु आसक्ति: एते गुणा: स्वभावत: तिष्ठन्ति।

**व्याकरणात्मकटिप्पणी–** विपदि=विपद्+ङि(स.वि.ए.व.)। अभ्युदये=अभि+उद्+इ+अच् = अभ्युदय+ङि (स.वि.ए.व.)। श्रुतौ=श्रु+क्तिन् (ति)+ङि (स.वि.ए.व.)। क्षमा=क्षम्+अङ्+टाप्+सु (प्र.वि.ए.व.)। व्यसनम्=वि+अस्+ल्युट् (यु=अन)+सु+(प्र+वि.ए.व.)। महात्मनाम्=महान् आत्मा येषां ते महात्मान: (ब.स.) तेषां महात्मनाम्। प्रकृतिसिद्धम्=प्रकृत्या सिद्धम् इति प्रकृतिसिद्धम् (तृ.तत्पु.)।

**छन्द:**– अस्मिन् पद्ये 'द्रुतविलम्बितम्' नामधेयं छन्द: वर्तते।

**प्रसङ्ग:**– अस्मिन् पद्ये सज्जनानां वैलक्षण्यं प्रतिपादयन् कवि: कथयति यत्–

**सम्पत्सु महतां चित्तं भवेदुत्पलकोमलम्।**
**आपत्सु च महाशैलशिलासंघातकर्कशम्।।७।।**

**पदच्छेद:**– सम्पत्सु महताम् चित्तम् भवेद् उत्पलकोमलम्, आपत्सु च महाशैलशिलासंघातकर्कशम्।

**अन्वय:**– सम्पत्सु महतां चित्तम् उत्पलकोमलं भवेत्, आपत्सु च महाशैलशिलासंघातकर्कशम् (भवेत्)।

**व्याख्या**–सम्पत्सु=धनागमसमये(विभवेषु),महताम्=महापुरुषाण ाम्, चित्तम्=चेत: (अन्त:करण म्), उत्पलकोमलम्=कमलमिव मृदु, भवेत्=जायेत, आपत्सु=विपत्तिकाले(विपत्सु), च=तथा, महाशैलशिलासंघातकर्कशम् = महापर्वतस्य पाषाणकूटवत् कठोरम्, (भवेत्=जायेत)।

**भावार्थ:**– महात्मनाम् अन्त:करणं धनागमकाले कमलपुष्पवत् मृदु भवति, तदेव विपदागमसमये प्रस्तर इव कठोरं भवति अर्थात् महापुरुषा: प्रस्तर इव कठिनचेतसि धैर्यं धारयन्त: समागतं सर्वं दु:खं सहन्ते इति भाव:।

**व्याकरणात्मकटिप्पणी**– सम्पत्सु=सम्+पद् क्विप्+सुप् (स.वि.ब.व)। उत्पलकोमलम्=उत्पलम् इव कोमलम्-उत्पलकोमलम्(उपमितस.)। महाशैलशिलासंघातकर्कशम्=महाशैलस्य शिलासंघातः महाशैलशिलासंघातः(ष.तत्पु.), महाशैलशिलासंघात इव कर्कशम्=महाशैलशिलासंघातकर्कशम्(उपमितस.)। शिलासंघातः = शिलानां संघातः=शिलासंघातः (ष.त.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' इत्याख्यं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये ये पदार्थाः लोके महद्भिः पुण्यैः जनाः प्राप्नुवन्ति तस्मिन्

**यः प्रीणयेत् सुचरितैः पितरं स पुत्रो**
**यद्भर्तुरेव हितमिच्छति तत्कलत्रम्।**
**तन्मित्रमापदि सुखे च समक्रियं य-**
**देतत्त्रयं जगति पुण्यकृतो लभन्ते।।८।।**

**पदच्छेदः**– यः प्रीणयेत् सुचरितैः पितरम् सः पुत्रः यद् भर्तुः एव हितम् इच्छति तत् कलत्रम्, तत् मित्रम् आपदि सुखे च समक्रियम् यत् एतत् त्रयं जगति पुण्यकृतः लभन्ते।

**व्याख्या**– यः=यः पुत्रः, सुचरितैः=सदाचरणैः (सदाचारगुणैः), पितरम्=जनकम्, प्रीणयेत्=आनन्दयेत् (सन्तोषयेत्), सः=असौ, पुत्रः=सुतः (तनयः), यत्=या, भर्तुः=पत्युः(स्वामिनः), हितम्=कल्याणम्(इष्टम्) एव=नूनम्, इच्छति=कामयते (अभिलषति),तत्=सा, कलत्रम्=भार्या (जाया), यत्, आपदि=संकटकाले, सुखे=धनागमसमये(संपदि), च=तथा, समक्रियम्=तुल्यवृत्तिः(सदृशव्यवहारः) तत् मित्रम्=तत् सुहृत्। एतत् त्रयम्=सुपुत्रम्, सुकलत्रम्, सुमित्रं च, जगति=संसारे(इहलोके), पुण्यकृतः=पुण्यशालिनः जनाः,लभन्ते=प्राप्नुवन्ति।

**भावार्थः**– इह संसारे यः पित्रे सुखादिकं प्रयच्छति सः सत्पुत्रः मन्यते, या सर्वदा पतिहितपरायणा भवति सा भार्या उच्यते, यत् च सुखदुःखे समं तिष्ठति तन्मित्रं भवति, एतेषां प्राप्तिः पुण्येनैव भवति। एतत् पृथक् कुपुत्रादिप्राप्तिः पापकर्मणां फलं मन्यते।

**व्याकरणात्मकटिप्पणी**– सुचरितैः=शोभनानि चरितानि सुचरितानि(प्रादि स.) तैः सुचरितैः (तृ.वि.ब.व.) प्रीणयेत्=प्री+विधिलिङ्+तिप् (प्र.पु.ए.व.)। पुत्रः=पुन्नाम नरकात् त्रायते इति पुत्रः-पुत्+त्रै+क+सु (प्र.वि.ए.व.)। समक्रियम्=समा क्रिया यस्य तत्-समक्रियम् (ब.स.)। त्रयम्=त्रि+तयप् (तय)+सु (तयपः स्थाने अयजादेशः)। पुण्यकृतः=पुण्यं कुर्वन्ति इति पुण्यकृत् ते पुण्यकृतः-पुण्य+कृ+क्विप्+तुक्+जस् (प्र.वि.ब.व.)।

**छन्दः**– अस्मिन् पद्ये 'वसन्ततिलका' नामधेयं वृत्तं वर्तते।

**सन्दर्भः**– मनस्विनः जनाः कार्यसिद्ध्यर्थं सुखं दुःखं च न गणयन्तीति प्रतिपादयन् कविः कथयति यत्–

**क्वचित् पृथ्वीशय्यः क्वचिदपि च पर्यङ्कशयनः**
**क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः।**
**क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो**
**मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्।।९।।**

**पदच्छेदः**– क्वचित् पृथ्वीशय्यः क्वचिद् अपि च पर्यङ्कशयनः क्वचित् शाकाहारः क्वचिद् अपि च शाल्योदनरुचिः क्वचित् कन्थाधारी क्वचिद् अपि च दिव्याम्बरधरः मनस्वी कार्यार्थी न गणयति दुःखम् न च सुखम्।

**अन्वयः**– क्वचित् पृथ्वीशय्यः क्वचिदपि च पर्यङ्कशयनः क्वचित् शाकाहारः क्वचिदपि च शाल्योदनरुचिः क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरः कार्यार्थी मनस्वी न दुःखं न च सुखं गणयति।

**व्याख्या**– क्वचित्=कुत्रचित्, पृथ्वीशय्यः=पृथ्वी शय्या यस्य तादृशो जनः, क्वचिदपि=कुत्रचिदपि, च=तथा,

पर्यङ्कशयनः=बहुमूल्यशय्यायां निद्रा यस्य तादृशः जनः, क्वचित्=कुत्रचित्, शाकाहारः=शाकमात्रभोजी, क्वचिदपि=कुत्रचिदपि, च=तथा शाल्योदनरुचिः=विशिष्टौदनप्रियः क्वचित्=कुत्रचित्, कन्थाधारी= जीर्णशीर्णवस्त्रधारी, क्वचिदपि=कुत्रचिदपि च=तथा, दिव्याम्बरधरः=बहुमूल्यवस्त्रधारकः (भवति) (इत्थम्) कार्यार्थी=कार्यसाधनाभिलाषी, मनस्वी=धैर्यसम्पन्नः जनः, न=नहि, दुःखम्=क्लेशं न=नहि, च=तथा, सुखम्=आनन्दम्, गणयति=अपेक्षते (गणनां करोति)।

**भावार्थः**– कार्यसाधनप्रक्रियायां दृढेन मनसा संलग्नः पुरुषः स्वकीयं सुखं वा दुःखं वा न पश्यति। स तु कार्यसिद्ध्यर्थं यथावसरं कण्टकाकीर्णायां धरायां शेते, अन्यस्मिन् समये बहुमूल्यं पर्यङ्केऽपि, कदाचित् सरसं नीरसं वा वस्तु भुङ्क्ते (खादति) एवञ्च पुरातनं बहुमूल्यं वा वस्त्रं परिदधाति। एवंविधं धीरः जनः सुखदुःखयोः समानावस्थया एव कार्यसाधनपरो भवति।

**व्याकरणात्मकटिप्पणी**–प ृथ्वीशय्यः–शय्यतेअ स्यामितिश य्या,प ृथ्वीए व श य्याय स्यस :( ब.स.)। पर्यङ्कशयनः=पर्यङ्के शयनं यस्य सः (ब.स.)। शाकाहारः=शाकः आहारो यस्य सः (ब.स.)। शाल्योदनरुचिः=शाल्याः ओदनः–शाल्योदनः (ष.त.), शाल्योदने रुचिः यस्य सः (ब.स.)। कन्थाधारी=कन्थां धारयतीति–कन्था–धृ+णिनि+सु (प्र.वि.ए.व.)। दिव्याम्बरधरः=दिव्यम् अम्बरम् इति दिव्याम्बरम् (कर्मधा.स.) दिव्याम्बरस्य धरः–दिव्याम्बरधरः(ष.त.)। कार्यार्थी=कार्यम् अर्थयते इति (उपपद स.)। कार्येण अर्थी इति कार्यार्थी (सुप्सुपा स.)। क्वचिच्छाकाहारः=क्वचित्+शाकाहारः (श्चुत्वसन्धिः)।

**छन्दः**– अस्मिन् पद्ये 'शिखरिणी' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये भाग्यमेव प्रबलं भवतीति प्रतिपादयन् कविः कथयति यत्–

**गजभुजंगविहंगमबन्धनं**
**शशिदिवाकरयोर्ग्रहपीडनम्।**
**मतिमतां च विलोक्य दरिद्रतां**
**विधिरहो बलवानिति मे मतिः।।१०।।**

**पदच्छेदः**– गजभुजंगविहंगमबन्धनम् शशिदिवाकरयोः ग्रहपीडनम्। मतिमतां च विलोक्य दरिद्रतां विधिः अहो बलवान् इति मे मतिः।।

**अन्वयः**– गजभुजंगविहंगमबन्धनं शशिदिवाकरयोः ग्रहपीडनम्, मतिमतां च दरिद्रतां विलोक्य अहो विधिः बलवान् इति मे मतिः (अस्ति)।

**व्याख्या**– गजभुजंगविहंगमबन्धनम्=हस्तिसर्पखगानां नियमनम्, शशिदिवाकरयोः=चन्द्रसूर्ययोः ग्रहपीडनम्=राहुकेतुभ्यां ग्रसनम्, मतिमताम्=बुद्धिमताम् (धीमताम्), दरिद्रताम्=निर्धनताम्, च=तथा, विलोक्य=दृष्ट्वा, अहो=आश्चर्यम्, विधिः=दैवम् (भाग्यम्), बलवान्=शक्तिशाली (शक्तिसम्पन्नः), इति=एतादृशी, मे=मम, मतिः=बुद्धिः (अस्ति)।

**भावार्थः**– आकाशविहारिणौ प्रकाशमानौ शशिदिवाकरौ छायाग्रहाभ्यां राहुकेतुभ्यां ग्रस्येते, वने विहरन्तः शक्तिशालिनो गजाः विषधाराः भुजङ्गाश्च जनैः वशीक्रियन्ते, बुद्धिमन्तोऽपि क्वचिद् दारिद्र्यमनुभवन्ति इत्येतत् सर्वं विलोक्य निश्चिनोमि यद् भाग्यं सर्वेषामपि बलिष्ठमस्ति।

**व्याकरणात्मकटिप्पणी**– गजभुजंगविहंगमबन्धनम्=गजश्च भुजङ्गश्च विहङ्गमश्च इति गजभुजङ्गविहङ्गमाः (द्व.स.) तेषां बन्धनम् गजभुजङ्गविहङ्गमबन्धनम् (ष.त.)। शशिदिवाकरयोः=शशी च दिवाकरश्च इति शशिदिवाकरौ (द्व.स.)तयोः शशिदिवाकरयोः। ग्रहपीडनम्=ग्रहेण पीडनम् (तृ.त.) मतिमताम्=

मति+मतुप्(मत्)+आम् (ष.वि.ब.व.)। विलोक्य=वि+लोक्+ल्यप् (य) (अव्य.)। दरिद्रताम्=दरिद्र+तल्+टाप्+अम्(द्वि.वि.ए.व.)।मतिः=मन्+क्तिन्(ति)+सु (प्र.वि.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'द्रुतविलम्बितं' नामधेयं वृत्तमस्ति।

**प्रसङ्गः**– इह लोके भाग्यमेव वस्तुतः फलं यच्छतीति प्रतिपादयन् कविः कथयति यत्–

**नैवाकृतिः फलति नैव कुलं न शीलं**
**विद्यापि नैव न च यत्नकृतापि सेवा।**
**भाग्यानि पूर्वतपसा खलु सञ्चितानि**
**काले फलन्ति पुरुषस्य यथैव वृक्षाः।।११।।**

**पदच्छेदः**– न एव आकृतिः फलति न एव कुलं न शीलम्, विद्या अपि न एव न व यत्नकृता अपि सेवा, भाग्यानि पूर्वतपसा खलु संचितानि काले फलन्ति पुरुषस्य यथा एव वृक्षाः।

**अन्वयः** आकृतिः न एव फलति, कुलं न एव, शीलं न, विद्या अपि न एव, यत्नकृता सेवा अपि च न, पूर्वतपसा संचितानि पुरुषस्य भाग्यानि वृक्षाः यथा काले एव फलन्ति।

**व्याख्याः**– आकृतिः=स्वरूपम्, न=नहि, एव=नूनम्, फलति=फलदायिनी भवति, कुलम्=वंशः, न=नहि, एव=नूनम् (फलति), शीलम्=सद्वृत्तम्, न=नहि (फलति), विद्या=चतुर्दशविद्या, अपि, न=नहि एव=नूनम् (फलति), यत्नकृता=प्रयासविहिता, सेवा अपि=परिचर्या अपि, च=तथा, न=नहि(फलति), पूर्वतपसा=पुराकृतसुकृतेन, संचितानि=संगृहीतानि, पुरुषस्य=नरस्य, भाग्यानि=भागधेयानि, वृक्षाः=तरवः(पादपाः), यथा=इव, काले=समये, एव=नूनम्, फलन्ति=फलं यच्छन्ति।

**भावार्थः**– इह जगति यदि भाग्यानि न सन्ति तर्हि सुस्वरूपेण, कुलेन, शीलेन विद्यया, सेवया च मनुष्यः किञ्चिदपि लब्धुं न शक्नोति, भाग्यानि सन्ति चेत् तदा यथा वृक्षाः स्वसमये फलैः शोभन्ते तथैव मनुष्योऽपि धनादिभिः सम्पन्नो भवति।

**व्याकरणात्मकटिप्पणी**– नैवाकृतिः=न+एव+आकृतिः (वृद्धिसन्धिः, दीर्घसन्धिः)। विद्यापि=विद्या+ अपि (दीर्घसन्धिः) विद्+क्यप्(य)+टाप्+सु (स्त्री.)यत्नकृता=यत्नेन कृता(तृ.त.स.)। पूर्वतपसा=पूर्वं तपः=पूर्वतपः(कर्मस.) तेन पूर्वतपसा। संचितानि=सम्+चिञ्+क्त+जस्(प्र.वि.ब.व.)। फलन्ति=फल्+लट्+झि (अन्ति)(प्र.पु.ब.व.)।यथैव=यथा+एव (वृद्धिसन्धिः)।

**छन्दः**– अस्मिन् पद्ये 'वसन्ततिलका' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये अस्माकं शरीरे कः रिपुः कश्च मित्रं भूत्वा तिष्ठतीति प्रतिपादयन् कविः कथयति यत्–

**आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।१२।।**

**पदच्छेदः**– आलस्यम् हि मनुष्याणाम् शरीरस्थः महारिपुः, नास्ति उद्यमसमः बन्धुः कृत्वा यम् न अवसीदति।

**अन्वयः**– हि आलस्यं मनुष्याणां शरीरस्थः महान् रिपुः, उद्यमसमः बन्धुः न, यं कृत्वा न अवसीदति।

**व्याख्या**– हि=निश्चयेन, आलस्यम्=कार्येषु प्रवृत्त्यभावः, मनुष्याण ाम्=मानवानाम्(नराण ाम्), शरीरस्थः=देहस्थितः(कायस्थः), महारिपुः=महान् शत्रुः(अस्ति);उद्यमसमः=उद्योगतुल्यः (प्रयत्नसदृशः), बन्धुः=बान्धवः, न=नहि(अस्ति) यम्=यम् उद्योगम्, कृत्वा=विधाय(मनुष्यः), न=नहि, अवसीदति=दुःखं लभते (कष्टं प्राप्नोति)।

**भावार्थः**– अस्मिन् जगति मानवः कार्यविघातकं शत्रुमिव आलस्यं दूरे स्थापयेत्, उद्योगं च कार्यसाधकं

मित्रमिव आश्रयेत्। वस्तुत: आलस्यं परित्यज्य सर्वै: जनै: सदैव सोद्योगेन सर्वं कार्यं करणीयम्।

**व्याकरणात्मकटिप्पणी-** आलस्यम्=अलसस्य भाव: आलस्यम्, अलस+ष्यञ्(य)+सु(अम्) (प्र.वि.ए.व.)। शरीरस्थ:=शरीरे तिष्ठतीति, शरीर-स्था+क(अ)+सु(प्र.वि.ए.व.)। महारिपु:=महान् चासौ रिपु: महारिपु: (कर्म.स.)। उद्यमसम:=उद्यमेन सम: उद्यमसम: (तृ.त.)। अवसीदति=अव+सद्+लट्+तिप्(सद: स्थाने सीद् आदेश:-पाघ्राध्मा.इति सूत्रेण) (प्र.पु.ए.व.)।

**छन्द:-** अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं छन्द: वर्तते।

**प्रसङ्ग:-** अस्मिन् पद्ये नराणां वास्तविकमाभूषणं किमस्तीति प्रतिपादयन् कथयति यत्-

**श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन।**
**विभाति काय: करुणाकुलानां परोपकारेण न चन्दनेन।।१३।।**

**पदच्छेद:-**श्रोत्रंश्रुतेनएव न कुण्डलेनदानेनपाणि:न तु कङ्कणेन,विभातिकाय:करुणाकुलानाम् परोपकारेण न चन्दनेन।

**अन्वय:-** करुणाकुलानां श्रोत्रं श्रुतेन विभाति कुण्डलेन न, पाणि: दानेन (विभाति) कङ्कणेन न, काय: परोपकारेण (विभाति) चन्दनेन न।

**व्याख्या-** करुणाकुलानाम्=दयार्द्रभूतानाम् (दयालूनां सत्पुरुषाणाम्), श्रोत्रम्=कर्ण:, श्रुतेन=वेदादि-शास्त्रश्रवणेन, विभाति=सुशोभते, कुण्डलेन=कर्णाभूषणेन, न=नहि, पाणि:=हस्त:(कर:) दानेन=सत्पात्रेभ्य: प्रदानेन(विभाति=शोभते), कङ्कणेन=सुवर्णवलयेन, न=नहि, (विभाति=शोभते) काय:=वपु:(शरीरम्), परोपकारेण=परेषां हितसाधनेन (विभाति),चन्दनेन=चन्दनादिलेपनेन, न=नहि(विभाति)।

**भावार्थ:-** इह लोके महापुरुषाणां कृते शास्त्रपुराणश्रवणदानपरोपकारादयो: गुणा: आभूषणतुल्या: सन्ति एते गुणा: एव तेषां सौन्दर्यमेधन्ते न तु कृत्रिमा कुण्डलकनकवलयवचन्दनादय: पदार्था: इति ज्ञेयम्।

**व्याकरणात्मकटिप्पणी-** श्रोत्रम्=श्रु+ष्ट्रन्(त्र)+सु (अम्)(प्र.वि.ए.व.)। श्रुतेन=श्रु+क्त(त)+टा(इन) (तृ.वि.ए.व.)। विभाति= वि+भा+लट्+तिप्(प्र.पु.ए.व.)। काय:=चीयते अस्मिन् अस्थ्यादिकम् इति काय:, चि+घञ्(अ)+सु(प्र.वि.ए.व.)। करुणाकुलानाम्= करुणया आकुला इति करुणाकुला: (तृ.त.) तेषाम् करुणाकुलानाम् (ष.वि.ब.व.)। परोपकारेण=पर+उपकार+टा(इन)-गुणसन्धि:(तृ.वि.ए.व.)।

**छन्द:-** अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्ग:-** इह लोके प्राणिनं पिण्डेन मुखं प्रपूर्य वशीकर्तुं शक्यते इति प्रतिपादयन् कवि: कथयति यत्-

**को न याति वशं लोके मुखे पिण्डेन पूरित:।**
**मृदङ्गो मुखलेपेन करोति मधुरध्वनिम्।।१४।।**

**पदच्छेद:-** क: न याति वशं लोके मुखे पिण्डेन पूरित:, मृदङ्ग: मुखलेपेन करोति मधुरध्वनिम्।

**अन्वय:-** लोके मुखे पिण्डेन पूरित: क: वशं न याति? मृदङ्ग: मुखलेपेन मधुरध्वनिं करोति।

**व्याख्या-** लोके=संसारे(जगति) मुखे=वदने(आनने), पिण्डेन=मिष्टान्नादिमधुरपदार्थेन, पूरित:=भरित: (सम्भृत:), क:=कश्चित् जन:, वशम्=अधीनताम्(स्वायत्तताम्) न=नहि, याति=गच्छति, मृदङ्ग:=मुरज: मुखलेपेन=वदने लेपकरणेन, मधुरध्वनिम्=मधुरशब्दम्, करोति=विदधाति।

**भावार्थ:-** येन प्रकारेण मृदङ्गस्य मुखे लेपनादिकरणेन तस्य ध्वनि: अतीव मधुरो भवति, तेनैव प्रकारेण मिष्टान्नादिपदार्थानां भोजनेन मनुष्य: प्रसन्न: अनुकूलश्च जायते। अत: सर्वै: जनै: सर्वत्र सर्वान् जनान् अनुकूलयितुं शास्त्राविधिना प्रयास: विधेय:।

**व्याकरणात्मकटिप्पणी–** याति=या+लट्+तिप् (प्र.पु.ए.व.)। पूरितः=पृ+क्त+सु–(क्रियापदम्) मुखलेपेन=मुखेल`खः–मुखलेपः( स.त.)त`नम्‌ खलेपेन ।क रोति–कृ+लट्+तिप्( प्र.पु.ए.व.)म धुरध्वनिम्=मधुरः ध्वनिः–मधुरध्वनिः (कर्मधा.)तम् मधुरध्वनिम्।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' इति नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– लोके सर्वेषामाभूषणं शीलमस्तीति वर्णयन् कविः कथयति यत्–

**वचो हि सत्यं परमं विभूषणं,**
**लज्जाङ्गनायाः कृशता कटौ च।**
**द्विजस्य विद्यैव पुनस्तथा क्षमा,**
**शीलं हि सर्वस्य नरस्य भूषणम्।।१५।।**

**पदच्छेदः**– वचः हि सत्यम् परमम् विभूषणम्, लज्जा अङ्गनायाः कृशता कटौ च, द्विजस्य विद्या एव पुनः तथा क्षमा शीलम् हि सर्वस्य नरस्य भूषणम्।।

**अन्वयः**– सत्यं वचः हि परमं विभूषणम् (अस्ति), लज्जा अङ्गनायाः, कृशता कटौ च, विद्या तथा क्षमा एव पुनः द्विजस्य, शीलं हि सर्वस्य नरस्य भूषणम् (अस्ति)।

**व्याख्या–** सत्यम्=यथार्थम्, वचः=वचनम्(वाक्), हि=निश्चयेन, परमम्=महत्, विभूषणम्=आभूषणम् (अलङ्कारः)(अस्ति), लज्जा=त्रपा,(ह्री), अङ्गनायाः=नार्याः (वनितायाः),(आभूषणम्), कृशता=क्षीणता (अल्पता), कटौ=मध्यभागे (आभूषणम्), विद्या=वेदादिशास्त्राणां ज्ञानम्, तथा=च (एवम्), क्षमा=सहनशीलता, एव=नूनम्, पुनः=भूयः, द्विजस्य=ब्राह्मण स्य (आभूषण म्), शीलम्=सदाचारः (चरित्रम्), हि=निश्चयेन, सर्वस्य=अखिलस्य, नरस्य=जनस्य (मानवस्य), भूषणम्=आभूषणम् (अस्ति)।

**भावार्थः**– अस्मिन् संसारे बहूनि आभूषणानि सन्ति। कानिचित् स्त्रीणां कृते कानिचित् केवलं पुरुषाणां कृते सन्ति। इत्थमेव कतिचिद् आभूषणानि सुधीभ्यः अन्यानि च अन्येषां कृते सन्ति। ईदृशं किमपि आभूषणं नास्ति यत् सर्वसामान्यं स्यात्। केवलं शीलमेव ईदृशमाभूषणमस्ति यत् सर्वेषामपि समानरूपेण शोभां वर्धयति। अतः सर्वैः सर्वदा सदाचारः आश्रयणीयः।

**व्याकरणात्मकटिप्पणी–** वचः=वचस्+सु (प्र.वि.ए.व.)। विभूषणम्=वि+भूष्+ल्युट् (यु=अन) (प्र.वि.ए.व.)। लज्जा=लज्ज्+अङ्+टाप्+सु(प्र.वि.ए.व.)। अङ्गनायाः=प्रशस्तानि अङ्गानि यस्याः सा अङ्गना (ब.स.) (अङ्ग+न+टाप्) तस्याः (ष.वि.ए.व.)। कृशता=कृशस्य भावः कृशता– कृश+तल्+ टाप्+सु(प्र.वि.ए.व.)। विद्यैव=विद्या+एव (वृद्धि–सं.)। पुनस्तथा= पुनः+तथा (विसर्गसन्धिः)। नरस्य=नर+ङस् (स्य) (ष.वि.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

## अभ्यास–प्रश्नाः

**बहुविकल्पात्मकप्रश्नाः–**

**(क) अधोलिखितानां प्रश्नानाम् उत्तराणि सङ्केताक्षरमाध्यमेन कोष्ठके लेखनीयानि–**

१. सर्वे गुणाः किम् आश्रयन्ते–
(क) वैदुष्यम् (ख) बलम्
(ग) काञ्चनम् (घ) सम्मानम् ( )

२. कीदृशी भूमिः नानाफलं फलति–

(क) विद्युल्लतेव (ख) कल्पलतेव

(ग) जीवनलतेव (घ) विद्यालतेव ( )

३. कीदृश: सेवाधर्म: योगिनामप्यगम्य:

(क) परमरमणीय: (ख) परमभयावह:

(ग) स्थूलतम: (घ) परमगहन: ( )

४. केषां मैत्री छायेव भवति?

(क) गोव्याघ्राणाम् (ख) गुरुशिष्याणाम्

(ग) खलसज्जनानाम् (घ) धीवरमत्स्यानाम् ( )

५. जगति एतत्त्रयं के लभन्ते?

(क) पुण्यकृत: (ख) भयभीता:

(ग) पापकृत: (घ) अर्थकृत: ( )

**( ख ) अतिलघूत्तरात्मका: प्रश्ना: –**

(क) मनस्विन: द्वयी वृत्ति: कस्य इव भवति?

(ख) यस्य समीपे वित्तमस्ति स नर: कीदृश: मन्यते?

(ग) सेवक: यदि प्रवचनपटु: भवति तदा तं किं कथ्यते?

(घ) महात्मनां कुत्र धैर्यं कुत्र च क्षमा प्रकृतिसिद्धं तिष्ठति?

(ङ) पुत्रं पितरं कै: प्रीणयेत्?

**( ग ) लघूत्तरात्मका: प्रश्ना: –**

(क) कवि राजानमुद्दिश्य क्षितिधेनुं दोहनार्थं किमर्थं कथयति?

(ख) 'दिनस्य पूर्वार्धपरार्धभिन्ना' इत्यस्य क: अभिप्राय:?

(ग) महात्मनां प्रकृतिसिद्धं किं-किं प्रोक्तम्?

(घ) 'एतत्त्रयं जगति पुण्यकृत: लभन्ते' इत्यत्र त्रयमित्यनेन किमभिप्रेतम्?

(ङ) पुरुषस्य कानि-कानि न फलन्ति?

(च) आलस्य-उद्यमयो: तुलना कवि काभ्याम् अकरोत्?

**( घ ) सामान्यज्ञानप्रश्ना: –**

**१. निम्नलिखितपद्यानां संस्कृते व्याख्या कार्या –**

(क) यस्यास्ति वित्तं...................... काञ्चनमाश्रयन्ते।

(ख) आरम्भगुर्वी......................खलसज्जनानाम्।

(ग) क्वचित् पृथ्वीशय्य:......................दु:खं न च सुखम्।

(घ) गजभुजङ्गविहङ्गम......................इति मे मति:।

(ङ) वाचो हि सत्यं परमं......................परस्य भूषणम्।

**२. निम्नाङ्कितपद्यानां संस्कृते भावार्थ: लेखनीय: –**

(क) कुसुमस्तबकस्येव......................वन एव वा।

(ख) राजन्! दुधुक्षसि......................कल्पलतेव भूमि:।

(ग) विपदि धैर्यम्......................हि महात्मनाम्।

(घ) य: प्रीणयेत्......................पुण्यकृतो लभन्ते।

(ङ) श्रोत्रं श्रुतेनैव......................न चन्दनेन।

**३. निम्नाङ्कितपद्यानाम् अन्वयः कार्यः –**

(क) मौनान्मूकः......................योगिनामप्यगम्यः।

(ख) सम्पत्सु महताम्......................संघातकर्कशम्।

(ग) नैवाकृतिः फलति......................यथैव वृक्षाः।

**(ङ) व्याकरणज्ञानविषयकाः प्रश्नाः –**

**१. निम्नाङ्कितपदानां सन्धिविच्छेदः कार्यः –**

(क) वृत्तिर्मनस्विनः......................।

(ख) तस्मिंश्च......................।

(ग) दूरतोऽप्यप्रगल्भः......................।

(घ) तन्मित्रमापदि......................।

(ङ) क्वचिच्छाकाहारः......................।

(च) नास्त्युद्यमसमः......................।

**२. निम्नाङ्कितपदानां सन्धिः कार्यः –**

(क) सम्यक्+अनिशम्......................।

(ख) भीरुः+यदि......................।

(ग) छाया+इव......................।

(घ) च+अभिरतिः+व्यसनम्......................।

(ङ) श्रुतेन+एव......................।

(च) पुनः+तथा......................।

**३. निम्नाङ्कितपदानां समासविग्रहः कार्यः –**

(क) कुसुमस्तवकस्य......................।

(ख) क्षितिधेनुम्......................।

(ग) प्रवचनपटुः......................।

(घ) दिव्याम्बरधरः......................।

(ङ) शशिदिवाकरयोः......................।

(च) महारिपुः......................।

**४. अधोलिखितानां पदानां समासः कार्यः –**

(क) आरम्भे गुर्वी = ......................।

(ख) महान् आत्मा येषां ते = ......................।

(ग) समा क्रिया यस्य तत् = ......................।

(घ) पृथ्वी एव शय्या यस्य सः = ......................।

(ङ) करुणया आकुलाः तेषाम् = ......................।

(च) मुखे लेपः, तेन = ......................।

**५. निम्नलिखितक्रियापदेषु धातु-लकार-पुरुष-वचनानि निर्दिशत –**

(क) शीर्यते ......................।

(ख) आश्रयन्ते ......................।

(ग) दुधुक्षसि ......................।

(घ) भवेत् ......................।

(ङ) प्रीणयेत् ......................।

(च) अवसीदति ......................।

**६. अधोलिखितपदेषु मूलशब्दं, लिङ्गं, विभक्तिं, वचनं च निर्दिशत–**

(क) मनस्विनः = ......................।

(ख) योगिनाम् = ......................।

(ग) वाक्पटुता = ......................।

(घ) सम्पत्सु = ......................।

(ङ) मतिमताम् = ......................।

(च) परोपकारेण = ......................।

**७. मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्' इत्यत्रोक्तं दुःखसुखं परिगणयत।**

**८. पाठेऽस्मिन् समागतान् क्रियाशब्दान् सङ्गृह्य लिखत।**

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

१. ग २. ख ३. घ ४. ग ५. क

# तृतीयः पाठः

# रामो द्विर्नाभिभाषते

**लेखकपरिचयः–** लौकिकसंस्कृतसाहित्यस्य प्रादुर्भावः महर्षिवाल्मीकिविरचित-रामायणमहाकाव्याद् मन्यते, एतदर्थं महर्षिः वाल्मीकिः आदिकविः मन्यते। एतद्विरचितं महाकाव्यम् अस्य भूतलस्य प्रथमं महाकाव्यमस्ति। अस्मिन् महाकाव्ये चतुर्विंशतिसहस्रश्लोकाः सन्ति। गायत्रीमन्त्रस्थितान् चतुर्विंशतिः वर्णान् आदाय अस्य रचना सञ्जाता। अस्य एकमेकमक्षरं महापातकनाशनाय अलमस्ति। उक्तञ्च–'**एकैकमक्षरं पुंसां महापातकनाशनम्**' इति।

वाल्मीकिरामायणे अध्यात्मरामायणे च महर्षिः वाल्मीकिः प्रचेतसः पुत्रः आसीदिति प्रमाणमुपलभ्यते। यथा– '**प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन!**'इ ति ।स् कन्दपुराणस्यव ैशाखमाहात्म्येअ मुंज न्मान्तरस्य० याधमित्युक्तम्। व्याधजन्मनि ॠषेः शङ्खस्य सत्सङ्गेन 'राम-राम' इति सङ्कीर्तनस्य प्रभावेण एषः अन्यस्मिन् जन्मनि रत्नाकरः अभूत्। तत्र व्याधानां सङ्गमेन व्याधकर्मणि संलग्नः अभवत्। पुनः सप्तर्षीणां सङ्गत्या 'मरा मरा' इति रामस्य विपरीतनामसङ्कीर्तनेन शरीरे पिपीलिकाभिः मृत्तिकाया आरोहणेन च 'वाल्मीकि' इति नाम्ना प्रसिद्धोऽभवत्। अनेन विरचिते वाल्मीकिरामायणे रामस्य कथा वर्णिताऽस्ति। यदा अस्मिन् काव्यत्वशक्तिः प्रादूर्भूता तदा स्वयं चतुर्मुखः ब्रह्मा तत्र समागत्य रामकथालेखनार्थमेनमादिष्टवान्। महर्षिः नारदः अस्य पुरतः श्रीरामस्यादर्शगुणानामुल्लेखमकरोत्। तत्रोक्तं यत् श्रीरामे सत्यसन्धता-सज्जनप्रियता-लोभशून्यता- प्रजापालकता-आज्ञाकारिता-लोकहितैषितादिभिः गुणैः मण्डितः वर्तते ।र ामायणेवि विधमानवीयगुणानांम नोभावस्यउ दात्तरूपंस माविष्टंव र्तते ।अ स्मिन्म हाकाव्येछ न्दोविधानस्य अलङ्कारचमत्कारस्य, भाषासौष्ठवस्य, रसपरिपाकस्य च अद्वितीयः समावेशः वर्तते।

**पाठपरिचयः–** अयं पाठः वाल्मीकिरामायणस्य अयोध्याकाण्डस्य अष्टादशसर्गतःसङ्गृहीतोऽस्ति। अस्मिन् पाठे रामकैकेय्योर्मध्ये जातस्य वार्तालापस्य वर्णनं वर्तते। नृपः दशरथः यदा देवासुरसंग्रामे युद्धमकरोत् तदानीं महाराज्ञी कैकेयी तस्य साहाय्यं कृतवती। तेन प्रहृष्टचेताः महाराजः दशरथः तस्यै वचनद्वयमयच्छत्। रामस्य राज्याभिषेकसमये कैकेयी नृपस्याग्रे पूर्वप्रदत्तवचनस्य पालनार्थं न्यवेदयत्। तस्याः एकस्मिन् वचने रामस्य कृते चतुर्दशवर्षाणि अरण्यनिवासः अपरस्मिन् वचने च युवराजपदे स्वपुत्रस्य भरतस्य राज्याभिषेकः आसीत्। मातुः कैकेय्याः एतद् अभिप्रायं ज्ञात्वा रामः तस्याः पुरतः कथयति यत् अहं भवत्याः आज्ञां नूनं पालयिष्यामि। रामः यद् वदति तदेव आचरति। कदापि **रामो द्विर्नाभिभाषते**। एतद् आकर्ण्य कैकेयी कथयति यत्-त्वं जटाजिनमाधाय चतुर्दश वर्षाणि पर्यन्तम् अरण्यनिवासार्थं गच्छ तव स्थाने भरतस्य राज्याभिषेकः भवतु इति अभिलषामि। रामः पितुः वचनमनुपालयितुं पावकेऽपि पतितुमुद्यतो दृश्यते। रामः पितरि शुश्रूषा तस्या आज्ञापालनं महत्तरं धर्माचरणं मनुते। एवंविधं रामस्य उदात्तभावनायाः मातुः कैकेय्याः कपटपूर्णभावनायाः च अत्र अतीव रमणीयं सामञ्जस्यं विद्यते।

## रामो द्विर्नाभिभाषते

**सन्दर्भः**– प्रस्तुतोऽयं पाठः महर्षिवाल्मीकिविरचितस्य आदिकाव्यस्य अयोध्याकाण्डतः उद्धृतोऽस्ति।

**प्रसङ्गः**– अस्मिन् पद्ये श्रीरामः मातुः कैकेय्याः वचनं संश्रुत्य स्वकीयां पीडां प्रकटयति–

**अहो धिङ् नार्हसे देवि वक्तुं मामीदृशं वचः।**
**अहं हि वचनाद् राज्ञः पतेयमपि पावके।।१।।**

**पदच्छेदः**– अहो धिक् न अर्हसे देवि ! वक्तुम् माम् ईदृशं वचः, अहं हि वचनाद् राज्ञः पतेयम् अपि पावके।

**अन्वयः**– अहो धिक् देवि ! माम् ईदृशं वचः वक्तुं न अर्हसे हि अहं राज्ञः वचनाद् पावके अपि पतेयम्।

**व्याख्या**– अहो=आश्चर्यम्, धिक्=धिक्कारः, देवि != दिव्यगुणयुक्ते ! (मातः), माम्=अमुं जनम्, ईदृशम्=एतादृशं कष्टप्रदम्, वचः=वचनम्, वक्तुम्=कथयितुम्, न=नहि, अर्हसे=योग्याऽसि, हि=यतोहि, अहम्=एष जनः(दाशरथी रामः), राज्ञः=नृपस्य, वचनाद्=कथनाद् पावके अपि=अग्नौ अपि, पतेयम्=भ्रंशेयम् (पतितुं शक्नोमि इतिभावः)

**भावार्थः**– लोकेऽस्मिन् आदर्शपुत्रः प्रायशः दुर्लभः। रामः आत्मानं पितुः आदर्शपुत्रम् अवबोधयितुं मातुः कैकेय्याः अग्रे नृपस्यादेशपालनार्थं पावके स्वकीयं प्राणाहुतिं प्रदातुं तत्परो भवति।

**व्याकरणात्मकटिप्पणी**– अहो=आश्चर्यसूचकमव्ययम्। धिक्=खेदसूचकः शब्दः। वक्तुम्=वच्+तुमुन् (तुम्)। माम्=अस्मद्+अम्( द्वि.वि.ए.व.)। राज्ञः=राजन्+ङस्( ष.वि.ए.व.)। वचनाद्= वच्+ल्युट्( यु=अन) +ङसि (आत्) (पं.वि.ए.व.)। पावके=पू+ण्वुल् (वु=अक)+ङि(स.वि.ए.व.)। पतेयम्=पत्+विधिलिङ्+मिप्(उ.पु.एउ.व.)।

**छन्दः**– अत्र 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये श्रीरामः मातुः कैकेय्याः वचनमाकर्ण्य स्वकीयां पीडां प्रकटयन् कथयति यत्–

> **भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे।**
> **नियुक्तो गुरुणा पित्रा नृपेण च हितेन च।।२।।**

**पदच्छेदः**– भक्षयेयम् विषम् तीक्ष्णम् पतेयम् अपि च अर्णवे नियुक्तः गुरुणा पित्रा नृपेण च हितेन च।

**अन्वयः**– गुरुणा पित्रा नृपेण च हितेन च नियुक्तः (तर्हि) तीक्ष्णं विषं भक्षयेयम् अर्णवे च अपि पतेयम्।

**व्याख्या**–गुरुणा–आचार्येण, पिता=जनकेन, नृपेण=राजा(महाराजेन दशरथेन), च =तथा, हितेन=मित्रेण, च=तथा नियुक्तः=नियोजितः, (तर्हि), तीक्ष्णम्=तीव्रम् (अत्युग्रम्) विषम्=गरलम् (हलाहलम्), भक्षयेयम्= खादेयम् (खादितुं शक्नोमि), अर्णवे=सागरे (समुद्रे) चापि तथापि, पतेयम्=भ्रंशेयम् (पतितुं शक्नोमि)।

**भावार्थः**– 'गुरोराज्ञा गरीयसी' इति वचनं मनसि निधाय मातुः कैकेय्याः, अग्रे तीक्ष्णं गरलं (विषम्), पातुं, सागरे निमज्जितुं च रामः तत्परो दृश्यते। सः गुरोः पितुः, नृपस्य, मित्रस्य च कृते सर्वविधं सुखं प्रदातुं स्वकीयं जीवनमर्पयितुमभिलषति।

**व्याकरणात्मकटिप्पणी**– भक्षयेयम् = भक्ष+णिच्+विधिलिङ्+मिप् (उ.पु.ए.व.)। विषम्=विष्+क (अ)+अम् द्वि.वि.ए.व.)। तीक्ष्णम्=तिज्+क्स्न(दीर्घः)+अम् (द्वि.वि.ए.व.)। पतेयम्=पत्+विधिलिङ्+मिप् (उ.पु.ए.व.)। चार्णवे=च+अर्णवे (दीर्घसन्धिः)। नियुक्तः=नि+युज्+क्त+सु (क्रिया–पदम्)। पिता=पाति रक्षतीति–पा+तृच्(तृ)+टा(आ) (तृ.वि.ए.व.)।हितेन=हित+टा(इन) (गुणः) (तृ.वि.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृतं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये श्रीरामः यद् वदति तत् करोतीति प्रतिपादयन् कविः कथयति यत्–

> **तद् ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम्।**
> **करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते।।३।।**

**पदच्छेदः**– तद् ब्रूहि वचनम् देवि ! राज्ञः यद् अभिकाङ्क्षितम्, करिष्ये प्रतिजाने च रामः द्विः न अभिभाषते।

**अन्वयः**– देवि ! राज्ञः यद् अभिकाङ्क्षितं तद् ब्रूहि करिष्ये (अहं) च प्रतिजाने रामः द्विः न अभिभाषते।

**व्याख्या**– देवि !=भगवति ! (दिव्यगुणयुक्ते !), राज्ञः=नृपस्य, यद्=यद्वस्तु, आकाङ्क्षितम्=अभीष्टम् (मनोऽनुकूलम्) तद्=तद्वचनम्, ब्रूहि=कथय (वद), करिष्ये=आचरिष्यामि, (अहम्), च=तथा, प्रतिजाने=शपामि

(प्रतिज्ञां करोमि), रामः=एषः जनः (दाशरथीरामः), द्विः=द्विधा, न=नहि, भाषते=वदति, (कथयति)।

**भावार्थः**– रामः मातरं प्रति कथयति यद्–मातः। महाराजः दशरथः किमभिलषति? तत् कथय। अहं पितुराज्ञामनुपालयितुं कृतसङ्कल्पोऽस्मि। हे मातः। एष जनः (रामः) यद् वदति तदेव आचरति, तदतिरिच्य कदापि न व्यवहरति अर्थात् 'मम मनसि वचसि च सर्वदा ऐक्यं तिष्ठति' इति।

**व्याकरणात्मकटिप्पणी**– ब्रूहि=ब्रू+लोट्+सिप् (म.पु.ए.व.)। वचनम्=वच्+ल्युट् (यु=अन)+अम्। अभिकाङ्क्षितम् =अभि+काङ्क्ष+इट्+क्त+सु(अम्) (क्रियापदम्)। करिष्ये=कृ+लट्+इट् (उ.पु.ए.व.)। प्रतिजाने प्रति+ज्ञा+लट्+त (उ.पु.ए.व.)। द्विर्नाभिभाषते=द्विः+न+अभिभाषते = (विसर्ग–सं., दीर्घ–सं.)+अभि+ भाष्+लट्+त (प्र.पु. ए.व.)।

**छन्दः**– अत्र 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये माता कैकेयी देवासुरसङ्ग्रामस्य वरप्राप्तिविषयिकीं चर्चां श्रीरामस्य पुरतः करोति–

**पुरा देवासुरे युद्धे पिता ते मम राघव।**
**रक्षितेन वरौ दत्तौ सशल्येन महारणे।।४।।**

**पदच्छेदः**– पुरा देवासुरे युद्धे पिता ते मम राघव, रक्षितेन वरौ दत्तौ सशल्येन महारणे।

**अन्वयः**– (हे) राघव! पुरा देवासुरे युद्धे ते पिता सशल्येन (विद्धः) महारणे (मया) रक्षितेन मम (द्वौ) वरौ दत्तौ।

**व्याख्या**– (हे) राघव! =(हे) दशरथात्मज!, पुरा=प्राचीनकाले, देवासुरे युद्धे=देवानां राक्षसानां च समरे(आहवे), ते=तव (भवतः), पिता=जनकेन, सशल्येन=बाणप्रहारेण आहतेन, महारणे=महासमरे (महति आहवे), रक्षितेन= सुरक्षाप्रदानार्थम्, मम=मह्यम् (कैकेय्यै) (द्वौ) वरौ=वरद्वयम् (उभे वचने), दत्तौ=प्रदत्तम् (प्रदानार्थमुक्तम्)।

**भावार्थः**– महाराजः दशरथः देवासुरसंग्रामे साहाय्यं प्रदातुं मात्रे कैकेय्यै द्वौ वरौ प्रायच्छत् किन्तु सा तदानीं नैव स्वीकृतवती, तद् वरमेव साम्प्रतं प्राप्तुमभिलषति।

**व्याकरणात्मकटिप्पणी**– पुरा=पुर्+का(आ)(अव्य.)। देवासुरे = देव+असुरे (दीर्घसं.)। युद्धे=युध्+क्त (त)+ ङि (स.वि.ए.व.)। ते=युष्मद्+ङस् (तव इत्यस्य स्थाने ते आदेशः) (ष.वि.ए.व.)। राघव=रघोः गोत्रापत्यम्) रघु+अण्=राघव (सम्बो.ए.व.)। रक्षितेन=रक्ष्+क्त(त)+टा(इन) (तृ.वि.ए.व.)। वरौ=वृ+अप्+औ (द्वि.वि.ए.व.)। दत्तौ=दा+क्त(त)+औ (क्रियापदम्)। सशल्येन=शल्येन सहितः सशल्यः, तेन सशल्येन (ब.स.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये माता कैकेयी द्वयोः वरयोः परिगणनं श्रीरामस्य पुरतः करोति–

**तत्र मे याचितो राजा भरतस्याभिषेचनम्।**
**गमनं दण्डकारण्ये तत्र चाद्यैव राघव।।५।।**

**पदच्छेदः**– तत्र मे याचितः राजा भरतस्य अभिषेचनम्, गमनं दण्डकारण्ये तत्र च अद्य एव राघव।

**अन्वयः**– राघव! तत्र मे राजा (प्रथमं) भरतस्य अभिषेचनम्, (द्वितीयं) च तव अद्य एव दण्डकारण्ये गमनं याचितः।

**व्याख्या**– राघव!= हे रघुनन्दन!, तत्र=तस्मिन् (पूर्वोक्तयोः द्वयोः वरयोः मध्ये), मे=मया (कैकेय्या), राजा=नृपः (महाराजः दशरथः) (प्रथमम्=आदौ), भरतस्य=एतदाख्यस्य राजकुमारस्य (मम पुत्रस्य), अभिषेचनम्=युवराजपदे राज्याभिषेचनम्, (द्वितीयं च=तथा चान्यम्), तव=भवतः(कौशल्यापुत्रस्य रामस्य), अद्य=अस्मिन् दिवसे, एव=नूनम्, दण्डकारण्ये='दण्डक' इत्याख्ये वने (एतन्नामके कानने), गमनम्=प्रस्थानम् याचितः=अभ्यर्थितः।

**भावार्थः**- देवासुरसंग्रामे साहाय्यप्रदानार्थं महाराजेन दशरथेन यौ द्वौ वरौ तस्मै प्रदत्तौ, तयोः वरयोः कैकेयी भरतस्य राज्याभिषेकरूपं प्रथमं वरम्, द्वितीयञ्च अस्मिन् दिवसे रामस्य दण्डकारण्यगमनरूपं वरं याचितवती। (अयाचत।)

**व्याकरणात्मकटिप्पणी**– तत्र=तस्मिन् इति-तत्+त्रल्(त्र) (अव्ययशब्दः)। राजा=राज्+कनिन् (अन्)+सु (प्र.वि.ए.व.)। भरतस्याभिषेचनम्=भरतस्य अभिषेचनम् (ष.त.स.) भरतस्य+अभिषेचनम् (दीर्घसन्धिः)। अभिषेचन्=अभि+सिच्+ल्युट् (यु=अन)+सु(अम्) (प्र.वि.ए.व.)। अद्य=अद्+यत् (य) (अव्य.)। दण्डकारण्ये= दण्डकस्य अरण्यमिति दण्डकारण्यम् (ष.त.स.)। दण्डक+अरण्ये= दण्डकारण्ये (दीर्घसन्धिः)। गमनम्=गम्+ल्युट्(यु=अन)+सु (प्र.वि.ए.व.)। याचितः=याच्+क्त (इडागमः)+सु (क्रियापदम्)।

**छन्दः**- अत्र 'अनुष्टुप्' इति नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- अस्मिन् पद्ये महाराजं दशरथं श्रीरामं च धन्यधन्यं कर्तुं कैकेयी श्रीरामम् आदिशति यत्-

**यदि सत्यप्रतिज्ञं त्वं पितरं कर्तुमिच्छसि।**
**आत्मानं च नरश्रेष्ठ मम वाक्यमिदं शृणु।।६।।**

**पदच्छेदः**-यदि सत्यप्रतिज्ञम् त्वम् पितरम् कर्तुम् इच्छसि, आत्मानम् च नरश्रेष्ठ मम वाक्यम् इदं शृणु।

**अन्वयः**- नरश्रेष्ठ! यदि त्वं पितरम् आत्मानं सत्यप्रतिज्ञं च कर्तुम् इच्छसि (तर्हि) मम इदं वाक्यं शृणु।

**व्याख्या**- नरश्रेष्ठ!=(नराणां नरेषु वा श्रेष्ठ) नरोत्तम!, यदि=चेत्, त्वम्=भवान् (रामः), पितरम्=जनकम्, आत्मानम्=स्वयम्, च=तथा, सत्यप्रतिज्ञम्=यथार्थवक्तारम्, कर्तुम्=विधातुम् (सम्पादयितुम्), इच्छसि=अभिलषसि (तर्हि) मम=कैकेय्याः (भरतमातुः), इदम्=एतत्, वाक्यम्=कथनम्, शृणु=आकर्णय।

**भावार्थः**- कैकेयी रामस्याभिमुखं नैकविधं पितुरनुशासनमाचरितुं प्रयतते। सा वदति यत् -हे पुरुषोत्तम। यदि त्वं स्वकीयं जनकम् आत्मानं च सत्यवक्तारं यथार्थप्रतिज्ञं च विधातुमिच्छसि तर्हि इदानीं ममैतद् वचनम् आकर्णय।

**व्याकरणात्मकटिप्पणी**-नरश्रेष्ठ! = नराणां श्रेष्ठः = नरश्रेष्ठः (ष.त.) नर+प्रशस्य+इष्ठन्(इष्ठ) ('प्रशस्य' इत्यस्य स्थाने 'श्र' आदेशः)। पितरम्=पितृ+अम् (द्वि.वि.ए.व.)। आत्मानम्= आत्मन्+अम्-अत्+मनिन् (मन्) (द्वि.वि.ए.व.)। सत्यप्रतिज्ञम्=सते हितं सत्यम्, प्रतिज्ञायते इति प्रतिज्ञः, सत्यस्य प्रतिज्ञः (ष.त.) तम् सत्यप्रतिज्ञम्। कर्तुम्=कृ+तुमुन् (तुम्) (अव्य.)। इच्छसि=इष्+लट्+सिप् (म.पु.ए.व.)। वाक्यम्=वच्+ण्यत् (य)(चस्य कः)+अम् (द्वि.वि.ए.व.)। शृणु=श्रु+लोट्+सिप् (म.पु.ए.व.)।

**छन्दः**- अत्र 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- अस्मिन् पद्ये माता कैकेयी चतुर्दशवर्षाणि यावत् रामं वने निवासार्थमादिशति-

**सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः।**
**अभिषेकमिदं त्यक्त्वा जटाचीरधरो भव।।७।।**

**पदच्छेदः**- सप्त सप्त च वर्षाणि दण्डकारण्यम् आश्रितः, अभिषेकम् इदम् त्यक्त्वा जटाचीरधरः भव।

**अन्वयः**- (त्वम्) इदम् अभिषेकं त्यक्त्वा सप्त सप्त च वर्षाणि दण्डकारण्यम् आश्रितः, जटाचीरधरो भव।

**व्याख्या**- (त्वम्=भवान्), इदम्=एतद् (पुरो दृश्यमानम्) अभिषेकम्=राज्याभिषेकम्, त्यक्त्वा= परित्यज्य(विहाय),स सप्त सप्त=चतुर्दशसंख्याकानि,च =तथा,व र्षाणि=समाः,द ण्डकारण्यम्='दण्डक'इ त्याख्येव ने, आश्रितः=आश्रयणं स्वीकृत्य, जटाचीरधरः - जटावल्कलवस्त्रधारी, भव=स्वीकुरु।

**भावार्थः**- रामस्य राज्याभिषेकसमये कैकेयी रामं सम्बोध्य कथयति यत् त्वं महाराजस्य दशरथस्य आज्ञानुसारम् एतद् राज्याभिषेकं विहाय 'दण्डक' इति नामके वने चतुर्दश वर्षाणि वनौकसामिव स्वरूपं गृहीत्वा जीवनं यापय।

**व्याकरणात्मकटिप्पणी-** अभिषेकम्=अभि+सिच्+घञ्(अ)+अम्(द्वि.वि.ए.व.)। त्यक्त्वा=त्यज्+क्त्वा(त्वा) (जस्य कुत्वम्)(अव्य.)। सप्त=सप्+तनिन्(तन्)+जस्(प्र.वि.ब.व.)। वर्षाणि=वृष्+घञ्(भावे)+जस्(प्र.वि.ब.व.)। दण्डकारण्यम्=दण्डक+अरण्यम्(दीर्घसन्धिः)। आश्रितः=आ(आङ्)+श्रि+क्त(त)+सु(प्र.वि.ए.व.)। जटाचीरधरः=जटा च चीरं च=जटाचीरे, (द्व.स.), धरतीति धरः, जटाचीरयोः धरः इति जटाचीरधरः (ष.त.)। भव=भू+लोट्+सिप्(म.पु.ए.व.)।

**छन्दः-** अत्र 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः-** अस्मिन् पद्ये कोसलपुरस्य आधिपत्यं भरतः स्वीकुर्यादिति कैकेयी कामयते इति वर्णयन् कविः कथयति यत्-

**भरतः कोसलपतेः प्रशास्तु वसुधामिमाम्।**
**नानारत्नसमाकीर्णां सवाजिरथसङ्कुलाम्।।८।।**

**पदच्छेदः-** भरतः कोसलपतेः प्रशास्तु, वसुधाम् इमाम्, नानारत्नसमाकीर्णाम् सवाजिरथसंकुलाम्।

**अन्वयः-** भरतः कोसलपतेः नानारत्नसमाकीर्णां सवाजिरथसंकुलाम् इमां वसुधां प्रशास्तु।

**व्याख्या-** भरतः=कैकेय्याः पुत्रः, कोसलपतेः=कोसलनामधेयस्य नृपस्य नानारत्नसमाकीर्णाम्=विविधरत्नाभूषणपरिपूर्णाम्, सवाजिरथसंकुलाम्=अश्वस्यन्दनादिसमूहयुक्ताम् इमाम्=पुरो दृश्यमानाम्, वसुधाम्=पृथिवीम्(धरणीम्)। प्रशास्तु=शासनं कुर्यात्।

**भावार्थः-** अत्र राजकुमारस्य भरतस्य जननी कैकेयी विविधरत्नाभूषणसंयुक्तस्य गजतुरंगरथादिपरिपूर्णस्य राज्यस्य शासनं(राज्यं) मम पुत्रस्य अधीनं स्यादिति कथयति।

**व्याकरणात्मकटिप्पणी-** भरतः=भरं तनोति-भर+तन्+ड(अ)+सु(प्र.वि.ए.व.)। कोसलपतेः= कोसलानां पतिः-कोसलपतिः(ष.त.) तस्य कोसलपतेः (ष.वि.ए.व.)। वसुधाम्=वसूनि(रत्नानि) धारयतीति वसुधा-(उप.स.) ताम् (द्वि.वि.ए.व.)। नानारत्नसमाकीर्णम्=नानारत्नैः समाकीर्णं नानारत्नसमाकीर्णम् (तृ.त.) ताम्। सवाजिरथसंकुलाम्=वाजिरथैः सहितः सवाजिरथः, तैः संकुला सवाजिरथसंकुला(तृ.त.)-ताम् सवाजिरथसंकुलाम्। प्रशास्तु=प्र+शास्+लोट्+तिप्(प्र.पु.ए.व.)।

**छन्दः-** अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः-** अस्मिन् पद्ये मातुः कैकेय्याः कष्टप्रदं वचनं निशम्य श्रीरामः उद्विग्नः नाभवदिति वर्णयन् कविः कथयति यत्-

**तदप्रियममित्रघ्नो वचनं मरणोपमम्।**
**श्रुत्वा न विव्यथे रामः कैकेयीं चेदमब्रवीत्।।९।।**

**पदच्छेदः-** तद् अप्रियम् अमित्रघ्नः वचनं मरणोपमम् श्रुत्वा न विव्यथे रामः कैकेयीम् च इदम् अब्रवीत्।

**अन्वयः-** तद् अप्रियं मरणोपमं वचनं श्रुत्वा अमित्रघ्नः रामः न विव्यथे (सः) कैकेयीं च इदम् अब्रवीत्।

**व्याख्या-** तद्=अदः, अप्रियम्=अशोभनीयम् (अरुचिरम्), मरणोपमम्=निधनसदृशम् (मृत्युतुल्यम्), वचनम्=वाणीम् (गाम्), श्रुत्वा=आकर्ण्य (निशम्य), अमित्रघ्नः=रिपुसूदनः, रामः=दशरथनन्दनः (कौशल्यापुत्रः), न=नहि, विव्यथे=उद्विग्नोऽभवत्, (सः=रामः), कैकेयीम्=भरतमातरम्, च=तथा, इदम्=एतद्, अब्रवीत्=अकथयत्।

**भावार्थः-** मातुः कैकेय्याः मुखनिर्गतम् अरुचिरं मृत्युतुल्यमिव स्वकीयं वनगमनवृत्तान्तम्, भरतस्य च युवराजपदे अभिषेकमाकर्ण्य शत्रुहन्ता रामः स्वल्पमात्रमपि दुःखितो नाभवत्।

**व्याकरणात्मकटिप्पणी-** अप्रियम्=प्रीणातीति प्रियः न प्रियः अप्रियः, (नञ् तत्पु.) तम्।

मरणोपमम्=मरणेन उपमम्-मरणोपमम्(तृ.त.)।वचनम्=वच्+ल्युट्(यु=अन)+अम्(द्वि.वि.ए.व.)।श्रुत्वा=श्रु+क्त्वा (त्वा)(अव्य.)। अमित्रघ्नः=न मित्रम् अमित्रः तं हन्तीति-अमित्रघ्नः (नञ्-स.)। विव्यथे=व्यथ्+ लिट्+त(प्र.पु.ए.व.)।कैकेयीम्=कैकेयस्य अपत्यं स्त्री-कैकेय+अण्+ङीप्+अम्(द्वि.वि.ए.व.)।अब्रवीत्=ब्रू+लङ्+ तिप्(प्र.पु.ए.व.)।

**छन्दः** – अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये वल्कलवस्त्रं धारयित्वा वनगमनार्थं रामः अभिलषतीति वर्णयन् कविः कथयति यत्–

**एवमस्तु गमिष्यामि वनं वस्तुमहं त्वितः।**
**जटाचीरधरो राज्ञः प्रतिज्ञामनुपालयन्।।१०।।**

**पदच्छेदः**– एवम् अस्तु गमिष्यामि वनम् वस्तुम् अहम् तु इतः, जटाचीरधरः राज्ञः प्रतिज्ञाम् अनुपालयन्।

**अन्वयः**– (हे मातः) एवमस्तु अहं राज्ञः प्रतिज्ञामनुपालयन् जटाचीरधरः वनं वस्तुं तु इतः गमिष्यामि।

**व्याख्या**– (हे मातः= हे जननि), एवमस्तु=इत्थं भूयात्, अहम्=दशरथनन्दनः रामः, राज्ञः=नृपस्य, (महाराजस्य दशरथस्य) प्रतिज्ञाम्=सङ्कल्पम्(दृढोक्तिम्), अनुपालयन्=प्रतिपालनं कुर्वन् (अङ्गीकुर्वन्), जटाचीरधरः=जटाजूटवल्कलवेषधारी, वनम्=काननम्(अरण्यम्) वस्तुम्=निवासार्थम्, तु, इतः=अस्मात् राजप्रासादात्, गमिष्यामि=गमनं करिष्यामि, (प्रस्थास्ये)।

**भावार्थः**– अये मातः। तवाभिलाषानुरूपमहं महाराजस्य दशरथस्य दृढं सङ्कल्पमङ्गीकुर्वन् जटाजूटं वल्कलवस्त्रं चाधाय वनं निवसितुम् अस्मात् राजभवनात् नूनं गमिष्यामि। अत्र रामस्य वनगमनेन नृपस्य प्रतिज्ञापूर्तिः, मातुश्च अभिलाषापूर्तिः भविष्यतः।एकेन कार्येण कार्यद्वयमत्र सिध्यति।

**व्याकरणात्मकटिप्पणी**– एवमस्तु=एवम्+अस्तु (कल्याण ार्थे एतद्वचनम्)। राज्ञः=राजन्+ङस् (ष.वि.ए.व.)। प्रतिज्ञाम्=प्रति+ज्ञा+अङ्+टाप् (आ)+अम्(द्वि.वि.ए.व.)। अनुपालयन्=अनु+पाल्+णिच्(इ)+ शतृ(अत्)+सु (प्र.वि.ए.व.)जटाचीरधरः=जटाचीरं धरतीति जटाचीरधरः (उपपद.स.) (प्र.वि.ए.व.)। वस्तुम्=वस्+तुमुन्(तुम्) (अव्य.)।इतः=इदम्+तसिल्(तस्)(अव्य.)।गमिष्यामि=गम्+लृट्+मिप्(उ.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये श्रीरामः मातुः वचनं मत्वा भरताय सर्वस्वं प्रदातुमिच्छतीति वर्णयन् कविः कथयति यत्–

**अहं हि सीतां राज्यं च प्राणानिष्टान् धनानि च।**
**हृष्टो भ्रात्रे स्वयं दद्यां भरतायाप्रचोदितः।।११।।**

**पदच्छेदः**– अहम् हि सीताम् च राज्यम् च प्राणान् इष्टान् धनानि च, हृष्टः भ्रात्रे स्वयम् दद्याम् भरताय आ प्रचोदितः।

**अन्वयः**– अहं (त्वया) आप्रचोदितः हि भ्रात्रे भरताय राज्यम्, सीताम्, इष्टान् प्राणान्, धनानि च दृष्टः स्वयं दद्याम्।

**व्याख्याः**– अहम्=दशरथनन्दनः रामः, (त्वया=मात्रा कैकेय्या) आ प्रचोदितः= आदिष्टः (आज्ञापितः), हि=निश्चयेन, भ्रात्रे=अनुजाय, भरताय=एतन्नामधेयाय भवत्याः पुत्राय, राज्यम्=अस्य देशस्य धनसम्पत्तिम्, सीताम्=एतदाख्यां स्वकीयां भार्याम्, इष्टान् प्राणान्=प्रियान् असून्, धनानि=धनादिवैभवानि, च=तथा, हृष्टः=प्रसन्नः (सन्) स्वयम्=स्वयमेव(स्वेच्छया) दद्याम्=प्रयच्छेयम्।

**भावार्थः**– मर्यादापुरुषोत्तमः रामः मातुः कथनमात्रेणैव प्रसन्नतया अनुजाय भरताय कोसलदेशस्य आधिपत्यम्, स्वकीयां भार्याम्, प्रियान् असून्, वैभवादीनि अपि प्रदानार्थमभिलषति। अत्र अनुजस्य कृते श्रीरामस्य सर्वविधसमर्पणभावस्य अभिव्यक्तिः जायते।

**व्याकरणात्मकटिप्पणी**– भ्रात्रे=भ्राज्+तृच्+ङे (ए) (च.वि.ए.व.)। भरताय–भरत+ङे (य) (च.वि.ए.व.)। राज्यम्=राज्ञः भावः कर्म वा (राजन्+यत्)(द्वि.वि.ए.व.)। सीताम्=सीता+अम् (द्वि.वि.ए.व.)। इष्टान्=इष्ट+क्त(त)+शस्(द्वि.वि.ब.व.)। प्राणान्=प्र+अन्+अच्, घञ् वा+शस् (द्वि.वि.ब.व.)। धनानि= धन्+अच्+शस् (द्वि.वि.ब.व.)। हृष्टः=हृष्+क्त(त)+सु (क्रियापदम्)। दद्याम्=दा+विधिलिङ्+मिप् (उ.पु.ए.व.)। प्रचोदितः=प्र+चुद्+णिच्+क्त+सु (प्र.वि.ए.व.)।

**छन्दः**– अत्र 'अनुष्टुप्' नामधेयं छन्दः वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये ऋषीणामिव स्वयं श्रीरामोऽपि आत्मानं धर्मपारायणं मनुते इति वर्णयन् कविः कथयति यत्–

**नाहमर्थपरो देवि! लोकमावस्तुमुत्सहे।**
**विद्धि मामृषिभिस्तुल्यं विमलं धर्ममास्थितम्।।१२।।**

**पदच्छेदः**– न अहम् अर्थपरः देवि! लोकम् आवस्तुम् उत्सहे, विद्धि माम् ऋषिभिः तुल्यम् विमलम् धर्मम् आस्थितम्।

**अन्वयः**– देवि! अहम् अर्थपरः (भूत्वा) लोकम् आवस्तुं न उत्सहे, मां (अहमपि) ऋषिभिः तुल्यं विमलं धर्मम् आस्थितं विद्धि।

**व्याख्या**– देवि!=हे भगवति!, अहम्=एष रामः, अर्थपरः=धनलोलुपः (स्वार्थपरायणः), (भूत्वा=सम्भूय), लोकम्=जगत्, आवस्तुम् निवासं कर्तुम्, (निवासार्थम्), उत्सहे=अभिलषामि (कामये), माम्=अमुं जनम् (दशरथनन्दनम्) (अहमपि=एष जनोऽपि), ऋषिभिः=मुनिभिः, (मन्त्रद्रष्टृभिः), तुल्यम् सदृशम् (समम्), विमलम्=निर्मलम् (पवित्रम्, मलरहितम्), धर्मम्=कर्तव्यकर्म (आचारपालनम्), आस्थितम्=विद्यमानम्, विद्धि=जानीहि।

**भावार्थः**– मर्यादापुरुषोत्तमः रामः धनोपासको भूत्वा इहलोके जीवनं यापयितुं नेच्छति। सः मुनिभिरिव निर्मलं धर्ममाचरितुं नियमं स्वीकृत्य एव सर्वत्र व्यवहरति। एतत्तु सत्यमस्ति, अस्मिन् विषये नास्ति सन्देहः।

**व्याकरणात्मकटिप्पणी**– अर्थपरः=अर्थेभ्यः पर इति अर्थपरः (च.त.स.)। लोकम्=लोक्यतेऽसौ लोकः तम्, लोक्+घञ् (अ)+अम्(द्वि.वि.ए.व.)। आवस्तुम्=आङ्+वस्+तुमुन्(तुम्)(अव्य.)। उत्सहे=उत्+सह्+लट्+ इट्(उ.पु.ए.व.)। विद्धि=विद्+लोट्+सिप्(म.पु.ए.व.)। ऋषिभिः=ऋष्+इन्+भिस् (तृ.वि.ब.व.)। तुल्यम्=तुलया सम्मितम्(तुला+यत्)। विमलम्=विगतः मलः यस्मात् सः (बहु.स.) तम् विमलम्। आस्थितम्=आङ्+स्था+ क्त(त)(कर्म. क्रियापदम्)।

**छन्दः**– अस्मिन् पद्ये 'अनुष्टुप्' नामधेयं छन्दः वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये पितुः शुश्रूषा आज्ञापालनं वा सर्वोत्तमं धर्माचरणं वर्तते इति प्रतिपादयन् कविः कथयति यत्–

**न ह्यतो धर्माचरणं किञ्चिदस्ति महत्तरम्।**
**यथा पितरि शुश्रूषा तस्य वा वचनक्रिया।।१३।।**

**पदच्छेदः**–न हि अतः धर्माचरणम् किञ्चिद् अस्ति महत्तरम्, यथा पितरि शुश्रूषा तस्य वा वचनक्रिया।

**अन्वयः**– पितरि शुश्रूषा तस्य वचनक्रिया वा यथा धर्माचरणम् (अस्ति) अतः महत्तरं किञ्चिद्(धर्माचरणम्) न हि अस्ति।

**व्याख्या**– पितरि=जनके, शुश्रूषा=परिचर्या (कर्तव्यपरायणता) तस्य=पितुः, वचनक्रिया=आज्ञापालनम्, वा=अथवा, यथा=येन प्रकारेण(यथाविधम्), धर्माचरणम्=कर्तव्यकर्मणः पालनम्, (अस्ति=वर्तते), अतः= एतस्मात्,

महत्तरम्=अतिरिच्य श्रेष्ठम्, किञ्चित्=किमपि (धर्माचरणम्) न=नहि, हि=नूनम्, अस्ति=वर्तते।

**भावार्थः**– इहलोके नैकविधं धर्मस्य स्वरूपं विद्यते। रघुनन्दनः रामः पितरि शुश्रूषां, तस्य आज्ञापालनमेव श्रेष्ठं धर्मं मन्यते, एतस्मात् महत्तरं धर्माचरणं किञ्चिदपि नास्ति। अतः पितृभिः सह सम्यग् व्यवहरणीयम्, तेषामाज्ञापालनमपि नूनमेव करणीयम्।

**व्याकरणात्मकटिप्पणी**– पितरि=पितृ+ङि (स.वि.ए.व.)। शुश्रूषा=श्रु+सन्+द्वित्वादि+अ+टाप् (स्त्री.प्र.वि.ए.व.)।व चनक्रिया=वचनस्यि क्रया–वचनक्रिया( ष.त.)।ध र्माचरणम्=धर्मस्यअ ाचरणम्ध र्माचरणम् (ष.त.)। महत्तरम्=मह्+शतृ+तरप्+सु (अम्)(प्र.वि.ए.व.)। किञ्चिद्– किम्+चिद् (अनुस्वारः परसवर्णश्च)। अस्ति=अस्+लट्+तिप् (प्र.पु.ए.व.)।

**छन्दः**– अत्र 'अनुष्टुप्' नामधेयं छन्दः वर्तते।

## अभ्यास–प्रश्नाः

**(क) बहुविकल्पात्मकप्रश्नाः–**

**अधोलिखितानां प्रश्नानाम् उत्तराणि सङ्केताक्षरमाध्यमेन कोष्ठके लेखनीयानि–**

१. राज्ञः वचनाद् रामः कुत्र पतितुं कथयति–

(क) जलाशये (ख) कूपे

(ग) पावके (घ) नद्याम् ( )

२. रामः किं भक्षयितुमिच्छति–

(क) मधुरं फलम् (ख) मधुरं भोजनम्

(ग) कन्दमूलम् (घ) तीक्ष्णं विषम् ( )

३. राजा दशरथः कैकेय्यै केन हेतुना वरद्वयमयच्छत्–

(क) महारणे सशल्येन रक्षितेन (ख) महारणे सत्परामर्शेण

(ग) महारणे असहयोगप्रदानेन (घ) महारणे युद्धरतेन ( )

४. कैकेयी द्वितीयं वरं किम् अयाचत–

(क) युवराजपदे राज्याभिषेकम् (ख) सीतायाः संरक्षणम्

(ग) नगरभ्रमणम् (घ) दण्डकारण्ये गमनम् ( )

५. अभिषेकं परित्यज्य रामः किम् आश्रयेत्–

(क) दिव्याम्बरधरो भव (ख) रत्नाभूषणधरो भव

(ग) जटाचीरधरो भव (घ) पितृसेवापरायणो भव ( )

**(ख) अतिलघूत्तरात्मकाः प्रश्नाः–**

(क) रामः पित्राज्ञया किं विधातुमिच्छति?

(ख) रामः द्विधा किं न करोति?

(ग) कैकेयी नृपं प्रथमं वरं किम् अचायत?

(घ) कैकेयी रामस्याग्रे नृपं कीदृशं विधातुमभिलषति?

(ङ) रामः नृपस्य प्रतिज्ञामनुपालयन् किं कर्तुमभिलषति?

**(ग) लघूत्तरात्मकाः प्रश्नाः –**

(क) रामः कति वर्षाणि दण्डकारण्ये निवसेत् इति कैकेयी इच्छति?

(ख) रामः कोसलपतेः किं कुर्यात्? इत्यस्मिन् विषये रामः किमभिलषति?

(ग) कैकेय्याः कीदृशं वचनं श्रुत्वा रामः दुःखी नाभवत्?

(घ) रामः प्रसन्नो भूत्वा भरताय किं दातुमभिलषति।

(ङ) रामः किं कृत्वा जीवितुं नेच्छति? किञ्च आदाय सर्वत्र व्यवहरति?

**(घ) सामान्यज्ञानप्रश्नाः –**

**१. निम्नलिखितपद्यानां संस्कृते व्याख्या कार्या –**

(क) तद् ब्रूहि वचनं ........................ द्विर्नाभिभाषते।

(ख) तत्र मे याचितः ........................ अद्यैव राघव।

(ग) भरतः कोसलपतेः ........................ रथसंकुलाम्।

(घ) एवमस्तु गमिष्यामि........................अनुपालयन्।

(ङ) **नाहमर्थपरः** ........................ धर्ममास्थितम्।

**२. निम्नाङ्कितपद्यानां संस्कृते भावार्थः लेखनीयः –**

(क) अहो धिङ् नार्हसे........................अपि पावके।

(ख) सप्त सप्त च वर्षाणि........................जटाचीरधरो भव।

(ग) तदप्रियम्........................चेदमब्रवीत्।

(घ) अहं हि सीतां........................आप्रचोदितः।

(ङ) न ह्यतो धर्माचरणं........................वचनक्रिया।

**३. निम्नाङ्कितपद्यानाम् अन्वयः कार्यः –**

(क) भक्षयेयम् ........................हितेन च।

(ख) पुरा देवासुरे ........................महारणे।

(ग) यदि सत्यप्रतिज्ञं ........................वाक्यमिदं शृणु।

**(ङ) व्याकरणज्ञानविषयकाः प्रश्नाः –**

**१. निम्नाङ्कितपदानां सन्धिविच्छेदः कार्यः –**

(क) चार्णवे = ........................।

(ख) द्विर्नाभिभाषते = ........................।

(ग) चाद्यैव = ........................।

(घ) वसुधामिमाम् = ........................।

(ङ) मरणोपमम् = ........................।

(च) प्राणानिष्टान् = ........................।

**२. निम्नाङ्कितपदानां सन्धिः कार्यः –**

(क) न+अर्हसे = ........................।

(ख) जटाचीरधरः+भव = ........................।

(ग) च+इदम्+अब्रवीत् = ........................।

(घ) तु+इतः = ........................।

(ङ)　माम्+ऋषिभिः = ........................।

(च)　हि+अतः = ........................।

**३. निम्नाङ्कितपदानां समासविग्रहः कार्यः–**

(क)　नरश्रेष्ठ! = ........................।

(ख)　सत्यप्रतिज्ञः = ........................।

(ग)　जटाचीरधरः = ........................।

(घ)　कोसलपतेः = ........................।

(ङ)　अप्रियम् = ........................।

**४. अधोलिखितानां पदानां समासः कार्यः–**

(क)　नानारत्नैः समाकीर्णा, ताम् = ........................।

(ख)　प्रीणातीति प्रियः, न प्रियः, तम् = ........................।

(ग)　न मित्रम् अमित्रः तं हन्तीति = ........................।

(घ)　विगतः मलः यस्मात् सः, तम् = ........................।

(ङ)　अर्थेभ्यः परः = ........................।

**५. निम्नलिखितक्रियापदेषु धातु-लकार-पुरुष-वचनानि निर्दिशत–**

(क)　पतेयम् = ........................।

(ख)　प्रतिजाने = ........................।

(ग)　शृणु = ........................।

(घ)　अब्रवीत् = ........................।

(ङ)　गमिष्यामि = ........................।

(च)　दद्याम् = ........................।

**६. अधोलिखितपदेषु मूलशब्दं, लिङ्गं, विभक्तिं, वचनं च निर्दिशत–**

(क)　राज्ञः = ........................।

(ख)　पित्रा = ........................।

(ग)　आत्मानम् = ........................।

(घ)　कोसलपतेः = ........................।

(ङ)　अहम् = ........................।

(च)　भ्रात्रे = ........................।

**७. गुरुशब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत।**

**८. पत्-धातोः विधिलिङ्लकारस्य गम्-धातोश्च लोट्लकारस्य रूपाणि लिखत।**

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

१. ग　　२. घ　　३. क　　४. घ　　५. ग

# चतुर्थः पाठः

# विवेकानन्दाष्टकम्

**लेखकपरिचयः –**

आधुनिकेषु संस्कृतमहाकविषु विशिष्टप्रतिभासम्पन्नः श्रीमान् डॉ. श्रीधरभास्करवर्णेकरः अन्यतमः मन्यते। अयं महाकविः महाराष्ट्रप्रान्ते १९१८ ईसवीये वर्षे जुलाई मासस्य एकत्रिंशद् दिनाङ्के 'नागपुर' इत्याख्ये नगरे जनिमलभत। अस्य महोदयस्य शिक्षा नागपुरनगरे एव सञ्जाता। अधिगतविद्यः अयं महोदयः १९४१ ईसवीयवर्षतः १९५९ ई. वर्षपर्यन्तं महाविद्यालयेषु संस्कृतविषयाध्यापकरूपेण कार्यमकरोत्। ततः परं नागपुरस्थे विश्वविद्यालये संस्कृतविभागे नियुक्तिं सम्प्राप्य १९७० ईसवीयवर्षतः १९७९ ईसवीयवर्षपर्यन्तं विभागाध्यक्षपदमलङ्कृतवान्। एष महोदयः साहित्यअकादमीद्वारा विद्वत्सम्मानेन, मध्यप्रदेशशासनेन च महाकविकालिदासपुरस्कारेण सम्मानितोऽभूत्। अयं महाकविः संस्कृतसाहित्यस्य अभिवृद्धौ महद्योगदानम् प्रायच्छत्। अस्य अखिलं साहित्यवैभवं भारतीयताभावपरिपूर्णं, सुमधुरं, गेयं, सरसं चास्ति। अस्य प्रमुखाः रचनाः इमाः सन्ति–

१. **महाकाव्यम् – शिवराज्योदयम् षट्षष्टि ( ६६ ) सर्गात्मकम्।**

२. **खण्डकाव्यानि–**
   - (१) विभूतिवन्दनम्
   - (२) जवाहरतरङ्गिणी
   - (३) विनायकवैजयन्ती
   - (४) रामकृष्णपरमहंसीयम्

३. **नाटकम्**
   - (१) विवेकानन्दविजयम् (महानाटकम्)
   - (२) शिवराज्योदयम्

४. **स्तोत्रसाहित्यम्** – अस्य महोदयस्य स्तोत्रसाहित्यं प्रचुरं वर्तते।

**पाठपरिचयः –**

महाकविश्रीधरभास्करवर्णेकरमहोदयस्य काव्यरचनासु स्वामिनः विवेकानन्दस्य उदात्तं चरितमाश्रित्य विरचितं 'विवेकानन्दविजयम्'इ तिन ामधेयंम हानाटकम्अ तीवप्रसिद्धमस्ति।अ स्मिन्न ाटकेद शअ ंका:स न्ति। स्वामिनः रामकृष्णपरमहंसस्य शिष्यपरम्परायां स्वामी विवेकानन्दः प्रामुख्यं भजते। सः एकः लोकविश्रुतः चिन्तकः समाजोद्धारकश्चासीत्। अस्य जन्म एकस्मिन् धनाढ्यपरिवारे १९६१ तमे ईसवीये वर्षे जनवरीमासस्य नवमे दिनाङ्केऽभवत्। अस्य बाल्यकालस्य नाम नरेन्द्रदत्तः (नरेन्द्रनाथः) आसीत्। कालान्तरे च एष 'विवेकानन्दः' इति नाम्ना प्रसिद्धो जातः। बाल्यावस्थायाम् अयं नास्तिक आसीत्। ईश्वरे एतस्य स्वल्पमात्रमपि विश्वासः नासीत्। स्वामिनः रामकृष्णपरमहंसस्य सान्निध्यं प्राप्य असौ महोदयः परमास्तिकः सञ्जातः। ईश्वरस्य अलौकिकसत्तायाम् एतस्य दृढो विश्वासः समुत्पन्नः। ततः परम् एष षड्वर्षपर्यन्तम् एकान्तवासं विधाय भारतीयधर्मदर्शनयोः गूढमनुशीलनमकरोत्। वेदान्तदर्शने च विशिष्टं वैदुष्यमलभत। संस्कृतभाषया सहैव आङ्गलभाषायामपि अस्य पूर्णाधिकार आसीत्। दक्षिणभारते १८८२ तमे ईसवीये वर्षेऽयं स्वगुरोरुपदेशानां प्रचार-प्रसारे संलग्नोऽभूत्। एष महोदयः अमेरिकादेशस्य शिकागो-नगरे

१८९३ वर्षे आयोज्यमाने विश्वधर्मसम्मेलने, भारतदेशस्य प्रतिनिधिरूपेण उपस्थितो भूत्वा लोकानां पुरतः हिन्दूधर्मस्य वेदान्तदर्शनस्य च यादृशमद्वितीयं व्याख्यानम् अकरोत् तदाकर्ण्य अखिलं विश्वमाश्चर्यान्वितम् अभूत्। तत्र जनाः एतद् व्याख्यानं पौनःपुन्येन श्रुतवन्तः। अनेन व्याख्यानेन प्रभाविताः तत्रत्याः बहवः जना अस्यानुयायिनोऽभवन्। वर्षत्रयं तत्र एष महोदयः हिन्दूधर्मस्य प्रचार-प्रसारम् अकरोत्। अमेरिकातः प्रत्यागमनकाले इङ्ग्लैण्ड-यूरोपीयादिदेशेषु भारतीयधर्मविषयकमस्य व्याख्यानं श्रुत्वा जनाः मन्त्रमुग्धाः अभवन्। ततः भारतदेशं समागत्य १८९९ ईसवीये वर्षे 'रामकृष्णमिशन' इति नामधेयां समाजसेविनीं संस्थामसंस्थापयत्। सा संस्था साम्प्रतं सततं समाजसेवायां संलग्ना वर्तते।

स्वामी विवेकानन्दः हिन्दूसमाजस्य महतीं सेवामकरोत्। तस्य कथनमासीद् यत् हिन्दूधर्मः अतीव समुन्नतः, हिन्दूनां सभ्यता च अतीव समृद्धाऽस्ति। हिन्दुषु सुप्तप्रायम् आत्मगौरवम् आत्मविश्वासं च जागरयन् स उद्घोषितवान् यत् भारतीयाः स्वकीयाध्यात्मबलेन विश्वं जेतुं प्रभवन्ति।

'विवेकानन्दाष्टकम्' इत्याख्ये पाठे तस्यैव महापुरुषस्य उदात्तचरितविषयकाणि अष्टौ पद्यानि छात्राणामुद्बोधनार्थम् अत्र प्रस्तूयन्ते। एतानि पद्यानि महाकविना श्रीधरभास्करवर्णेकरमहोदयेन विरचितात् 'विवेकानन्दविजयम्' इति नामधेयात् नाटकाद् गृहीतानि सन्ति।

# विवेकानन्दाष्टकम्

**सन्दर्भः** - प्रस्तुतमिदं पद्यम् 'विवेकानन्दविजयम्' इति नामधेयात् नाटकाद् उद्धृतोऽस्ति। अस्य लेखकः महाकविः डॉ. श्रीधरभास्करवर्णेकरः अस्ति।

**प्रसङ्गः** - अत्र यस्मिन् प्राणिनि सद्-असद्-विषयकम् अद्भुतं ज्ञानं विद्यते स प्राणी महाकवेः दृष्टौ सम्मान्यो वर्तते इति वर्णितमस्ति।

**अम्भोदेतर - वारिबिन्दु-विमुखो मान्यः स मे चातको,**
**वासन्तेतर - वासरेषु च तथा वाचंयमः कोकिलः।**
**गृह्णन् क्षीरमपास्य नीरमरसं हंसस्तु वन्द्यो मम,**
**जीवः श्लाघ्यतमः स एव भुवने यस्मिन् विवेकः परः।।१।।**

**पदच्छेदः** - अम्भोद-इतर-वारि-बिन्दु-विमुखः मान्यः सः मे चातकः, वासन्त-इतर-वासरेषु च तथा वाचंयमः कोकिलः, गृह्णन् क्षीरम् अपास्य नीरम् अरसम् हंसः तु वन्द्यः मम, जीवः श्लाघ्यतमः स एव भुवने यस्मिन् विवेकः परः।

**अन्वयः** - सः चातकः मे मान्यः (अस्ति) (यः) अम्भोदेतरवारिबिन्दुविमुखः तथा च वासन्तेतरवासरेषु वाचंयमः कोकिलः (अपि मे मान्यः अस्ति) मम तु अरसं नीरम् अपास्य क्षीरं गृह्णन् हंसः वन्द्यः (अस्ति) भुवने सः एव जीवः श्लाघ्यतमः यस्मिन् परः विवेकः अस्ति।

**व्याख्या** - सः=असौ, चातकः=एतदाख्यः खगविशेषः, मे=मम (कवेः, लेखकस्य), मान्यः=सम्माननीयः (अस्ति) (यः), अम्भोदेतरवारिबिन्दुविमुखः=मेघान्यद्जलकणपराङ्मुखः (अस्ति), तथा च=अन्यत् च, वासन्तेतरवासरेषु=मधुमासभिन्नदिवसेषु, वाचंयमः=मौनव्रती (अभाषणशीलः), कोकिलः=पिकः (अपि मे सम्मान्यः अस्ति) मम=मे (लेखकस्य) तु, अरसम्=रसविहीनम् (नीरसम्), नीरम्=पयः (जलं, वारि), अपास्य=विहाय (परित्यज्य, त्यक्त्वा) क्षीरम्=दुग्धम् (पयः), गृह्णन्=स्वीकुर्वन् (आददानः) हंसः=मरालः, वन्द्यः=वन्दनीयः (अस्ति), भुवने=जगति (लोके) स एव जीवः=तादृशः एव प्राणी, श्लाघ्यतमः=प्रशंसनीयः (प्रशस्यतमः) (अस्ति), यस्मिन्=यस्मिन् प्राणिनि, जीवे), परः=श्रेष्ठः (उत्तमः, अद्भुतः), विवेकः=सद्ज्ञानम् (उचितानुचितवर्गीकरणबोधः),

अस्ति=विद्यते।

**भावार्थः** – अत्र महाकवेः अयम् अभिप्रायः वर्तते यत् – एतादृशः चातकः मम दृष्ट्या सम्मान्यः वर्तते यः वारिदतः (मेघतः) अधिगतान् जलबिन्दून् परित्यज्य जलग्रहणे पराङ्मुखो भवति, एवञ्च वसन्त-ऋतो भिन्ने काले मौनव्रती कोकिलः कवेः दृष्टौ विशिष्टो वर्तते, रसशून्यं (नीरसं) जलं विहाय क्षीरं (पयः) गृह्णन् मरालः कविदृष्ट्या सम्मान्यः अस्ति। इत्थमेव अस्मिन् जगति सः एव एकाकी प्राणी श्रेष्ठः वर्तते यस्मिन् प्राणिनि उत्तमः विवेकः वर्तते। यस्मिन् सद्-असद्-विवेकिनी बुद्धिः अस्ति। एतादृशः प्राणिविशेषः एव कवेः मतानुसारं सम्मान्यः श्रेष्ठश्चास्ति।

**व्याकरणात्मकटिप्पणी**– अम्भोदेतरवारिबिन्दुविमुखः=अम्भः ददातीति अम्भोदः (उप. सः), अम्भोदात् इतरवारिबिन्दुभ्यः विमुखः यः सः–अम्भोदेतरवारिबिन्दुविमुखः (बहु.स.)। मान्यः=मन्+ण्यत् (य)+सु (प्र.वि.ए.व.)। वसन्तेतरवासरेषु=वसन्ते भवाः वासन्ताः, तेभ्यः इतरा वासन्तेतराः (पं. तत्पु.स.), वासन्तेतराश्च ते वासराः वासन्तेतरवासराः (कर्म.स.), तेषु वासन्तेतरवासरेषु। वाचंयमः (वाचं यच्छति इति) =वाच्+यम्+खच् (मुमागमः)+ सु(प्र.वि.ए.व.)। गृह्णन्=ग्रह्+शतृ (अत्)+सु (प्र.वि.ए.व.)। अपास्य=अप+अस्+क्त्वा (ल्यप्=य) (अव्ययशब्दः)। वन्द्यः=वन्द्+ण्यत् (य)+सु (प्र.वि.ए.व.)। श्लाघ्यतमः =श्लाघ्य+तमप् (तम)+सु (प्र.वि.ए.व.)। यस्मिन्=यत्+ङि (स्मिन्) (स.वि.ए.व.)।

**छन्दः** – अस्मिन् पद्ये शार्दूलविक्रीडितं नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये स्वामिना विवेकानन्देन अस्मिन् देशे यद्विशिष्टं कार्यं विहितं तस्य वर्णनं कुर्वन् कविः कथयति यत्–

**तेन ध्वस्तं जडमतवतां राज्यमेकातपत्रं,**
**सच्चैतन्यं जनगणमनः सर्वथाऽकारि तूर्णम्।**
**धर्मग्लानिः प्रवचनमहामन्त्रशक्त्या निरस्ता**
**ह्युच्चैर्नीता भुवि भारतभूवैजयन्ती जयन्ती।।२।।**

**पदच्छेदः**– तेन ध्वस्तम्, जडमतवताम्, राज्यम् एकातपत्रम्, सत् चैतन्यम्, जनगणमनः सर्वथा अकारि तूर्णम्, धर्मग्लानिः प्रवचनमहामन्त्रशक्त्या निरस्ता हि उच्चैः नीता भुवि भारतभूवैजन्ती जयन्ती।

**अन्वयः**– तेन जडमतवताम् एकातपत्रं राज्यं ध्वस्तम्, तूर्णं जनगणमनः सर्वथा सच्चैतन्यम् अकारि, प्रवचनमहामन्त्रशक्त्या धर्मग्लानिः निरस्ताः, हि भुवि जयन्ती भारतभूवैजयन्ती उच्चैः नीता।

**व्याख्या**– तेन=स्वामिना विवेकानन्देन, जडमतवताम्=नास्तिकजनानाम्, एकातपत्रम्=एकच्छत्रम् (एकाधिकारस्वामित्वम्), राज्यम्=शासनम् (साम्राज्यम्), ध्वस्तम्=निरस्तम् (खण्डितम्), तूर्णम्=शीघ्रमेव, (झटित्येव), जनगणमनः=सर्वेषां जनानां चेतांसि (लोकानां चेतांसि), सर्वथा=सर्वतोभावेन, (पूर्णरूपेण), सच्चैतन्यम्=सद्बोधपूर्णम् (सद्ज्ञानयुक्तम्) अकारि=विहितम् (कृतम्), प्रवचनमहामन्त्रशक्त्या = व्याख्यानविलक्षणमन्त्रप्रभावेण (विशिष्टव्याख्यानप्रदानेन), धर्मग्लानिः=कर्तव्यकर्मशून्यता (धर्महानिः), निरस्ता=दूरीकृता (पृथग्विहिता), हि=नूनमेव (निश्चयेन), भुवि=धरायाम् (वसुन्धरायाम्), जयन्ती=विजयशीला (विजयद्योतका), भारतभूवैजयन्ती=भारतभूमिविजयपताका उच्चैः=उन्नतिम्, नीता=प्रापिता।

**भावार्थः**– स्वामिनः रामकृष्णपरमहंसस्य विशिष्टः शिष्यः स्वामी विवेकानन्दः इह लोके नास्तिकजनानां व्याप्तं साम्राज्यम् अध्वंसत। एवञ्च शीघ्रमेव सर्वविधजनानां चेतांसि सद्ज्ञानज्योतिः प्रज्ज्वालयति स्म। प्रवचनरूपमहामन्त्रशक्त्या धर्मविषयकं यद् अज्ञानतमः आसीत् तदपि अध्वंसत। एवंविधं नूनमेव सः अस्यां भूमौ विजयशीलां भारतभूमिपताकां समुन्नतामकरोदिति।

**व्याकरणात्मकटिप्पणी** – ध्वस्तम्=ध्वंस्+क्त (त)+सु (अम्) (क्रियापदम्)। जडमतवताम्=जडमत+

मतुप् (मत्)+आम् (ष.वि.ब.व.)। एकातपत्रम्=एकं च तदातपत्रं च-एकातपत्रम् (कर्म.स.)। सच्चैतन्यम्=सत्+चैतन्यम् (श्चुत्वसन्धिः)।जनगणमनः=जनानां गणः जनगणः तस्य मनः-जनगणमनः (ष.तत्पु.स.)।सर्वथा=सर्व+थाल् (था) (अव्य.)। धर्मग्लानिः=धर्मस्य ग्लानिः धर्मग्लानिः (ष.त.)। प्रवचनमहामन्त्रशक्त्या=प्रवचनमेव महामन्त्रः-प्रवचनमहामन्त्रः (कर्म.स.) तस्य शक्त्या-प्रवचनमहामन्त्रशक्त्या (ष.त.)।ह्युच्चैर्नीता=हि+ उच्चैः+नीता (यण्सन्धिः विसर्गसन्धिः)। भुवि=भू+ङि (इ) (स.वि.ए.व.)। भारतभूवैजयन्ती=भारतस्य भूः-भारतभूः (ष.त.), तस्याः वैजयन्ती-भारतभूवैजन्ती (ष.त.)।नीता=नी+क्त (त)+टाप् (आ)+सु (क्रियापदम्)।

**छन्दः** – अस्मिन् पद्ये 'मन्दाक्रान्ता' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– स्वामिनः विवेकानन्दस्य व्याख्यानं संश्रुत्य जनाः महान्तं ज्ञानानन्दमनुभूतवन्तः इति प्रतिपादयन् अत्र कविः कथयति यत् –

**तत्सङ्गीतस्वरमधुरिमा-पान-तृप्तान्तराणां,**
**ब्रह्मानन्दोऽनुभवपदवीं प्राप सद्भावुकानाम्।**
**तद्व्याख्यानश्रवण-विगलत्सर्ववेद्यान्तराणां**
**ज्ञानानन्दः प्रतिपदसुधास्वादभाजां जनानाम्।।३।।**

**पदच्छेदः**– तत्सङ्गीतस्वरमधुरिमापानतृप्तान्तराणाम्, ब्रह्मानन्दः अनुभवपदवीम् प्राप, सद्भावुकानाम्, तद्व्याख्यानश्रवण विगलत् सर्ववेद्यान्तराणाम्, ज्ञानानन्दः, प्रतिपदसुधा आस्वादभाजाम् जनानाम्।

**अन्वयः**– तत्सङ्गीतस्वरमधुरिमापानतृप्तान्तराणां, सद्भावुकानां, ब्रह्मानन्दः तद्व्याख्यान-श्रवण-विगलत्सर्ववेद्यान्तराणां प्रतिपदसुधास्वादभाजां जनानां ज्ञानानन्दः अनुभवपदवीं प्राप।

**व्याख्या** – तत्सङ्गीत-स्वर-मधुरिमा-पानतृप्तान्तराणाम्=तस्य सङ्गीतध्वनिमाधुर्यसादरश्रवण-सन्तुष्टचेतसाम्, सद्भावुकानाम् =सहृदयानाम्, ब्रह्मानन्दः=अनुभवमात्रप्रतीतिगम्यः, (अद्वितीयानन्दः) तद्व्याख्यानश्रवणविगलत् सर्ववेद्यान्तराणाम् = तस्य प्रवचनाकर्णयन्-अविनश्यद्-अखिल (सम्पूर्ण) ज्ञेयान्तराणाम्, प्रतिपदसुधाभाजाम्= प्रत्येकशब्दामृतानन्दयुक्तानाम्, जनानाम्=मानवानाम् (लोकानाम्), ज्ञानानन्दः=ज्ञानोत्पन्नं सुखम्, अनुभवपदवीम्= अनुभूतिमार्गम् (अनुभूतपन्थानम्), प्राप=अलभत (प्राप्नोति स्म)।

**भावार्थः** – स्वामिनः विवेकानन्दस्य संगीतस्वरमाधुर्यं सम्मानपूर्वकमाकर्ण्य सन्तुष्टचेतसः मानवाः ब्रह्मानन्दप्राप्तिसदृशमानन्दम् अनुभूतवन्तः। स्वामिनः व्याख्यानस्य श्रवणानन्तरं श्रोतृणाम् अन्यद्ज्ञानं (सांसारिकमोहविषयकं ज्ञानम्) व्यनश्यत्। ते अमृतास्वादभाजः जनाः प्रतिपदं स्वामिनः वचनामृतम् आस्वाद्य महद्ज्ञानानन्दमनुभूतवन्तः।

**व्याकरणात्मकटिप्पणी** – तत्सङ्गीतस्वरमधुरिमापानतृप्तान्तराणाम्=तस्य सङ्गीतम्-तत्सङ्गीतम् (ष.तत्पु.), तस्य स्वराः-तत्सङ्गीतस्वराः (ष.तत्पु.स.), तेषां मधुरिमा-तत्सङ्गीतस्वरमधुरिमा, (ष.तत्पु.), तस्याः पानम् (ष.तत्पु.) तत्सङ्गीतस्वरमधुरिमापानेन तृप्तः अन्तरः येषां ते (ब.हु.स.) तेषाम्। अनुभवपदवीम्=अनुभवस्य पदवी-अनुभवपदवी (ष.तत्पु.) ताम्। प्राप=प्र+आप्+लिट्+तिप् (प्र.पु.ए.ब.)। सद्भावुकानाम्=सद्भावुक+आम् (ष.वि.ब.)। तद्व्याख्यानश्रवणविगलत्सर्ववेद्यान्तराणाम्=तस्य व्याख्यानम्-तद्व्याख्यानम् (ष.त.), तस्य श्रवणम्-तद्व्याख्यानश्रवणम् (ष.त.), तद्व्याख्यानश्रवणेन विगलन्ति सर्वाणि वेद्यान्तराणि येषां ते-तद्व्याख्यानश्रवणविगलत्सर्ववेद्यान्तराः (ब.स.), तेषाम्। ज्ञानानन्दः=ज्ञानस्य आनन्दः ज्ञानानन्दः (ष.त.)। प्रतिपदसुधास्वादभाजाम्=पदं पदमिति प्रतिपदम्, सुधायाः आस्वादः-सुधास्वादः (ष.त.) प्रतिपदं सुधास्वादं भजन्ति ते=प्रतिपदसुधास्वादभाजः, तेषाम् प्रतिपदसुधास्वादभाजाम्।

**छन्दः** – अस्मिन् पद्ये मन्दाक्रान्ता नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- अत्र स्वामिनि विवेकानन्दे अद्वितीयं विद्याधनमासीत् तद् विलोक्य आङ्ग्लानां कीदृशी स्थितिः सञ्जाता इति वर्णयन् कविः कथयति यत् -

**दृष्ट्वा विद्याविभवमतुलं तस्य विभ्राजमानं**
**पाश्चात्यानामतिधनवतामस्तमाप्तो हि गर्वः।**
**दिव्यं तेजः शुचितमसुशीलोद्भवं तन्मुखाब्जे,**
**गौरास्यानामशुचिचरितानामभूत् कृष्णभावः।।४।।**

**पदच्छेदः** - दृष्ट्वा विद्याविभवम् अतुलम् तस्य विभ्राजमानम्, पाश्चात्यानाम् अतिधनवताम् अस्तम् आप्तः हि गर्वः, दिव्यम् तेजः शुचितमसुशीलोद्भवम् तत् मुखाब्जे गौरास्यानाम् अशुचिचरितानाम् अभूत् कृष्णभावः।

**अन्वयः** - तस्य अतुलं विभ्राजमानं विद्याविभवं दृष्ट्वा हि अतिधनवतां पाश्चात्यानां गर्वः अस्तम् आप्तः। तन्मुखाब्जे शुचितमसुशीलोद्भवं दिव्यं तेजः (दृष्ट्वा) अशुचिचरितानां गौरास्यानां कृष्णभावः अभूत्।

**व्याख्या** - तस्य=स्वामिनः विवेकानन्दस्य, अतुलम्=अनुपमम्, विभ्राजमानम्=अतिशयशोभायमानम् (देदीप्यमानम्), विद्याविभवम्=विद्याख्यमैश्वर्यम् (विद्याधनम्), दृष्ट्वा=विलोक्य, हि=निश्चयेन, अतिधनवताम्=विपुलधनयुक्तानाम् (अतिशयार्थसम्पन्नानाम्), पाश्चात्यानाम्=पाश्चात्यजनानाम् (वैदेशिकानाम्), गर्वः=अहङ्कारः (अभिमानम्) अस्तम् आप्तः=नष्टः सञ्जातः, तन्मुखाब्जे=तस्य आननसरोजे (तद्वदनकमले), शुचितमसुशीलोद्भवम्=पवित्रतमसदाचारात् समुद्भूतम्, दिव्यम्=अलौकिकम् (अपूर्वम्), तेजः=प्रकाशः (तेजस्विताम्) (विलोक्य), अशुचिचरितानाम् = अपवित्राचरणानाम् (निन्दितचरित्राणाम्), गौरास्यानाम् = आङ्ग्लजनानाम् (गौरमुखानाम्), कृष्णभावः = कालुष्यम् (काष्र्ण्यस्वरूपम्), अभूत्=सञ्जातम्।

**भावार्थः**- स्वामिनः विवेकानन्दस्य देदीप्यमानं विद्यैश्वर्यम् अवलोक्य विपुलवैभवसम्पन्नानाम् आङ्ग्लानाम् (वैदेशिकानाम्) अहङ्कारः विनष्टोऽभवत्। स्वामिनः मुखारविन्दे पवित्रतमसदाचारोत्पन्नं महत्तेजः विलोक्य अपवित्रचरितानाम् आङ्ग्लजनानां (वैदेशिकानाम्) अन्तःकरणे कालुष्यभावं विवेकानन्दे विद्यासम्पत्तिः तेजस्विता च अस्माकमपेक्षा प्रचुरा वर्तते इति विचिन्त्य तेषां मुखकमलं मलिनं सञ्जातम्।

**व्याकरणात्मकटिप्पणी**- अतुलम्=न विद्यते तुला (उपमा) यस्य तत् (बहु.स.)। विभ्राजमानम् = वि+भ्राज्+शानच् (आन)+अम् (द्वि.वि.ए.व.)। विद्याविभवम् = विद्या एव विभवः विद्याविभवः (कर्म.) तम्। दृष्ट्वा = दृश्+क्त्वा (अव्ययशब्दः)। अतिधनवताम् = अतिधन + मतुप् (मत्) + आम् (ष.वि.ब.व.)। पाश्चात्यानाम् = पश्चात्+त्यक् (त्य)+आम् (ष.वि.ब.व.)। आप्तः = आप्+क्त+सु (क्रियाशब्दः)। तन्मुखाब्जे = तस्य मुखाब्जे (ष.त.)। शुचितमसुशीलोद्भवम् = शुचितमं च अदः सुशीलम् शुचितमसुशीलम् (कर्म.स.)। शुचितमसुशीलाद् उद्भवः यस्य तत्-शुचितमसुशीलोद्भवम् (बहु.स.)। गौरास्यानाम् = गौरं आस्यं (मुखं) यस्य सः गौरास्यः (बहु.स.) तेषाम्-गौरास्यानाम्। अशुचिचरितानाम् = न शुचिः अशुचिः (नञ् तत्पु.), अशुचिचरितं येषां ते (बहु.स.)-अशुचिचरितानाम्। कृष्णभावः = कृष्णश्चासौ भावः - कृष्णभावः (कर्म.स.)।

**छन्दः** - अस्मिन् पद्ये 'मन्दाक्रान्ता' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः** - स्वामिनः विवेकानन्दस्य वाण्यां लोकविजयिनी विलक्षणा शक्तिः आसीदिति प्रतिपादयन् कविः कथयति यत् -

**शब्दे शब्दे भुवनजयिनी तस्य सन्मन्त्रशक्तिः,**
**पादे-पादे सुदृढनिहिते कास्विदुत्साहशक्तिः।**
**तद् दृक्पातैर्जनगणमनः स्वाहिता राष्ट्रशक्तिः,**
**तत्सञ्चारैः प्रथममुदिता भारती धर्मशक्तिः।।५।।**

**पदच्छेदः**– शब्दे शब्दे भुवनजयिनी तस्य सन्मन्त्रशक्तिः, पादे पादे सुदृढनिहिते कास्वित् उत्साहशक्तिः, तद् दृक्पातैः जनगणमनः सु+आहिता राष्ट्रशक्तिः तत् सञ्चारैः प्रथमम् उदिता भारतीयधर्मशक्तिः।

**अन्वयः**– तस्य शब्दे शब्दे भुवनजयिनी सन्मन्त्रशक्तिः (आसीत्), सुदृढनिहिते पादे पादे कास्वित् उत्साहशक्तिः (आसीत्), तद्दृक्पातैः जनगणमनःसु राष्ट्रशक्तिः आहिता (अभूत्), तत् सञ्चारैः प्रथमं भारती धर्मशक्तिः उदिता (आसीत्)।

**व्याख्या** – तस्य = स्वामिनः विवेकानन्दस्य, शब्दे शब्दे = प्रतिशब्दस्य, भुवनजयिनी = संसारविजयिनी, सन्मन्त्रशक्तिः = श्रेष्ठमन्त्रसामर्थ्यम्, (आसीत्), सुदृढनिहिते = सुदृढतया स्थापिते, (स्वामिनः) पादे-पादे-प्रत्येकस्मिन् चरणे, कास्विद् = काचिद् अद्भुता, उत्साहशक्तिः = अध्यवसायसामर्थ्यम् (आसीत्), तद्दृग्पाते = तस्य लोचननिक्षेपैः, जनगणमनःसु = सर्वेषा जनानामन्तः करणेषु, राष्ट्रशक्तिः = देशभक्तिसामर्थ्यम्, आहिता = स्थापिता (अभूत्), तत्सञ्चारैः = तस्य लोकभ्रमणेन, प्रथमम् = सर्वप्रथमम् (सर्वादौ), भारती = भारतीया, धर्मशक्तिः = कर्त्तव्यसामर्थ्यम्, उदिता = प्रकाशयत् (प्रादुरभवत्)।

**भावार्थः** – स्वामिनः विवेकानन्दस्य प्रत्येकस्मिन् शब्दे लोकविजयिनी महती मन्त्रशक्तिः आसीत्। अस्य स्वामिनः सुदृढं स्थापिते प्रत्येकस्मिन् पदे काचित् विलक्षणा उत्साहशक्तिः विद्यमाना आसीत्। स्वामिनः विवेकानन्दस्य दर्शनमात्रेण जनानाम् अन्तःकरणेषु देशभक्तिभावना स्वभावत एव स्थापिता अभूत्। विभिन्नेषु दिग्भागेषु एष भ्रमणमकरोत्, एतस्मात् कारणात् भारतीया धर्मशक्तिः सर्वप्रथमं सर्वेषां पुरतः समागता अभूत्।

**व्याकरणात्मकटिप्पणी** – भुवनजयिनी = भुवनं जेतुं शीलं यस्याः सा – भुवनजयिनी (उप.स.)। सन्मन्त्रशक्तिः= स न्मन्त्रस्यश ाक्तिः- स न्मन्त्रशक्तिः( ष.तत्पु.) ाि नहिते= ि न+धा+क्त( त)+ङि( स.वि.ए.व.)। कास्वित् = किम्+स्वित् (अव्य.)। उत्साहशक्तिः उत्साहस्य शक्तिः (ष.तत्पु.)। तद्दृक्पातैः = तस्य दृक्पाताः (ष.त.) तैः तद्दृक्पातैः। जनगणमनःसु = जनानां गणः-जनगणः (ष.स.), जनगणस्य मनः = जनगणमनः (ष.स.) तेषु जनगणमनःसु। आहिता = आङ्+धा+क्त+टाप्+सु (क्रियापदम्)। राष्ट्रशक्तिः = राष्ट्रस्य शक्तिः (ष.स.) तत्सञ्चारैः = तस्य सञ्चारः-तत्सञ्चारः (ष.त.) तैः तत्सञ्चारैः। भारती = भरत+अण्+ङीप्+सु (प्र.वि.ए.व.)। धर्मशक्तिः = धर्मस्य शक्तिः (ष.स.)।

**छन्दः** – अस्मिन् पद्ये 'मन्दाक्रान्ता' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– लोकेऽस्मिन् स्वामिनः अभिधानं विवेकानन्दः कथं सार्थकोऽभूत् इति प्रतिपादयन् कविः कथयति यत् –

**तस्योद्गारैः स्थिरपदमभूत् तत्र वेदान्तशास्त्रं,**
**तस्याचारैर्विचलितमभूत् सर्वपाखण्डजातम्।**
**तस्याह्वानैर्हतबलमभूद् दुर्मतं नास्तिकानां,**
**सानन्दोऽभूत् प्रथितयशसा तस्य नाम्ना विवेकः।।६।।**

**पदच्छेदः**– तस्य उद्गारैः स्थिरपदम् अभूत् तत्र वेदान्तशास्त्रम्, तस्य आचारैः विचलितम् अभूत् सर्वपाखण्डजातम् तस्य आह्वानैः हतबलम् अभूत् दुर्मतम् नास्तिकानाम् सानन्दः अभूत् प्रथितयशसा तस्य नाम्ना विवेकः।

**अन्वयः**– तत्रत स्यउ द्गारैःव ेदान्तशास्त्रंि स्थरपदम्अ भूत्,त स्यअ ाचारैःस र्वपाखण्डजातंि वचलितम् अभूत्। तस्य आह्वानैः नास्तिकानां दुर्मतं हतबलम् अभूत्। तस्य प्रथितयशसा नाम्ना विवेकः सानन्दः अभूत्।

**व्याख्या**– तत्र = तस्मिन् स्थाने (देश-विदेशेषु अपि), तस्य = स्वामिनः विवेकानन्दस्य, उद्गारैः = व्याख्यानैः (उद्बोधनैः), वेदान्तशास्त्रम् = उपनिषदां महत्त्वम्, स्थिरपदम् = दृढमूलम्, अभूत् = समभवत्, तस्य =

विवेकानन्दस्वामिनः, आचारैः = सदाचरणैः, सर्वपाखण्डजातम् = समस्तमिथ्यापवादः, विचलितम् = विनष्टम्, अभूत् = अभवत्, तस्य = स्वामिनः विवेकानन्दस्य, आह्वानैः = उद्बोधनैः (उद्घोषैः), नास्तिकानाम् = वेदादिशास्त्रममन्यमानानाम् (ईश्वरे अविश्वासकर्तॄणाम्), दुर्मतम् = दुर्मान्यतादिकम्, हतबलम् = बलहीनम् (सामर्थ्यशून्यम्) अभूत् = अभवत्। प्रथितयशसा = लोकविश्रुतकीर्तिना, तस्य = विवेकानन्दस्य, नाम्ना = अभिधानेन, विवेकः = ज्ञानराशिः (तत्त्वबोधः), सानन्दः = आनन्दयुक्तः (आनन्दमग्नः), अभूत् = अभवत्।

**भावार्थः** - इह लोके स्वामिनः विवेकानन्दस्य, उद्बोधनैः (सारगर्भितप्रवचनैः) देश-विदेशेषु वेदान्तशास्त्रस्य ज्ञानं पुनः प्रबलं सञ्जातम्। स्वामिनः विवेकानन्दस्य सद्व्यवहारेण लोके व्याप्तम् अखिलं पाखण्डसमूहं विनष्टमभवत्। तस्य गाम्भीर्यपूर्ण-उद्बोधनेन नास्तिकानां दुराग्रहपूर्णं ज्ञानं निर्बलं सञ्जातम्। विश्वप्रसिद्धस्य तस्य अभिधानेनि ववेकःस ानन्दःअ भूत्अ र्थात् ववेकःअ ानन्देनस हय ुक्तोऽभवत्ए वंविधंत स्य' विवेकानन्दः'इ ति अभिधानं सार्थकं सञ्जातम्।

**व्याकरणात्मकटिप्पणी** - तत्र = तस्मिन् इति-तत्+त्रल् (त्र) (अव्ययशब्दः)। उद्गारैः = उद्+गॄ+घञ् (अ)+भिस् (तृ.वि.ब.व.)। वेदान्तशास्त्रम् = वेदान्तानां शास्त्रम् (ष.तत्पु.)। सर्वपाखण्डजातम् = सर्वं च तत्पाखण्डजातम् (कर्म.स.)। विचालितम् = वि+चल् (णिच्) इट्+क्त+सु (क्रियापदम्)। अभूत् = भू+लुङ्+तिप् (प्र.पु.ए.व.)। आह्वानैः = आङ्+ह्वे+ल्युट् (यु=अन)+भिस् (तृ.वि.ब.व.)। नास्तिकानाम् = नास्ति परलोके मतिरस्य नास्तिक+आम् (ष.वि.ब.व.)। दुर्मतम् = दुष्टं मतं (प्रादिस.)। प्रथितयशसा = प्रथितं यशः यस्य सः - प्रथितयशाः (ब.हु.स.) तेन प्रथितयशसा। नाम्ना = नामन्+टा (आ) (तृ.वि.ए.व.)। विवेकः = वि+विक्+घञ् (अ)+सु (प्र.वि.ए.व.)।सानन्दः = आनन्देन सह (तृ.त.स.)।

**छन्दः**- अस्मिन् पद्ये 'मन्दाक्रान्ता' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- स्वामी विवेकानन्दः गुरोः रामकृष्णपरमहंसतः वेदान्तदर्शनस्य शिक्षां संप्राप्य तस्यैव कृपया विश्वविख्यातोऽभवदिति वर्णयन् कविः कथयति यत् -

**पीत्वाऽप्यादौ नवमतसुरामाङ्ग्लसाहित्यसूतां,**
**पीत्वा पश्चाद्गुरुचरण-सद्भक्ति-पीयूषधारा।**
**तत्सामर्थ्याव्यवहितमहाशक्तिना तेन यूना,**
**पीत्वा रोगद्रवभयजलं धिक्कृतो ह्यन्तकोऽपि।।७।।**

**पदच्छेदः**- पीत्वा अपि आदौ नवमतसुराम् आङ्ग्लसाहित्यसूताम् पीता पश्चात् गुरुचरण-सद्भक्ति-पीयूषधारा, तत्सामर्थ्य-अव्यवहितमहाशक्तिना, तेन यूना पीत्वा रोगद्रवमयजलम् धिक्कृतः हि अन्तकः अपि।

**अन्वयः**- आदौ आङ्ग्लसाहित्यसूतां नवमतसुराम् अपि पीत्वा पश्चात् (तेन) गुरुचरणसद्भक्ति-पीयूषधारा पीता, तत्सामर्थ्याव्यवहित-महाशक्तिना तेन यूना रोगद्रवमयजलं पीत्वा हि अन्तकः अपि धिक्कृतः।

**व्याख्या**- आदौ = सर्वप्रथमम् (सर्वादौ), आङ्ग्लसाहित्यसूताम् = आङ्ग्लवाङ्मयसमुत्पन्नाम् (पाश्चात्यभाषोद्भवाम्),न वमतसुराम्= न ूतनमान्यतामादकपेयम्,अ पि,प ीत्वा= ि नपीय( पानंक ृत्वा)( अर्थात् आङ्ग्लभाषाम् अधीत्य), पश्चात् = तदनन्तरम् (तेन=विवेकानन्देन), गुरुचरण सद्भक्तिपीयूषधारा = आचार्यपादनैष्ठिकश्रद्धामृतधारा, पीता = अङ्गीकृता (पानविषयीकृता), तत्सामर्थ्याव्यवहितमहाशक्तिना= गुरुपादानुग्रह-अप्रतिहतमहासामर्थ्येन, तेन = स्वामिना विवेकानन्देन, यूना = तरुणेन (युवकेन), रोगद्रवमयजलम् = व्याधिद्रवपूर्णं नीरम्, पीत्वा = पानं कृत्वा, हि = नूनमेव (निश्चयेन), अन्तकः अपि = यमराजः अपि, धिक्कृतः = तिरस्कृतः (अपमानितः), अर्थात् गुरुचरणकृपया अधिगतसामर्थ्येन अनेन स्वामिना विवेकानन्देन रोगाणुयुक्तं जलम् पीतम्, किन्तु तस्य शरीरे तेन जलेन कापि विकृतिः न सञ्जाता।

**भावार्थः**– अयं विवेकानन्दः पूर्वम् आङ्ग्लसाहित्योत्पन्नां नवमतमदिराम् अपिबत्, एतदनन्तरमसौ गुरुचरणसद्भक्तिसुधारसं पीतवान्। अर्थात् पूज्यपादरामकृष्णपरमहंसमहोदयात् वेदान्तशास्त्रस्य सम्यग् अध्ययनम् अकरोत्। गुरुकृपासामर्थ्येन च अप्रतिरुद्धमहाशक्तिप्रभावेण स्वामिना विवेकानन्देन रोगाणुसंयुक्तं जलं पीत्वा मृत्युदेवः अपि तरस्कृतः।अ त्रायमाशयःव र्ततेय द्अ सौस् वामीग ुरोःकृ पयाश ाास्त्राणामध्ययनंकृ त्वाप ारङ्गतोऽभूत्ए वञ्च रोगाणुयुक्तं जलं पीत्वाऽपि रुग्णः नाऽभवत्। अतः गुरोः कृपा लोके सर्वोपरि वर्तते इति भावोऽत्र बोध्यः।

**व्याकरणात्मकटिप्पणी** – आङ्ग्लसाहित्यसूताम् = आङ्ग्लानां साहित्यम्–आङ्ग्लसाहित्यम् (ष.तत्पु.)। आङ्ग्लसाहित्यात् सूता (पं.तत्पु.) ताम् आङ्ग्लसाहित्यसूताम्। नवमतसुराम् = नवञ्च तत् मतम् नवमतम्, नवमतमेव सुरा (कर्म.स.) ताम् नवमतसुराम्। पीत्वा = पा+क्त्वा (त्वा) (अव्ययशब्दः) गुरुचरणसद्भक्तिपीयूषधारा = गुरुचरणयोः सद्भक्तिः–गुरुचरणसद्भक्तिः (ष.तत्पु.), गुरुचरणसद्भक्ति एव पीयूषधारा – गुरुचरणसद्भक्तिपीयूषधारा (कर्म.स.)। तत्सामर्थ्याव्यवहितमहाशक्तिना = तस्य सामर्थ्यम् तत्सामर्थ्यम् (ष.स.), तत्सामर्थ्येन अव्यवहिता महाशक्तिः यस्य सः (बहु.स.) तेनः तत्सामर्थ्याव्यवहितमहाशक्तिना। यूना = युवन्+टा (आ) (तृ.वि.ए.व.)। अन्तकः = अन्तयति अन्तं करोति वा अन्त्+ण्वुल् (वु. अक) + सु (प्र.वि.ए.व.)। धिक्कृतः = धिक्+कृ+क्त (त) + सु (क्रियावाचकः शब्दः)।

**छन्दः** – अस्मिन् पद्ये 'मन्दाक्रान्ता' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अत्र नरेन्द्रदेवः ब्रह्मचर्यमाश्रित्य गुरुसेवां विधाय श्रेष्ठशिष्यपदवीमलभत इति वर्णयन् कविः कथयति यत्–

**मामाश्रित्य स्वगुरुचरणोपासनाऽसंख्यरूपैः,**
**श्रीकृष्णाद्यैरपि सुरवरैः साधिता नो मया तु।**
**इत्येवाद्याश्रम इह नरेन्द्रस्य सम्प्राप्य रूपं,**
**सच्छिष्यत्वं स्वयमिव गतो रामकृष्णस्य तस्य।।८।।**

**पदच्छेदः**– माम् आश्रित्य स्वगुरुचरण–उपासना असंख्यरूपैः श्रीकृष्णाद्यैः अपि सुरवरैः साधिता नो मया तु इति एव आद्य आश्रम इह नरेन्द्रस्य सम्प्राप्य रूपम्, सत् शिष्यत्वं स्वयम् इव गतः रामकृष्णस्य तस्य।

**अन्वयः**– श्रीकृष्णाद्यैः सुरवरैः अपि माम् आश्रित्य असंख्यरूपैः स्वगुरुचरणोपासना साधिता मया तु नो (साधिता) इत्येव आद्याश्रमः इह नरेन्द्रस्य रूपं सम्प्राप्य तस्य रामकृष्णस्य सच्छिष्यत्वम् इव गतः।

**व्याख्या**– श्रीकृष्णाद्यैः = श्रीकृष्णप्रमुखैः, सुरवरैरपि = देवश्रेष्ठैरपि, माम् = नरेन्द्रदेवम्, आश्रित्य = आश्रयणं विधाय (आलम्ब्य), असंख्यरूपैः =विविधप्रकारैः, स्वगुरुचरणोपासना = स्वकीयगुरुपादयोः शुश्रुषा, साधिता = विहिता (आचरिता, कृता), मया = विवेकानन्देन, तु = किन्तु, नो = नहि (साधिता) इत्येव = एवं विचिन्त्य एव, आद्याश्रमः = ब्रह्मचर्याश्रयः (प्रथमाश्रमः), इह = अस्मिन् आश्रमे (अत्र), नरेन्द्रस्य = विवेकानन्दस्य, रूपम् = स्वरूपम् (आकृतिम्, वेशम्), सम्प्राप्य = लब्ध्वा (अधिगत्य), तस्य = सुविख्यातस्य, रामकृष्णस्य = स्वामिनः रामकृष्णपरमहंसस्य, सच्छिष्यत्वम् = श्रेष्ठान्तेवासित्वम्, इव = यथा , गतः = सम्प्राप्तः ।

**भावार्थः** – विवेकानन्दस्य ब्रह्मचर्याश्रमकालः आङ्ग्लभाषाया अध्ययने व्यतीतः। सः अचिन्तयत् यत् श्रीकृष्णादयः प्रमुखाः देवा अपि बाल्यावस्थायां ब्रह्मचर्यमाश्रित्य स्व–स्व गुरूणां नानाविधं सेवां विधाय स्वकीयं जीवनं धन्यधन्यं कृतवन्तः, किन्तु ब्रह्मचर्याश्रमकाले अहं गुरुशुश्रूषां न अकरवम्, इति विचिन्त्य नरेन्द्रदेवरूपं गृहीत्वाऽहं गुरोः रामकृष्णपरमहंसस्य अन्यतमः विशिष्टः शिष्योऽभवम्।

**व्याकरणात्मकटिप्पणी**– श्रीकृष्णाद्यैः – आदौ भवः आद्यः, श्रीकृष्णः आद्यः येषां ते श्रीकृष्णाद्याः (बहु.स.) तैः –श्रीकृष्णाद्यैः। सुरवरैः = सुराणां सुरेषु वा वरः (निर्धारणे ष.स.वि.) (ष.स.तत्पु.) तैः –सुरवरैः।

आश्रित्य = आङ्+श्रि+तुक्+ल्यप् (अव्ययशब्दः)। स्वगुरुचरणोपासना = स्वगुरुचरणयोः उपासना स्वगुरुचरणोपासना (ष.स.)। साधिता = साध्+इट्+क्त+टाप् (आ) (क्रियाशब्दः)। आद्याश्रमः = आद्यः चासौ आश्रमः - आद्याश्रमः (कर्म.स.)। नरेन्द्रस्य = नराणाम् इन्द्रः नरेन्द्रः (ष.तत्पु.) तस्यः नरेन्द्रस्य। सम्प्राप्य = सम्+प्र+आप्+ल्यप् (य) (अव्ययशब्दः)। सच्छिष्यत्वम् = सत् शिष्यस्य भावः कर्म वा - सच्छिष्य + त्व+अम् (द्वि.वि.ए.व.)। गतः = गम्+क्त (त)+सु (क्रियापदम्)।

**छन्दः**- अस्मिन् पद्ये 'मन्दाक्रान्ता' नामधेयं वृत्तं वर्तते।

## अभ्यास-प्रश्नाः

**(क) बहुविकल्पात्मकप्रश्नाः-**

**निम्नलिखितानां प्रश्नानाम् उत्तराणि संकेताक्षरमाध्यमेन कोष्ठके प्रदेयानि-**

१. 'विवेकानन्दविजयम्' इत्याख्यस्य नाटकस्य लेखकोऽस्ति-

(क) डॉ. प्रभाकरशास्त्री (ख) डॉ. श्रीधरभास्कर वर्णेकरः

(ग) भट्ट मथुरानाथशास्त्री (घ) डॉ. ब्रह्मानन्द शर्मा ( )

२. 'विवेकानन्दविजयम्' इति नाम्नि नाटके कस्य चरितं वर्णितमस्ति-

(क) स्वामिनः रामकृष्णपरमहंसस्य (ख) महर्षिदयानन्दस्य

(ग) स्वामिनः विवेकानन्दस्य (घ) स्वामिनः विरजानन्दस्य ( )

३. नरेन्द्रदेवः शिष्यत्वं गृह्णाति-

(क) स्वामिनः दयानन्दस्य (ख) स्वामिनः विवेकानन्दस्य

(ग) स्वामिनः अखण्डानन्दस्य (घ) रामकृष्णपरमहंसस्य ( )

४. इह लोके कीदृशः मानवः श्लाघ्यतमः-

(क) धनी (ख) शक्तिशाली

(ग) विवेकी (घ) न कोऽपि ( )

५. अन्तकः केन धिक्कृतः-

(क) स्वामी विवेकानन्देन (ख) महर्षिविरजानन्देन

(ग) रामकृष्णपरमहंसेन (घ) महर्षिदयानन्देन ( )

**(ख) अतिलघूत्तरात्मकाः प्रश्नाः-**

(क) अस्मिन् लोके कः जीवः श्लाघ्यतमः?

(ख) विवेकानन्देन धर्मग्लानिः कथं निरस्ता?

(ग) सद्भावुकाः विवेकानन्दस्य सङ्गीतस्वरमाधुर्यं श्रुत्वा कां प्राप्तवन्तः?

(घ) किं दृष्ट्वा गौरमुखानां मनसि कृष्णभावः सञ्जातः?

(ङ) कस्य दृक्पातैः कुत्र राष्ट्रशक्तिः आहिता?

**(ग) लघूत्तरात्मकाः प्रश्नाः-**

(क) विवेकानन्दस्य दृष्टौ हंसः किमर्थं वन्द्यः?

(ख) भारतभूवैजयन्ती विवेकानन्देन कथम् उच्चैः नीता?

(ग) के जनाः प्रतिपदं केन प्रकारेण ज्ञानानन्दम् अन्वभवन्?

(घ) विवेकानन्दस्य शब्दे शब्दे पादे पादे च का आसीत्?

(ङ) विवेकानन्द: आदौ आङ्ग्लसाहित्यम् अधीत्य पश्चात् किं कृतवान्?

**(घ) सामान्य-प्रश्ना:–**

**१. अधोलिखितानां श्लोकानां संस्कृते व्याख्या कार्या–**

(क) तेन ध्वस्तं जडमतवताम् ......................... जयन्ती।

(ख) दृष्ट्वा विद्याविभवमतुलं ......................... कृष्णभाव:।

(ग) पीत्वाऽप्यादौ नवमतसुराम् ......................... ह्यन्तकोऽपि।

**२. निम्नाङ्कितानां श्लोकानां संस्कृते भावार्थो लेखनीय:–**

(क) अम्भोदेतरवारिबिन्दु ......................... विवेक: पर:।

(ख) तत्सङ्गीतस्वरमधुरिका ......................... जनानाम्।

(ग) तस्योद्गारै:स्थिरपदम् ......................... नाम्ना विवेक:।

**३. निम्नाङ्कितयो: श्लोकयो: अन्वय: करणीय:–**

(क) शब्दे शब्दे भुवनजयिनी ......................... धर्मशक्ति:।

(ख) मामाश्रित्य स्वगुरु ......................... रामकृष्णस्य तस्य।

**(ङ) व्याकरणज्ञानविषयका: प्रश्ना:–**

**१. निम्नाङ्कितपदानां सन्धिविच्छेद: कार्य:–**

(क) ह्युच्चैर्नीता ......................... ।

(ख) तन्मुखाब्जे ......................... ।

(ग) पीत्वाप्यादौ ......................... ।

(घ) इत्येवाद्याश्रम ......................... ।

(ङ) सच्छिष्यत्वम् ......................... ।

**२. निम्नाङ्कितपदानां सन्धि: कार्य:–**

(क) हंस:+तु ......................... ।

(ख) दृश्+क्त्वा ......................... ।

(ग) तद्दृक्पातै:+जनगणमन: सु+आहिता ......................... ।

(घ) हि+अन्तक:+अपि ......................... ।

(ङ) तस्य+उद्गारै: ......................... ।

**३. निम्नाङ्कितपदानां समासविग्रहो विधेय:–**

(क) वासन्तेतरवासरेषु ......................... ।

(ख) भारतभूवैजयन्ती ......................... ।

(ग) अशुचिचरितानाम् ......................... ।

(घ) भुवनजयिनी ......................... ।

(ङ) सर्वपाखण्डजातम् ......................... ।

**४. अधोलिखितानां पदानां समासो विधेय:–**

(क) एकञ्च तदातपत्रम् ......................... ।

(ख) अशुचि चरितं येषां ते .......................... ।

(ग) जनानां गणः, तस्य मनः, तेषु .......................... ।

(घ) सर्वं च तद् पाखण्डजातम् .......................... ।

(ङ) गुरुचरणयोः सद्भक्तिः .......................... ।

**५. अधोलिखितक्रियापदेषु उपसर्ग-धातु-लकार-पुरुषादीन् निर्दिशत—**

(क) पाप .......................... ।

(ख) अभूत् .......................... ।

(ग) निहिते .......................... ।

(घ) प्रमुदिता .......................... ।

(ङ) विचलितम् .......................... ।

**६. निम्नाङ्कितपदेषु मूलशब्दं, लिङ्गं, विभक्तिं, वचनं च निर्दिशत—**

(क) यस्मिन् .......................... ।

(ख) मन्त्रशक्त्या .......................... ।

(ग) सद्भावुकानाम् .......................... ।

(घ) आह्वानैः .......................... ।

(ङ) मया .......................... ।

**७. स्वामिनः विवेकानन्दस्य जीवनवृत्तं लिखत।**

**८. अस्धातोः भूधातोश्च लट्लकारस्य रूपाणि लिखत।**

**९. पाठेऽस्मिन् क्त्वाप्रत्ययान्तं पदं चित्वा लिखत।**

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

१. ख     २. ग     ३. घ     ४. ग     ५. क

# पञ्चमः पाठः

# रघुकौत्ससंवादः

## कविपरिचयः

कविकुलगुरुः महाकविः कालिदासः संस्कृतसाहित्याकाशे प्रकाशमानम् अद्वितीयं नक्षत्रमिव मन्यते। अस्य जन्मकालविषये मुख्यतः मतद्वयं प्रामाणिकरूपेण स्वीक्रियते–(१)विक्रमसंवत्संस्थापकस्य विक्रमादित्यस्य राज्यकाले ईसवीयपूर्वप्रथमशताब्द्याम्। (२) ईसवीयचतुर्थशताब्द्यां गुप्तकाले च । अत्र प्रथमं मतमेव भारतीयाः विद्वांसः स्वीकुर्वन्ति, द्वितीयञ्च पाश्चात्याः। अयं महाकविः न केवलं पद्यकाव्यरचनायां स्वकीयं वैशिष्ट्यं प्रतिपादयति अपितु नाट्यरचनायामपि अपूर्वं वैशारद्यं विदधाति। अस्य महाकवेः सप्त ग्रन्थाः समुपलभ्यन्ते–

| | | | |
|---|---|---|---|
| १. रघुवंशम् | २. कुमारसंभवम् | – महाकाव्यम् | |
| ३. मेघदूतम् | ४. ऋतुसंहारम् | – गीतिकाव्यम् | |
| ५. अभिज्ञानशाकुन्तलम् | ६. विक्रमोर्वशीयम् | ७. मालविकाग्निमित्रम् | – नाटकग्रन्थाः |

महाकवेः कालिदासस्य सर्वासु रचनासु 'अभिज्ञानशाकुन्तलम्' इति नामधेयं नाटकं नाट्यशास्त्रदृष्ट्या–श्रेष्ठं मन्यते। अत एव उक्तं यत्–

**''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।**
**तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्।।''इति।**

महाकवेः काव्यसौन्दर्यं विलोक्य सहृदयाः विद्वांसः तस्य काव्यकौशलं प्रतिपदं प्रशंसन्ति। अयं महाकविः उपमालङ्कारस्य प्रयोगे सर्वानपि महाकवीन् अतिशेते। उक्तञ्च –

**''उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।''इति।**

अस्य उपमालङ्कारस्य प्रयोगः अखिलेऽपि काव्ये विद्युद् इव विद्योतते। उपमा प्रयोगे कवेः अपूर्वं वैशारद्यं विद्यते। अस्य काव्येषु उपमाप्रयोगस्थलानि शतशः सन्ति किन्तु रघुवंशमहाकाव्ये तु उपमाप्रयोगः सर्वातिशायी वर्तते। एतद् विरचितं रघुवंशमहाकाव्यम् एकोनविंशतिसर्गात्मकं वर्तते। अत्र इक्ष्वाकुवंशोद्भवानां दिलीप–रघु–अज–दशरथ–प्रभृतीनां नृपाणां वर्णनं विद्यते। रघुवंशमहाकाव्यस्य 'पञ्चमसर्गम्' लोकविश्रुतस्य रघुकौत्ससंवादस्य केचन श्लोकाः पाठेऽस्मिन् सङ्गृहीताः सन्ति।

**पाठपरिचयः**– कविकुलशिरोमणि–महाकविकालिदासविरचितेषु सर्वेषु काव्येषु, रघुवंशमहाकाव्यम् अन्यतमं वर्तते। अस्य महाकाव्यस्य पञ्चमसर्गस्य वैशिष्ट्यं गुरुशिष्यपरम्परायाः कृते लोके विश्रुतमस्ति। अस्य कथानकं वाल्मीकिरामायणतः गृहीतमस्ति। एकदा महर्षेः वरतन्तोः शिष्यः कौत्समुनिः चतुर्दशविद्याम् अधीत्य शास्त्राध्ययनानन्तरम् अधिगतविद्यायाः प्रतिष्ठार्थं नूनं दक्षिणाप्रदेया इति मनसि निधाय गुरवे निवेदयति स्म तदानीं तस्य विशिष्टां गुरुसेवामेव सर्वोपरि मत्वा गुरुणा गुरुदक्षिणा नैव इष्टा, किन्तु गुरुदक्षिणायाः कृते पुनः पुनः निर्बन्धेन क्रुद्धः सन् गुरुः चतुर्दश कोटीसुवर्णमुद्राम् आनेतुं कौत्सम् आदिष्टवान्। यदा अयोध्यायां महाराजः रघुः 'विश्वजित्' इति नामके यज्ञे स्वकीयं सर्वस्वं धन–ऐश्वर्यादिकं दक्षिणायां ब्राह्मणेभ्यः याचकेभ्यश्च अयच्छत् तदा स गुरुदक्षिणार्थी कौत्समुनिः नृपं

निकषा समायातः। अतिथिसेवापरायणः नृपः सुवर्णपात्रं विनाऽपि मृण्मयपात्रादिभिः समागतं ब्रह्मचारिणं शास्त्रोक्तविधिना समर्च्य प्रणामाञ्जलिपूर्वकमागमनस्य कारणञ्च अपृच्छत्। गुरुदक्षिणार्थी कौत्समुनिः नृपस्य आतिथ्यं स्वीकृत्य मृण्मयपात्रं च विलोक्य भग्नमनोरथः सन् नृपम् अवदत् यत् हे राजन्! अस्माकम् आश्रमे सर्वं कुशलं वर्तते। भवति विद्यमाने सति दुःखंः कथम् आगन्तुं शक्नोति, यथा सूर्ये विद्यमाने सति तमः स्थातुं न शक्नोति। भवतः कुले भक्तिपरम्परा सनातना अस्ति, किन्तु अहमत्र विलम्बेन समागतोऽस्मि। एतदुक्त्वा कौत्सः यदा प्रस्थातुमभिलषति तदा नृपः आगमनस्य कारणं पृच्छति, तद् ज्ञात्वा गुरुदक्षिणायै च किं देयं कियच्च देयमस्ति? तदा कौत्सः चतुर्दश कोटीसुवर्णमुद्रा गुरुदक्षिणायां गुरुणा आनेतुम् आदिष्टा, एतदर्थमत्र समागतोऽस्मि, किन्तु सम्प्रति भवताम् इमां स्थितिं विलोक्य अन्यत्र गन्तुमिच्छामि, तदा नृपः तं कौत्सं स्वकीययज्ञशालां द्वित्राणि दिनानि स्थातुं कथयति। नृपः धनपतेः कुबेरस्योपरि आरोहयितुमिच्छति प्रातःकाले द्वारपालः आगत्य सुवर्णमुद्रायाः वर्षणं सूचयति। नृपः कुबेरात् प्राप्तसुवर्णराशिं कौत्साय समर्पयति किन्तु गुरुदक्षिणार्थी कौत्सः केवलं गुरुदक्षिणाराशिमेव स्वीकरोति, एवविधं दातृयाचकयोः एतादृशं समर्पणं विलोक्य अयोध्यावासिनः भूरिशः तौ प्रशंसयामासुः। ततः कौत्समुनिः पुत्रं लभस्व स्वगुणानुरूपम् इति आशीर्वचनं प्रदाय प्रस्थानं करोति।

## रघुकौत्ससंवादः

**सन्दर्भः**– प्रस्तुतमिदं पद्यं कविकुलगुरुमहाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य पंचमसर्गाद् गृहीतोऽस्ति।

**प्रसङ्गः**– अस्मिन् पद्ये महर्षेः वरतन्तोः शिष्यः कौत्सः गुरुदक्षिणाप्राप्तये महाराजं रघुं निकषा समागच्छत् इति वर्णयन् कविः कथयति यत् –

**तमध्वरे विश्वजिति क्षितीशं,**
**निःशेषविश्राणितकोषजातम्।**
**उपात्तविद्यो गुरुदक्षिणार्थी,**
**कौत्सः प्रपेदे वरतन्तुशिष्यः।।१।।**

**पदच्छेदः**– तम् अध्वरे विश्वजिति क्षितीशम् निःशेषविश्राणितकोषजातम्, उपात्तविद्यः गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः।

**अन्वयः**– विश्वजिति अध्वरे निःशेषविश्राणितकोषजातं तं क्षितीशम् उपात्तविद्यः गुरुदक्षिणार्थी वरतन्तुशिष्यः कौत्सः प्रपेदे।

**व्याख्या**– विश्वजिति = विश्वजित्-नामके, अध्वरे = यज्ञे (क्रतौ), निःशेषविश्राणितकोषजातम् = सम्पूर्णप्रदत्तधनराशिम्, तं क्षितीशम् = तं पृथ्वीपतिम् (नृपं रघुम्), उपात्तविद्यः = अधीतचतुर्दशविद्यः, गुरुदक्षिणार्थी = अध्ययनान्ते गुरवे समर्पणीयविद्यानिष्क्रयधनेच्छुकः, वरतन्तुशिष्यः = वरतन्तुनामधेयस्य आचार्यस्य अन्तेवासी, कौत्सः = कौत्सनामधेयः मुनिः, प्रपेदे = प्राप्तवान्।

**भावार्थः**– यदा महाराजः रघुः विश्वजिति यज्ञे स्वकीयम् अखिलमपि साम्राज्यं ब्राह्मणेभ्यः याचकेभ्यश्च अयच्छत् तदा अधिगतचतुर्दशविद्यः कौत्सनामधेयः वरतन्तूपाध्यायस्य शिष्यः आचार्याय दक्षिणां दातुकामः धनप्राप्तये नृपं रघुं निकषा समागतः।

**व्याकरणात्मकटिप्पणी**– विश्वजिति = विश्वं जयति यस्मिन् तत्–विश्वजित्, तस्मिन् = विश्वजिति (बहु.स.)। निःशेषविश्राणितकोषजातम् = निःशेषं विश्राणितं कोषजातं येन असौ निःशेषविश्राणितकोषजातः, तम् –

निःशेषविश्राणितकोषजातम्( बहु.स.) ।क्षितीशम् = क्षिति+ईशम् =( दीर्घसन्धिः) ,क्षितेःईशः = क्षितीशः,तम्–क्षितीशम् (ष.त.) । उपात्तविद्यः = उपात्ता विद्या येन सः = उपात्तविद्यः (बहु.स.) । वरतन्तुशिष्यः = वरतन्तोः शिष्यः – वरतन्तुशिष्यः (ष.त.)। गुरुदक्षिणार्थी = गुरोः दक्षिणा–गुरुदक्षिणा, गुरुदक्षिणायाः अर्थी–गुरुदक्षिणार्थी (ष.त.)। गुरुदक्षिणा+अर्थी = गुरुदक्षिणार्थी (दीर्घसन्धिः) । प्रपेदे = प्र+पद्+लिट्+त (प्र.पु.ए.व.) ।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये महाराजः रघुः गुरुदक्षिणेच्छुकं समागतं कौत्सं समर्च्य प्रार्थयति यत्–

**तमर्चयित्वा विधिवद्विधिज्ञः**
**तपोधनं मानधनाग्रयायी।**
**विशाम्पतिर्विष्टरभाजमारात्**
**कृताञ्जलिः कृत्यविदित्युवाच।।२।।**

**पदच्छेदः**– तम् अर्चयित्वा विधिवद् विधिज्ञः तपोधनम् मानधनाग्रयायी, विशाम्पतिः विष्टरभाजम् आरात् कृताञ्जलिः कृत्यविद् इति उवाच।

**अन्वयः**– विधिज्ञः मानधनाग्रयायी कृत्यवित् विशाम्पतिः तपोधनम् आरात् विष्टरभाजं तं विधिवत् अर्चयित्वा कृताञ्जलिः (सन्) इति उवाच।

**व्याख्या**– विधिज्ञः = शास्त्रज्ञः (शास्त्रवेत्ता), मानधनाग्रयायी = महतामग्रेसरः, (सम्मानभाजानामग्रणीः), कृत्यवित् = व्यवहारकुशलः, विशाम्पतिः = प्रजानामधिपः (महाराजः रघुः), तपोधनम् = तपोनिष्ठम्, आरात् = समीपे उपविश्य, विष्टरभाजम् = आसने उपविष्टम् (आसनासीनम्), तम् = गुरुदक्षिणार्थिनं कौत्सम्, विधिवत् = यथाशास्त्रम् (शास्त्रविधिना), अर्चयित्वा = पूजयित्वा, (सम्पूज्य) कृताञ्जलिः = बद्धाञ्जलिः (हस्तौ सम्पुटीकृत्य) सन्, इति = इत्थम् (एवंविधम्) उवाच = अवदत्।

**भावार्थः**– शास्त्रनियमवेत्ता महतामग्रणीः व्यवहारकुशलः महाराजः रघुः आसने विराजमानं गुरुदक्षिणार्थिनं तपस्विनं कौत्समुनिं शास्त्रोक्तविधिना सम्यक् सम्पूज्य बद्धाञ्जलिः सन् सादरमित्थमवदत्।

**व्याकरणात्मकटिप्पणी**– विधिज्ञः = विधिं जानातीति–विधिज्ञः (उप.स.) । मानधनाग्रयायी = मान एव धनं येषां ते–मानधनाः (बहु.स.)। मानधनानाम् अग्रयायी–मानधनाग्रयायी (ष.त.)। विष्टरभाजम्= विष्टरं भजतीति विष्टरभाक् (उप.स.) तम्– विष्टरभाजम्। कृताञ्जलिः = कृतः अञ्जलिः येन असौ कृताञ्जलिः (बहु.स.)। आरात् (अव्ययपदम्)। अर्चयित्वा = अर्च+णिच्+क्त्वा (त्वा) (अव्ययशब्दः)। उवाच = ब्रू (वच्)+लिट्+तिप् (प्र.पु.ए.व.) । अग्रयायी = अग्रे+या+णिनि (इन्)+सु (प्र.वि.ए.व.) ।

**छन्दः**– अस्मिन् पद्ये 'उपेन्द्रवज्रा' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये महाराजः रघुः मुनेः कौत्सस्य गुरोः कुशलवृतान्तं पृच्छति –

**अप्यग्रणीर्मन्त्रकृतामृषीणां,**
**कुशाग्रबुद्धे! कुशली गुरुस्ते।**
**यतस्त्वया ज्ञानमशेषमाप्तं,**
**लोकेन चैतन्यमिवोष्णरश्मेः।।३।।**

**पदच्छेदः**– अपि अग्रणीः मन्त्रकृताम् ऋषीणाम् कुशाग्रबुद्धे ! कुशली गुरुः ते, यतः त्वया ज्ञानम् अशेषम् आप्तं लोकेन चैतन्यम् इव उष्णरश्मेः।

**अन्वयः**– हे कुशाग्रबुद्धे ! मन्त्रकृताम् ऋषीणाम् अग्रणीः ते गुरुः कुशली अपि? यतः त्वया अशेषं ज्ञानम् उष्णरश्मेः लोकेन चैतन्यम् इव आप्तम्।

**व्याख्या**- हे कुशाग्रबुद्धे! = हे अतिसूक्ष्ममते! (हे अतितीक्ष्णधि!), मन्त्रकृताम् = मन्त्रद्रष्टृणाम्, ऋषीणाम् = महर्षीणाम्, अग्रणीः = श्रेष्ठः, (अग्रगामी), ते = तव (भवतः;कौत्सस्य), गुरुः = आचार्यः (वरतन्तुः), कुशली अपि = प्रसन्नः किम्? यतः = यस्मात्, गुरोः = आचार्यात्, त्वया = भवता (कौत्सेन), अशेषम् = अखिलम् (सम्पूर्णम्), ज्ञानम् = तत्त्वम्, उष्णरश्मेः = सूर्यात् (भास्करात्), लोकेन = जनेन, चैतन्यम् = प्रबोधम्, इव = यथा, आप्तम् = प्राप्तम् (अधिगतम्)।

**भावार्थः**- अपि तीक्ष्णमते! येन प्रकारेण लोकः प्रकाशमानस्य सूर्यस्य आलोकेन प्रबोधं गृह्णाति तेनैव प्रकारेण भवताऽपि मन्त्रद्रष्टृणाम् अग्रगण्यात् यस्मात् गुरोः सम्पूर्णं ज्ञानं लब्धम्, भवतः असौ गुरुः महर्षिवर्यः वरतन्तुः कुशलेन वर्तते किम्? इत्यभिप्रायः।

**व्याकरणात्मकटिप्पणी**- कुशाग्रबुद्धे! = कुशस्य अग्रं कुशाग्रम् (ष.त.), कुशाग्रम् इव तीक्ष्णा बुद्धिर्यस्य असौ-कुशाग्रबुद्धिः (बहु.स.) तस्य सम्बोधने-कुशाग्रबुद्धे!। मन्त्रकृताम् = मन्त्रं कुर्वन्तीति मन्त्रकृतः (उप.स.) तेषाम्-मन्त्रकृताम्। ऋषीणाम् = ऋषि+आम् (ष.वि.ब.व.)। अग्रणीः = अग्रे गच्छतीति-अग्रणीः (उप.स.)। कुशली = कुशलम् अस्तीति-कुशली (उप.स.)। त्वया = युष्मद्+टा (तृ.वि.ए.व.)। अशेषम् = नास्ति शेषो यस्य तत् (नञ्.त.स.)। उष्णरश्मेः = उष्णाः रश्मयः यस्य असौ-उष्णरश्मिः (बहु.स.) तस्मात्-उष्णरश्मेः। आप्तम् = आप्+क्त+सु (क्रियापदम्)।

**छन्दः**- अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- अस्मिन् पद्ये महाराजः रघुः कौत्समुनेः आगमनस्य प्रयोजनं ज्ञातुमभिलषति-

**तवार्हतो नाभिगमेन तृप्तं,**
**मनोनियोगक्रिययोत्सुकं मे।**
**अप्याज्ञया शासितुरात्मना वा,**
**प्राप्तोऽसि सम्भावयितुं वनान्माम्।।४।।**

**पदच्छेदः**- तव अर्हतः न अभिगमेन तृप्तं मनः नियोगक्रियया उत्सुकम् मे, अपि आज्ञया शासितुः आत्मना वा, प्राप्तः असि सम्भावयितुं वनात् माम्।

**अन्वयः**- अर्हतः तव अभिगमेन मे मनः न तृप्तम्, किन्तु नियोगक्रियया उत्सुकं शासितुः आज्ञया अपि आत्मना वा मां सम्भावयितुं वनात् प्राप्तोऽसि।

**व्याख्या**- अर्हतः = पूजार्हस्य विदुषः, तव = भवतः (कौत्सस्य), अभिगमेन = आगमनमात्रेण, मे = मम (नृपस्य रघोः), मनः = चेतः (अन्तःकरणम्), न = नहि, तृप्तम् = सन्तुष्टम्, किन्तु = परन्तु, नियोगक्रियया = आज्ञाकरणे, उत्सुकम् = उत्कण्ठितम्, शासितुः = शिक्षकस्य (गुरोः), आज्ञया = निर्देशेन, वा = अथवा, आत्मना = स्वयमेव, माम् = नृपं रघुम्, सम्भावयितुम् = अनुग्रहीतुम्, वनात् = आश्रमात्, प्राप्तोऽसि = समागतोऽसि।

**भावार्थः**- महाराजः रघुः कथयति यत्- हे ब्रह्मचारिन्! भवतः दर्शनमात्रेण मम मनः न तृप्यति, अपितु भवतः आज्ञाश्रवणविषये मम उत्कण्ठा वर्द्धते, अत एव कथय किं भवान् गुरोराज्ञया स्वयमेव वा माम् अनुग्रहीतुम् आश्रमाद् अत्र समायातोऽस्ति।

**व्याकरणात्मकटिप्पणी**-अ र्हतः =अ र्हतीतिअ र्हन्,त स्य-अ र्हतः( ष.वि.ए.व.)।त व =य ुष्मद्+ङस् (ष.वि.ए.व.)। अभिगमेन = अभि+गम+टा(इन) (तृ.वि.ए.व.)। मे = अस्मद्+ङस् (मम स्थाने 'मे' आदेशः) (ष.वि.ए.व.)। तृप्तम् = तृप्+क्त+सु (क्रियापदम्)। नियोगक्रियया = नियोगस्य क्रिया-नियोगक्रिया (ष.त.), तया-नियोगक्रियया। शासितुः = शास्+तृच् (तृ.)+ङस् (ष.वि.ए.व.)। आज्ञया = आज्ञा+टा (तृ.वि.ए.व.)। आत्मना =

आत्मन्+टा (तृ.वि.ए.व.)। सम्भावयितुम् = सम्+भू+णिच्+तुमुन् (तुम्)(अव्ययपदम्)। प्राप्तः = प्र+आप्+क्त (त)+सु (क्रियापदम्)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अत्र मुनिः कौत्सः महाराजस्य रघोः पुरतः नृपस्य वैशिष्ट्यं महता नैपुण्येन प्रस्तौति–

**सर्वत्र नो वार्तमवेहि राजन्,**

**नाथे कुतस्त्वय्यशुभं प्रजानाम्।**

**सूर्ये तपत्यावरणाय दृष्टेः,**

**कल्पेत लोकस्य कथं तमिस्रा।।५।।**

**पदच्छेदः**– सर्वत्र नः वार्तम् अवेहि राजन् नाथे कुतः त्वयि अशुभम् प्रजानाम्, सूर्ये तपति आवरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा।

**अन्वयः**– हे राजन्! सर्वत्र नः वार्तम् अवेहि, त्वयि नाथे सति प्रजानाम् अशुभं कुतः? सूर्ये तपति सति तमिस्रा लोकस्य दृष्टेः आवरणाय कथं कल्पेत।

**व्याख्या**– हे राजन्! = हे नृप!, सर्वत्र = सर्वस्मिन् विषये, नः = अस्माकम्, वार्तम् = अनामयम् (शुभम्), अवेहि = जानीहि (अवगच्छ), त्वयि = भवति, नाथे = स्वामिनि (रक्षके), सति = विद्यमाने, प्रजानाम् = लोकानाम् (प्रजाजनानाम्) अशुभम् = दुःखादिकम् (कष्टादिकम्), कुतः? = कथं स्यात्? सूर्ये = भगवति भास्करे, तपति सति = प्रकाशमाने जाते, तमिस्रा = रात्रिः (निशा), लोकस्य = जनस्य, दृष्टेः = नेत्रस्य (चक्षुषः), आवरणाय = आच्छादनाय, कथम् = केन प्रकारेण, कल्पेत = समर्थो भवेत् (सम्पद्येत)।

**भावार्थः**– गुरुदक्षिणार्थी कौत्सः कथयति यत् – हे राजन्! वयं बाढं कुशलिनः, अस्माकं सर्वथा कुशलं विद्यते। भवति जागरूके प्रजानाथे विद्यमाने सति लोकस्य अकुशलं कथं स्यात्? नहि भगवति सूर्ये प्रकाशमाने तमः (अन्धकारः) लोकस्य नेत्राणि विहन्तुं समर्थः भवति।

**व्याकरणात्मकटिप्पणी**– सर्वत्र = सर्व+ङि+त्रल्(त्र) (अव्ययशब्दः)। वार्तम् = वृत्ति+अण्+अम् (द्वि.वि.ए.व.) ।अ वेहि =अ व+इण्(इ)+लोट्+सिप्( म.पु.ए.व.) ।त वयि =य ुष्मद्+ङि( स.वि.ए.व.) ।स ति = अस्+शतृ(अत्)+ङि(स.वि.ए.व.)। प्रजानाम् = प्रजा+आम् (ष.वि.ए.व.)। कुतः = किम्+तसिल् (तस्) (किमः स्थाने कु–आदेशः)। तपति = तप्+शतृ(अत्)+ङि (स.वि.ए.व.)। सूर्ये = सरति आकाशे इति सूर्यः, तस्मिन् सूर्ये (स.वि.ए.व.)। तमिस्रा = तमिस्र+टाप्(आ)+सु(प्र.वि.ए.व.)। दृष्टेः = दृश्+क्तिन्(ति)+ङस् (ष.वि.ए.व.)। आवरणाय = आसमन्तात् वरणमिति आवरणम्, तस्मै–आवरणाय (च.वि.ए.व.)। कल्पेत = कल्प्+विधिलिङ्+त(प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'इन्द्रवज्रा' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये महाराजः रघुः गृहस्थाश्रमे प्रवेशयोग्यं कौत्सं विलोक्य तस्मिन् विषये पृच्छति यत्–

**अपि प्रसन्नेन महर्षिणा त्वं,**

**सम्यग्विनीयानुमतो गृहाय।**

**कालो ह्ययं सङ्क्रमितुं द्वितीयं**

**सर्वोपकारक्षममाश्रमं ते।।६।।**

**पदच्छेदः**– अपि प्रसन्नेन महर्षिणा त्वम् सम्यग् विनीय अनुमतः गृहाय, कालः हि अयम् सङ्क्रमितुम् द्वितीयम् सर्व–उपकारक्षमम् आश्रमम् ते।

**अन्वयः**– त्वं प्रसन्नेन (सता) महर्षिणा सम्यग् विनीय गृहाय अनुमतः अपि हि ते सर्वोपकारक्षमं द्वितीयम्

आश्रमं सङ्क्रमितुम् अयं कालः अस्ति।

**व्याख्या**– त्वम् = भवान् (कौत्सः), प्रसन्नेन = सन्तुष्टेन (हर्षितेन), (सता = भवता), महर्षिणा = मन्त्रद्रष्ट्रा महर्षिणा वरतन्तुना, सम्यक् = यथेष्टम्, विनीय = शिक्षयित्वा (विद्यां प्रदाय), गृहाय = गृहस्थाश्रमं प्रवेष्टुम्, अनुमतः अपि = आज्ञापितोऽसि कच्चित्? हि = यतोहि, ते = तव (भवतः), सर्वोपकारक्षमम् = सकलाश्रमोपकारकम्, द्वितीयम् = ब्रह्मचर्यानन्तरम्, आश्रमम् = गृहस्थाश्रमम्, सङ्क्रमितुम् = प्रवेष्टुम्(गन्तुम्), अयम् = एषः, कालः = समयः (अस्ति)।

**भावार्थः**– महाराजः रघुः कौत्सं पृच्छति यत् भवतः गुरुवर्येण महर्षिणा वरतन्तुना यथाविधि समधीत–अखिलशास्त्रायभ वतेग ृहस्थाश्रमप्रवेशार्थम्अ ाज्ञाप⁄दत्ताि कम्?य तोहिस म्प्रतित वअ ायु:स र्वेषामपिअ ाश्रमाणाम् उपकारक्षमं गृहस्थाश्रमं प्रवेष्टुं योग्यं प्रतीयते।

**व्याकरणात्मकटिप्पणी**– प्रसन्नेन = प्र+सद्+क्त(त)+टा(इन) (तृ.वि.ए.व.)। महर्षिणा = महान् चासौ ऋषिः महर्षिः (कर्म.स.), तेन–महर्षिणा। विनीय = वि+नी+ल्यप् (य) (अव्ययशब्दः)। गृहाय = गृह+ङे(य) (च.वि.ए.व.)। अनुमतः = अनु+मन्+क्त(त)+सु। सर्वोपकारक्षमम् = सर्वेषाम् उपकारः–सर्वोपकारः, (ष.त.), सर्वोपकारे क्षमः सर्वोपकारक्षमः (स.तत्पु.), तम्–सर्वोपकारक्षमम्। सङ्क्रमितुम् = सम्+क्रम्+तुमुन् (तुम्) (अव्ययशब्दः)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये चक्रवर्तिना रघुणा यज्ञे सर्वस्वं दानरूपेण प्रदत्तम्, दानानन्तरं तस्य दयनीयां दशां विलोक्य मुनिः कौत्सः कथयति यत्–

**स्थाने भवानेकनराधिपः सन्,**
**अकिञ्चनत्वं मखजं व्यनक्ति।**
**पर्यायपीतस्य सुरैर्हिमांशोः**
**कलाक्षयः श्लाघ्यतरो हि वृद्धेः।।७।।**

**पदच्छेदः**– स्थाने भवान् एकनराधिपः सन् अकिञ्चनत्वम् मखजं व्यनक्ति, पर्यायपीतस्य सुरैः हिमांशोः कलाक्षयः श्लाघ्यतरः हि वृद्धेः।

**अन्वयः**–भ वान्ए कनराधिप:स न्म खजम्अ किञ्चनत्वंय त्◌ यनक्तित त्स् थाने।ि हस ुरै:प र्यायपीतस्य हिमांशोः कलाक्षयः वृद्धेः श्लाघ्यतरः (भवति)।

**व्याख्या–** भवान् = त्वम्, एकनराधिपः = सार्वभौमः, सन् = भवन्नपि, मखजम् = यज्ञोत्पन्नम्, अकिञ्चनत्वम् = निर्धनत्वम् (निर्धनताम्), स्थाने = युक्तम् (उचितम्) व्यनक्ति = प्रकटयति, यतोहि सुरैः = देववृन्दैः, पर्यायपीतस्य = क्रमेणोपभुक्तस्य, हिमांशोः = चन्द्रमसः (रजनीशस्य), कलाक्षयः = कलानाशः, वृद्धेः वृद्ध्यपेक्षया, श्लाघ्यतरः = अतिशयप्रशंसनीयः, प्रशस्यतरः (भवति = जायते)।

**भावार्थः–** अत्र मुनिः कौत्सः कथयति यत् – हे राजन्! विश्वविजत्नामके यज्ञे याचकेभ्यः सर्वस्वं प्रदाय सार्वभौमोऽपि धनहीनः भवान् तथैव भृशं शोभते यथा शुक्लपक्षीयवृद्ध्यपेक्षया क्रमेण सुरैः पीतस्य अमृतस्य चन्द्रमसः कृष्णपक्षीयः कलाक्षयः प्रशस्यतरः भवति।

**व्याकरणात्मकटिप्पणी–** एकनराधिपः = अधिकं पातीति अधिपः, नराणाम् अधिपः – नराधिपः (ष.त.), एकश्चासौ नराधिपः–एकनराधियः (कर्म.स.)। मखजम् = मखात् जातम्–मखजम्–तत् (षं.तत्पु.स.)। अकिञ्चनत्वम् = नास्ति किञ्चन यस्य स अकिञ्चनः (नाञ्–बहु.), अकिञ्चनस्य भावः–अकिञ्चनत्वम्। पर्यायपीतस्य = पर्यायेण पीतः–पर्यायपीतः (तृ.तत्पु.स.), तस्य पर्यायपीतस्य। हिमांशोः = हिमाः अंशवः यस्य सः हिमांशुः (बहु.स.) तस्य–हिमांशोः।

कलाक्षय: = कलानां क्षय:-कलाक्षय: (ष.त.)। श्लाघ्यतर: = अतिशयेन श्लाघ्य: श्लाघ्यतर: - श्लाघ्य+तरप्+सु।

**छन्द:**- अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- अत्र गुरुदक्षिणार्थी ब्रह्मचारी कौत्स: महाराजं रघुं विहाय अन्यत्र गुरुदक्षिणाप्राप्त्यर्थं गन्तुमभिलषति इति प्रतिपादयन् कवि: कथयति यत्-

**तदन्यतस्तावदनन्यकार्यो,**
**गुर्वर्थमाहर्तुमहं यतिष्ये।**
**स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं,**
**शरद्घनं नार्दति चातकोऽपि।।८।।**

**पदच्छेद:**- तत् अन्यत: तावद् अन्यकार्य: गुर्वर्थम् आहर्तुम् अहम् यतिष्ये स्वस्ति अस्तु ते निर्गलित-अम्बुगर्भम् शरद्घनं न अर्दति चातक: अपि।

**अन्वय:**- तत् तावत् अनन्यकार्य: अहम् अन्यत: गुर्वर्थम् आहर्तुं यतिष्ये ते स्वस्ति अस्तु, चातक: अपि निर्गलिताम्बुगर्भं शरद्घनं न अर्दति।

**व्याख्या**- तत् = तस्मात्, तावत् = आदौ, अनन्यकार्य: = प्रयोजनान्तररहित:, अहम् = एष जन:(कौत्स:), गुर्वर्थम् = गुरुदक्षिणार्थम्, अन्यत: = अन्यस्मात्, आहर्तुम् = अर्जयितुम् (सङ्ग्रहितुम्), यतिष्ये = प्रयतिष्ये (यत्नं करिष्ये), ते = तुभ्यम्, स्वस्ति = शुभं भूयात्, चातकोऽपि = सारङ्गोऽपि, निर्गलिताम्बुगर्भम् = जलरहितम्, शरद्घनम् = शरत्कालिकं मेघम्, न = नहि, अर्दति = याचते।

**भावार्थ:**- अत्र गुरुदक्षिणार्थी कौत्स: कथयति यत्-हे राजन्। अहं गुरुदक्षिणाप्रदानसमये भवत: समीपम् आगच्छम्, भवान् च सर्वस्वं सत्पात्रेभ्य: अयच्छत्, अत: चिन्ता मास्तु, अहं गुरवे देयं धनम् अन्यस्मात् प्रदातु: सकाशाद् आहर्तुम् इत: गच्छामि, तव कल्याणम् अस्तु। यथा चातकोऽपि जलरहितं शरत्कालिकं जलदं न याचते (प्रार्थयति) तथैव अहमपि विश्वजिति यज्ञे सर्वस्वप्रदातारं भवन्तं याचितुं नोत्सहे। सम्प्रति मधुकर इव अहमपि अन्यत: धनमाहर्तुं समर्थ: अस्मि।

**व्याकरणात्मकटिप्पणी**- अनन्यकार्य: = अन्यत् च तत् कार्यम्-अन्यकार्यम् (कर्म.स.), नास्ति अन्यकार्यं यस्य असौ-अनन्यकार्य:(बहु.स.)। अन्यत: = अन्य+तसिल् (तस्) (अव्ययशब्द:)। गुर्वर्थम् = गुरो: अर्थ:-गुर्वर्थ: (ष.त.) तम्-गुर्वर्थम्। आहर्तुम् = आङ्+हृ+तुमुन्(तुम्) (अव्ययशब्द:)। यतिष्ये = यत्+लृट्+इट् (उ.पु.ए.व.)। निर्गलिताम्बुगर्भम् = निर्गलितम् अम्बु यस्मात् स निर्गलिताम्बु: (बहु.स.), निर्गलिताम्बु: गर्भो यस्य असौ निर्गलिताम्बुगर्भ: (बहु.स.) तम्-निर्गलिताम्बुगर्भम्। शरद्घन: = शरदि घन:-शरद्घन: (स.त.स.)। अर्दति = अर्द्+लट्+तिप्(प्र.पु.ए.व.)।

**छन्द:**- अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- अत्र महाराज: रघु: कौत्समुने: आगमनस्य प्रयोजनं ज्ञात्वा गुरुदक्षिणायां किं वस्तु देयमिति ज्ञातुमिच्छति-

**एतावदुक्त्वा प्रतियातुकामं**
**शिष्यं महर्षेर्नृपतिर्निषिध्य।**
**किं वस्तु विद्वन्! गुरवे प्रदेयं,**
**त्वया कियद्वेति तमन्वयुक्त।।९।।**

**पदच्छेद:**- एतावद् उक्त्वा प्रतियातुकामम् शिष्यम् महर्षे: नृपति: निषिध्य किम् वस्तु विद्वन्! गुरवे प्रदेयम्

त्वया कियद् वा इति तम् अन्वयुक्त।

**अन्वयः**– एतावद् उक्त्वा प्रतियातुकामं महर्षेः शिष्यं नृपतिः निषिध्य हे विद्वन्! त्वया गुरवे प्रदेयं वस्तु किं कियद् वा इति तम् अन्वयुक्त।

**व्याख्या**– एतावद् = एतन्मात्रं वाक्यम् (एतद् वचनम्), उक्त्वा = अभिधाय, प्रतियातुकामम् = गमनेच्छुकम् (गन्तुकामम्), महर्षेः = वरतन्तोः आचार्यस्य, शिष्यम् = अन्तेवासिनम्, (कौत्सम्), निषिध्य = अपवार्य (अवरुध्य), हे विद्वन्! = हे ब्रह्मचारिन्! त्वया = भवता (कौत्सेन), गुरवे = उपाध्यायाय (आचार्याय), किं वस्तु = किं नामधेयं वस्तु, प्रदेयम् = दातव्यम्, इति = इत्थम् (एवंविधम्), नृपतिः = भूपतिः (राजा रघुः), तम् = ब्रह्मचारिणम् (कौत्सम्), अन्वयुक्त = अपृच्छत्।

**भावार्थः**– महाराजस्य रघोः स्थितिं विलोक्य यदा कौत्सः प्रतियातुमिच्छति तदा तं ब्रह्मचारिणं कौत्सं अपवार्य महाराजः रघुः अपृच्छत् यत् हे ब्रह्मचारिन्! किं वस्तु, कियन्मात्रं च भवता आचार्याय प्रदेयमस्तीति कथय। अत्रायम् अभिप्रायः वर्तते यत् नृपः गुरुदक्षिणाराशिं कौत्समुखेन ज्ञातुमभिलषति।

**व्याकरणात्मकटिप्पणी**–उ क्त्वा =ब्ू(वच्)+क्त्वा(त्वा)( अव्ययशब्दः) ।प्रतियातुकामम् =प्रतियातुं कामो यस्य असौ प्रतियातुकामः (बहु.स.) तम् प्रतियातुकामम्। शिष्यम्= शासितुं योग्यं शिष्यः, तम् शिष्यम् (शास्+क्यप्(य)+अम् (द्वि.वि.ए.व.)। नृपतिः = नृणां पतिः नृपतिः(ष.तत्पु.)। निषिध्य = नि+सिध्+ल्यप्(य) (अव्ययशब्दः)।हे विद्वन्! = वेत्तीति विद्वान्, तत्सम्बुद्धौ–हे विद्वन्!।त्वया = युष्मद्+टा (तृ.वि.ए.व.)।गुरवे = गुरु+ङे (च.वि.ए.व.)। प्रदेयम् = प्रदातुं योग्यम्–प्रदेयम् (प्र+दा+यत्)+सु (अम्)। अन्वयुक्त = अनु+युज्+लुङ्+त (प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' इति नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**–अ त्रअ धीतविद्यःक ौत्सःग ुरुदक्षिणार्थंग ुरवे नवेदयतिर् म,प रंग ुरुणाग ुरुदक्षिणापेक्षयात स्य, सेवाकार्यमेव अङ्गीकृतमिति वर्णयन् कविः कथयति यत्–

**समाप्तविद्येन मया महर्षिः,**
**विज्ञापितोऽभूद् गुरुदक्षिणायै।**
**स मे चिरायास्खलितोपचारां**
**तां भक्तिमेवागणयत्पुरस्तात्।।१०।।**

**पदच्छेदः**– समाप्तविद्येन मया महर्षिः विज्ञापितः अभूद् गुरुदक्षिणायै स मे चिराय अस्खलित–उपचाराम् तां भक्तिम् एव अगणयत्–पुरस्तात्।

**अन्वयः**– समाप्तविद्येन मया महर्षिः गुरुदक्षिणायै विज्ञापितः अभूत्, स च चिराय अस्खलितोपचारां तां भक्तिम् एव पुरस्तात् अगणयत्।

**व्याख्या**– समाप्तविद्येन = अधीतसर्वशास्त्रेण, मया = कौत्सेन, महर्षिः = आचार्यः वरतन्तुः, गुरुदक्षिणायै = आचार्यदक्षिणास्वीकृत्यर्थम्, विज्ञापितः = निवेदितः (प्रार्थितः), अभूत् = आसीत्, सः = असौ (महर्षिः वरतन्तुः) चिराय = दीर्घकालं यावत्, अस्खलितोपचारः = निरन्तरविहितसेवाकार्यम्, भक्तिम् = अनुरागम्, एव = निश्चयेन, पुरस्तात् = प्रथमम्, अगणयत् = गणनामकरोत् (गणयति स्म)।

**भावार्थः**– अत्र महाराजस्य रघोः समक्षं कौत्सः कथयति यत्–अहं यदा आचार्यवरतन्तोः सकाशात् सर्वां विद्याम् अधीतवान्, तदा अहं तस्मै गुरुदक्षिणां दातुं न्यवेदयम्। तदानीं मम सेवाकार्येण सन्तुष्टः सन् सः अकथयद् 'अलं दक्षिणायै' इति। भवता भक्तियुक्ताविहिता सेवा एव गुरुदक्षिणा अभूत्, अन्या कापि गुरुदक्षिणा मास्तु इति।

**व्याकरणात्मकटिप्पणी**– समाप्तविद्येन = समाप्ता विद्या येन असौ समाप्तविद्यः (बहु.स.) तेन–समाप्तविद्येन।

मया = अस्मद्+टा (तृ.वि.ए.व.)। गुरुदक्षिणायै = गुरोः दक्षिणा गुरुदक्षिणा (ष.त.स.), तस्यै-गुरुदक्षिणायै। विज्ञापितः = वि+ज्ञप्+णिच्+क्त (त)+सु (क्रियापदम्)। अभूत्= भू+लुङ्+तिप् (प्र.पु.ए.व.)। अस्खलितोपचाराम्= न स्खलितः-अस्खलितः (नञ्-स.), अस्खलितः उपचारः यस्याः सा अस्खलितोपचारा (बहु.स.) ताम्-अस्खलितोपचाराम्। भक्तिम् = भज्+क्तिन् (ति)+अम् (द्वि.वि.,ए.व.)। पुरस्तात् = पूर्व+अस्ताति (पूर्वस्य स्थाने पुर् आदेशः) (अव्ययशब्दः)। अगणयत्-गण्+णिच्+लङ्+तिप् (प्र.पु.ए.व.)।

**छन्दः**- अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**-अ त्रग ुरुदक्षिणायैअ ाग्रहातिशयेनअ ाचार्यव रतन्तुःक ौत्सस्योपरिभ ृशम्अ क्रुध्यत्,क् ु द्धःस न् गुरुदक्षिणारूपेण चतुर्दशकोटिस्वर्णमुद्राम् आनेतुम् आदिष्टवान्-

**निर्बन्धसञ्जातरुषार्थकार्श्यम्**
**अचिन्तयित्वा गुरुणाऽहमुक्तः।**
**वित्तस्य विद्यापरिसंख्यया मे**
**कोटीश्चतस्रो दश चाहरेति।।११।।**

**पदच्छेदः**- निर्बन्धसञ्जातरुषा अर्थकार्श्यम् अचिन्तयित्वा गुरुणा अहम् उक्तः, वित्तस्य विद्यापरिसंख्यया मे कोटीः चतस्रः दश च आहर इति।

**अन्वयः**- निर्बन्धसञ्जातरुषा गुरुणा अर्थकार्श्यम् अचिन्तयित्वा अहं 'वित्तस्य चतस्रः दश च कोटीः मे आहर' इति विद्यापरिसंख्यया उक्तः।

**व्याख्या**- निर्बन्धसञ्जातरुषा = निरन्तरप्रार्थनाप्रवृद्धकोपेन, गुरुणा = आचार्येण (महर्षिणा वरतन्तुना), अर्थकार्श्यम् = दारिद्र्यम् (धनशून्यत्वम्), अचिन्तयित्वा = अविचार्य (उचितानुचितमविचार्य), विद्यापरिमितसंख्यया = अधिगतविद्यायाः संख्यानुसारेण, वित्तस्य = धनस्य, चतस्रः दश च कोटीः = चतुर्दशकोटीः, मे = मह्यम् (आचार्याय), आहर = आनय, इति = इत्थम्, अहम् = कौत्सः, उक्तः = कथितः (अभिहितः)।

**भावार्थः**- अत्र कौत्सः महाराजस्य समक्षं गुरुदक्षिणाविषयकं वृत्तान्तं कथयति यत्-अहं गुरोः अग्रे गुरुदक्षिणायै वारं-वारं निवेदितवान्, तेन आचार्यः मह्यम् भृशम् अक्रुध्यत्। अतः मम निर्धनताम् अविचार्य मत्सकाशात् त्वया चतुर्दश विद्या गृहीता, अतः तत्संख्यानुरूपं चतुर्दशकोटीं स्वर्णमुद्रां मह्यं देहि इति गुरुः आदिष्टवान्। अत एव एतत्परिमितं धनं सङ्ग्रहीतुमहमत्र आगतोऽस्मि।

**व्याकरणात्मकटिप्पणी**- निर्बन्धसञ्जातरुषा = निर्बन्धेन सञ्जाता रुट् यस्य असौ निर्बन्धसञ्जातरुट् (बहु.स.) तेन-निर्बन्धसञ्जातरुषा। अर्थकार्श्यम् = कृशस्य भावः कार्श्यम्, अर्थस्य कार्श्यम्-अर्थकार्श्यम् (ष.त.) तत्-अर्थकार्श्यम्। अचिन्तयित्वा = न चिन्तयित्वा-अचिन्तयित्वा (नञ्-स.) वित्तस्य = विद्+क्त(त)+ ङस् (ष.वि.ए.व.)। कोटी = कुट+इञ् = कोटि+ङीष्(ई)+सु (प्र.वि.ए.व.)। आहर = आङ्+हृ+लोट्+सिप् (म.पु.ए.व.)। विद्यापरिसंख्यया = विद्यानां परिसंख्या-विद्यापरिसंख्या (ष.त.) तया-विद्यापरिसंख्यया। उक्तः = ब्रू+क्त+सु (क्रियापदम्)।

**छन्दः**- अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**- अत्र गुरुदक्षिणेच्छुकस्य कौत्सस्य वचनं श्रुत्वा जगदेकनाथः महाराजः रघुः पुनः अवदत् इति वर्णयन् कविः कथयति यत्-

**इत्थं द्विजेन द्विजराजकान्ति-**
**रावेदितो वेदविदां वरेण।**

**एनोनिवृत्तेन्द्रियवृत्तिरेनं**
**जगाद भूयो जगदेकनाथः।।१२।।**

**पदच्छेदः**– इत्थम् द्विजेन द्विजराजकान्तिः आवेदितः वेदविदाम् वरेण, एनः निवृत्त–इन्द्रियवृत्तिः एनम् जगाद भूयः जगद् एकनाथः।

**अन्वयः**– द्विजराजकान्तिः एनोनिवृत्तेन्द्रियवृत्तिः जगदेकनाथः वेदविदां वरेण द्विजेन इत्थम् आवेदितः (सन्) एनं भूयः जगाद।

**व्याख्या**– द्विजराजकान्तिः = चन्द्रमसः इव सुन्दरशोभः, एनोनिवृत्तेन्द्रियवृत्तिः = निष्पापव्यापारः (पापरहितक्रिया–कलापः), जगदेकनाथः = लोकस्य एकाकी स्वामी (सार्वभौमः राजा रघुः), वेदविदाम् = वेदज्ञानिनाम् (वेदादिशास्त्रमर्मज्ञानाम्) वरेण = श्रेष्ठेन (वरिष्ठेन), द्विजेन = विप्रेण (ब्राह्मणेन, कौत्सेन), इत्थम् = एवंविधम्, आवेदितः = निवेदितः, (सन् = भवन्), एनम् = कौत्समुनिम्, भूयः = पुनः, जगाद = अवदत्।

**भावार्थः**– कौत्समुनेः वचनं निशम्य विधुसदृशशोभायमानः निष्कलंकः सार्वभौमः नृपः रघुः वेदादिशास्त्राणां विज्ञस्य कौत्सस्य वचनम् आकर्णयत्। एवंविधं मुनेः कौत्सस्य वचनमाकर्ण्य राजा रघुः पुनः कौत्सम् अकथयदिति।

**व्याकरणात्मकटिप्पणी**–ि द्वजराजकान्तिः =ि द्वजानांर ाजा–द्विजराजः( ष.त.),ि द्वजराजस्यक ान्तिःइ व कान्तिः यस्य असौ द्विजराजकान्तिः (बहु.स.)। निवृत्तेन्द्रियवृत्तिः = इन्द्रियाणां वृत्तिः–इन्द्रियवृत्तिः (ष.त.), निवृत्ता इन्द्रियवृत्तिःय स्यअ सौि नवृत्तेन्द्रियवृत्तिः( बहु.स.) ाज गदेकनाथः =ए कश्चासौन ाथः =ए कनाथः( कर्म.स.), जगताम् एकनाथः–जगदेकनाथः (ष.त.)। वेदविदाम् = वेदान् वेत्ति इति वेदवित् (उप.स.) तेषाम्–वेदविदाम्। आवेदितः = आङ्+विद्+णिच्+क्त+सु(क्रियापदम्)। जगाद = गद्+लिट्+तिप्(णल्) (प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अत्र गुरुदक्षिणेच्छुकः याचकः नृपं रघुं प्राप्य अपूर्णमनोरथः अन्यत्र गतः इति वचनीयता कुत्रापि न प्रसरेत् इति नृपः चिन्तयतीति वर्णयन् कविः कथयति यत्–

**गुर्वर्थमर्थी श्रुतपारदृश्वा**
**रघोः सकाशादनवाप्य कामम्।**
**गतो वदान्यान्तरमित्ययं मे**
**मा भूत् परीवादनवावतारः।।१३।।**

**पदच्छेदः**– गुरु+अर्थम् अर्थी श्रुतपारदृश्वा रघोः सकाशाद् अनवाप्य कामम् गतः वदान्यान्तरम् इति अयम् मे मा भूत् परीवादनवावतारः।

**अन्वयः**– श्रुतपारदृश्वा गुर्वर्थम् अर्थी रघोः सकाशात् कामम् अनवाप्य वदान्यान्तरं गतः इति अयं मे परीवादनवावतारः मा भूत्।

**व्याख्या**– श्रुतपारदृश्वा = वेदादिशास्त्रपारङ्गतः, गुर्वर्थम् = आचार्यदक्षिणार्थम्, अर्थी = याचकः, रघोः = एतद् नामधेयस्य नृपस्य, सकाशात् = समीपतः, कामम् = इच्छाम् (अभिलाषम्), अनवाप्य = अलब्ध्वा (प्राप्तिं विना), वदान्यान्तरम् = अन्यद्दातारम्, गतः = प्राप्तः, इति = इत्थम्, अयम् = एषः, मे = मम (दिलीपसूनोः), परीवादनवावतारः = नूतनलोकापवादस्य आविर्भावः, मा = नहि, भूत् = भवतु।

**भावार्थः**– अखिलशास्त्रदक्षः गुरुदक्षिणाप्रदेयमिति मनसि भावं निधाय रघोः समीपं समागतः, एतादृशः विद्वान् याचकः तस्य समीपतः इच्छापूर्तिं विनैव अन्यप्रदातुः समीपम् अगच्छत् इति लोके मम निन्दायाः नूतनावतारः न स्यादिति। अर्थात् यदि मम समीपे समागतः विद्वान् याचकः मां परित्यज्य अन्यत्र गमिष्यति तर्हि मे यशः नूनमेव विनश्यति इति भयेन नृपः चिन्तितः दृश्यते।

**व्याकरणात्मकटिप्पणी**– श्रुतपारदृश्वा = श्रुतस्य पारं दृष्टवान् इति श्रुतपारदृश्वा (उप.स.)। गुर्वर्थम् = गुरवे इदम् (च.त.पु.)। अर्थी = अर्थः अस्य अस्तीति अर्थी अर्थ+इम्+सु (प्र.वि.ए.व.)। अनवाप्य = न अवाप्य–अनवाप्य (नञ् स.)। वदान्यान्तरम् = अन्यः वदान्यः वदान्यान्तरम्, तत् वदान्यान्तरम्। गतः = गम्+क्त+सु (क्रियापदम्)। मे = अस्मद्+ङस् (मम स्थाने मे आदेशः) (ष.वि.ए.व.)। परीवादनवावतारः = नवश्चासौ अवतारः–नवावतारः (कर्म.स.), परिवादस्य नवावतारः–परिवादनवावतारः (ष.स.)। मा भूत्–भू+लुङ्+तिप्(प्र.पु.ए.व. माङ्योगे अडागमाभावः)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये महाराजः रघुः स्वकीययज्ञशालायां किञ्चित् कालं विश्रामार्थं कौत्सं प्रार्थयते इति प्रातिपादयन् कविः कथयति यत्–

**स त्वं प्रशस्ते महिते मदीये**
**वसंश्चतुर्थोऽग्निरिवाग्न्यगारे।**
**द्वित्राण्यहान्यर्हसि सोढुमर्हन्**
**यावद्यते साधयितुं त्वदर्थम्।।१४।।**

**पदच्छेदः**– सः त्वम् प्रशस्ते महिते मदीये वसन् चतुर्थः अग्निः इव अग्न्यगारे, द्वित्राणि अहानि अर्हसि सोढुम् अर्हन् यावद् यते साधयितुम् त्वद् अर्थम्।

**अन्वयः**– (हे) अर्हन्! सः त्वं महिते प्रशस्ते मदीये अग्न्यगारे चतुर्थः अग्निः इव वसन् द्वित्राणि अहानि सोढुम् अर्हन् तावत् त्वदर्थं साधयितुं यते।

**व्याख्या**– हे अर्हन् = हे विद्वन्! सः = असौ (गुरुदक्षिणार्थी), त्वम् = भवान्, महिते = पूजिते, प्रशस्ते = सुविख्याते, मदीये = मामके, (राज्ञः रघोः), अग्न्यगारे = यज्ञशालायाम्, चतुर्थः अग्निरिव = दाक्षिणात्य–गार्हपत्य–आहवनीयपावकत्रयातिरिक्तः तुरीयः अग्निरिव, वसन् = निवसन् (निवासं कुर्वन्), द्वित्राणि = द्वे त्रीणि वा, अहानि = दिनानि, सोढुम् = मर्षितुम्, अर्हसि = योग्योऽसि, यावत् = यावत्कालपर्यन्तम्, त्वदर्थम् = भवत्प्रयोजनम्, साधयितुम् = सम्पादयितुम्, यते = प्रयतिष्ये।

**भावार्थः**– हे विद्वन् दाक्षिणात्याग्नि–गार्हपत्याग्नि आहवनीयाग्नियुक्तायां मम अग्निहोत्रशालायां तुरीयाग्निरिव (चतुर्थाग्निसदृशः) दिवसद्वयं त्रयं वा तिष्ठन् प्रतीक्षताम्। एतस्मिन्नेव कालाभ्यन्तरे अहं भवतः अभीष्टं साधयितुम् उपायं करिष्यामि।

**व्याकरणात्मकटिप्पणी**– हे अर्हन् = अर्हतीति अर्हन्, तत्सम्बुद्धौ हे अर्हन् (अर्ह+शतृ(अत्)+सु। महिते = मह्+क्त(त)+ङि(स.वि.ए.व.)। प्रशस्ते = प्र+शंस्+क्त(त)+ङि(स.वि.ए.व.)। मदीये = अस्मद्+छ (ईय) (अस्मद्–स्थाने मद्–आदेशः)+ङि (स.वि.ए.व.)। अग्न्यगारे = अग्नीनाम् अगारम्–अग्न्यगारम् (ष.त.) तस्मिन्–अग्न्यगारे। अग्नि+अगारम् = (यण् सन्धिः)। वसन् = वस्+शतृ(अत्)+सु (प्र.वि.ए.व.)। द्वित्राणि = द्वे वा त्रीणि वा द्वित्राणि, तानि द्वित्राणि। अहानि = अहन्+जस् (प्र.वि.ब.व.)। सोढुम् = सह्+तुमुन् (तुम्) (अव्ययशब्दः)। त्वदर्थम् = तव अर्थः त्वदर्थः (ष.त.) तम्–त्वदर्थम्। साधयितुम् = साध्+णिच्+तुमुन् (तुम्) (अव्ययशब्दः)। यते = यत्+लट्+इड् (प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' इति नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये प्रातःकाले यदा महाराजः रघुः धनपतेः कुबेरस्योपरि प्रस्थातुम् उत्सुकः अभूत् तदानीमेव तस्य कोषागारे सुवर्णवृष्टिः सञ्जातेति वर्णितमस्ति–

**प्रातः प्रयाणाभिमुखाय तस्मै,**

**सविस्मयाः कोषगृहे नियुक्ताः।**

**हिरण्मयीं कोषगृहस्य मध्ये,**

**वृष्टिं शशंसुः पतितां नभस्तः।।१५।।**

**पदच्छेदः**–प्ऱातःप्ऱयाण–अभिमुखायत स्मैस विस्मयाःक ोषगृहेि नयुक्ताः,ि हरण्मयीम्क ोषगृहस्यम ध्ये वृष्टिम् शशंसुः पतिताम् नभस्तः।

**अन्वयः**– प्रातःप्रयाणाभिमुखाय तस्मै कोषगृहे नियुक्ताः जनाः सविस्मयाः(सन्तः) कोषगृहस्य मध्ये नभस्तः पतितां हिरण्मयीं वृष्टिं शशंसुः।

**व्याख्या**– प्रातः = प्रभातसमये, प्रयाणाभिमुखाय = प्रस्थानार्थमुद्यताय, तस्मै = महाराजाय रघवे, कोषगृहे = धनागारे, नियुक्ताः = नियोजिताः, जनाः = मनुष्याः (कर्मचारिणः), सविस्मयाः = आश्चर्यचकिताः (सन्तः =भवन्तः), कोषगृहस्य = धनागारस्य, मध्ये = अभ्यन्तरे (अन्तः), नभस्तः = आकाशात् पतिताम् = समागताम्, हिरण्मयीम् = सुवर्णयुक्ताम्, वृष्टिम् = वर्षणम्, शशंसुः = कथयामासुः।

**भावार्थः**– गुरुदक्षिणेच्छुकं ब्रह्मचारिणं कौत्सं स्वकीययज्ञशालायाम् अवस्थातुं व्यवस्थां विधाय प्रातः काले यदैव नृपः रघुः धनपतेः कुबेरस्योपरि प्रस्थानं कर्तुमुद्यतः तदानीमेव आश्चर्यचकिताः कोषागारसंरक्षकाः कोषभवनमध्ये आकाशात् सञ्जातसुवर्णवृष्टिविषयकं समाचारं नृपाय निवेदयामासुः।

**व्याकरणात्मकटिप्पणी**– प्रयाणाभिमुखाय = प्रयाणस्य अभिमुखः–प्रयाणाभिमुखः (ष.त.) तस्मै–प्रयाणाभिमुखाय। कोषगृहे = कोषस्य गृहम्–कोषगृहम् (ष.त.), तस्मिन्–कोषगृहे। नियुक्ताः = नि+युज्+क्त (त)+जस् (क्रियापदम्)। सविस्मयाः = विस्मयेन सहिताः सविस्मयाः(तृ.तत्पु.स.)। सन्तः = अस्+शतृ(अत्)+जस् (प्र.वि.ब.व.)। कोषगृहस्य = कोषस्य गृहम्–कोषगृहम् (ष.त.) तस्मिन्–कोषगृहे। नभस्तः = नभस्+तसिल् (तस्) (पञ्चम्यर्थेत सिल्) ।प तिताम् =प त्+क्त(त)+टाप्(आ)+अम्(द्वि.वि.ए.व.) ।ि हरण्मयीम् =प्ऱकृर्तांि हरण्यंय स्य असौ–हिरण्मयी (बहु.स.) ताम्–हिरण्मयीम्। शशंसुः = शंस्+लिट्+झि (प्र.पु.ब.व.)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये धनपतेः कुबेरात् वृष्टिरूपेण प्राप्तमखिलं सुवर्णराशिं महाराजः रघुः कौत्साय समर्पयद् इति वर्णयन् कविः कथयति यत्–

**तं भूपतिर्भासुरहेमराशिं**

**लब्धं कुबेरादभियास्यमानात्।**

**दिदेश कौत्साय समस्तमेव**

**पादं सुमेरोरिव वज्रभिन्नम्।।१६।।**

**पदच्छेदः**– तं भूपतिः भासुरहेमराशिम् लब्धम् कुबेराद् अभियास्यमानात्, दिदेश कौत्साय समस्तम् एव पादम् सुमेरोः इव वज्रभिन्नम्।

**अन्वयः**– भूपतिः अभियास्यमानात् कुबेरात् लब्धं वज्रभिन्नं सुमेरोः पादम् इव स्थितं तं भासुरहेमराशिं समस्तम् एव कौत्साय दिदेश।

**व्याख्या**– भूपतिः = अवनिपतिः रघुः, अभियास्यमानात् = अभिगन्तुमिष्यमाणात् (अभियोक्ष्यमाणात्), कुबेरात् = धनाधिपतेः, लब्धम् = सम्प्राप्तम्, वज्रभिन्नम् = वज्रेण विदारितम्, सुमेरोः = एतदाख्यस्य गिरेः, पादम् = प्रत्यन्तपर्वतम्, इव = यथा, प्रेक्ष्यमाणम् = दृश्यमानम् (कोषगृहाधिकारिभिः निर्दिष्टम्), तम् = अमुम्, भासुरहेमराशिम् = प्रकाशमानसुवर्णपुञ्जम्, समस्तमेव = सम्पूर्णमेव, कौत्साय = वरतन्तुशिष्याय (गुरुदक्षिणार्थं समागताय ब्रह्मचारिणे), दिदेश = अददत् (दत्तवान्)।

**भावार्थः**– चक्रवर्ती नृपः महाराजः रघुः यदा कुबेरस्योपरि अभिगन्तुकामः आसीत् तदानीमेव धनाधिपतिः कुबेरः नृपस्य कोषागारे सुवर्णवृष्टिमकरोत्। तद् अखिलमेव सुवर्णराशिं महाराजः रघुः महर्षिवरतन्तुशिष्याय ब्रह्मचारिणे कौत्साय समर्पितवान्।

**व्याकरणात्मकटिप्पणी**– भूपतिः = भुवः पतिः–भूपतिः (ष.त.)। अभियास्यमानात् = अभियास्यते इति अभियास्यमानः, तस्मात् अभियास्यमानात्। लब्धम् = लभ्+क्त = सु (अम्) (क्रियापदम्)। वज्रभिन्नम् = वज्रेण भिन्नः–वज्रभिन्नः (तृ.तत्पु.स.), तम् वज्रभिन्नम्। सुमेरोः = सुमेरु+ङस् (ष.वि.ए.व.)। स्थितम् = स्था+क्त+सु(अम्)। (क्रियापदम्)। भासुरहेमराशिम् = भासुरं च तद् हेम भासुरहेम (कर्म.स.), भासुरहेम्नः राशिः–भासुरहेमराशिः (ष.त.स.) तम्– भासुरहेमराशिम्। कौत्साय = कौत्स+ङे (च.वि.ए.व.)। दिदेश = दिश्+लिट्+तिप् (प्र.पु.ए.व.)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये अयोध्यावासिनः याचकस्य कौत्सस्य प्रदातुः नृपस्य रघोश्च भृशं प्रशंसयामासुः इति वर्णयन् कविः कथयति यत्–

**जनस्य साकेतनिवासिनस्तौ,**
**द्वावप्यभूतामभिनन्द्यसत्त्वौ।**
**गुरुप्रदेयाधिकनिःस्पृहोऽर्थी,**
**नृपोऽर्थिकामादधिकप्रदश्च।।१७।।**

**पदच्छेदः**– जनस्य साकेतनिवासिनः तौ द्वौ अपि अभूताम् अभिनन्द्यसत्त्वौ गुरुप्रदेय–अधिकनिः स्पृहः अर्थी नृपः अर्थिकामाद् अधिकप्रदः च।

**अन्वयः**– तौ द्वौ अपि साकेतनिवासिनः जनस्य अभिनन्द्यसत्त्वौ अभूताम्। गुरुप्रदेयाधिकनिःस्पृहः अर्थी अर्थिकामात् अधिकप्रदः नृपः च।

**व्याख्या**– तौ = एतौ, द्वौ अपि = उभौ रघुकौत्सौ अपि(दातृयाचकौ अपि), साकेतनिवासिनः = अयोध्यानिवासिनः, जनस्य = लोकस्य, अभिनन्द्यसत्त्वौ = प्रशंसनीयधैर्यौ, अभूताम् = अभवताम्, गुरुप्रदेयाधिकनिस्पृहः = आचार्यदक्षिणातिरिक्तसुवर्णमुद्रानिरभिलाषः, अर्थी = याचकः (ब्रह्मचारी कौत्सः), अर्थिकामात् = याचकमनोरथात्, अधिकप्रदः = अतिरिक्तप्रदानकर्ता, नृपः = अधिपतिः च = तथा।

**भावार्थः**– यदा महाराजस्य रघोः कोषागारस्थं प्रभूतं सुवर्णराशिं कौत्साय अयच्छत् तदा रघुकौत्सयोः (दातृयाचकयोः) अयोध्यानिवासिनः भृशं प्रशंसाम् अकुर्वन् यत् इहलोके न ईदृशः याचकविप्रः न च दाता नृपः अस्ति। यतोहि महाराजः रघुः याचकमनोरथादधिकं धनं प्रदातुमिच्छति स्म, याचकः कौत्सश्च गुरुप्रदेयाधिकं धनं ग्रहीतुं न अकामयत।

**व्याकरणात्मकटिप्पणी**– साकेतनिवासिनः = निवसतीति निवासी, साकेतस्य निवासी–साकेतनिवासी (ष.त.) तस्य–साकेतनिवासिनः। अभिनन्द्यसत्त्वौ = अभिनन्दयितुं योग्यम् अभिनन्द्यम्, अभिनन्द्यं सत्त्वं ययोः तौ– अभिनन्द्यसत्त्वौ (बहु.स.)। अभूताम् = भू+लुङ्+तस् (प्र.पु.द्वि.व.)। गुरुप्रदेयाधिकनिःस्पृहः = प्रदातुं योग्यं प्रदेयम्, गुरवे प्रदेयम्–गुरुप्रदेयम् (च.तत्पु.स.), गुरुप्रदेयाद् अधिकम्–गुरुप्रदेयाधिकम् (पं.तत्पु.स.), निर्गता स्पृहा यस्य असौ निःस्पृहः (बहु.स.), गुरुप्रदेयाधिके निःस्पृहः– गुरुप्रदेयाधिकनिःस्पृहः (स.तत्पु.स.)। अर्थी = अर्थ+इनि (इन्)+सु(प्र.वि.ए.व.)। अर्थिकामात् = अर्थिनः कामः– अर्थिकामः (ष.त.) तस्मात् अर्थिकामात्। अधिकप्रदः– अधिकं प्रददातीति–अधिकप्रदः (उप.स.)।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

**प्रसङ्गः**– अस्मिन् पद्ये पूर्णमनोरथः ब्रह्मचारी कौत्सः नृपाय रघवे स्वगुणानुरूपं पुत्रप्राप्तये आशीर्वचनं प्रयच्छति इति वर्णयन् कविः कथयति यत्–

**आशास्यमन्यत्पुनरुक्तभूतं**
**श्रेयांसि सर्वाण्यधिजग्मुषस्ते।**
**पुत्रं लभस्वात्मगुणानुरूपं**
**भवन्तमीड्यं भवतः पितेव।।१८।।**

**पदच्छेदः**– आशास्यम् अन्यत् पुनः उक्तभूतम् श्रेयांसि सर्वाणि अधिजग्मुषः ते, पुत्रं लभस्व आत्मगुणानुरूपम् भवन्तम् ईड्यं भवतः पिता इव।

**अन्वयः**– सर्वाणि श्रेयांसि अधिजग्मुषः ते अन्यत् आशास्यं पुनरुक्तभूतम् (अस्मि) किन्तु ईड्यं भवन्तं भवतः पिता इव (त्वम् अपि) आत्मगुणानुरूपं पुत्रं लभस्व।

**व्याख्या**– सर्वाणि = अखिलानि (विश्वानि), श्रेयांसि = शुभानि (कल्याणानि), अधिजग्मुषः = अधिगतः (प्राप्तवतः), ते = तव (भवतः), अन्यत् = पुत्रातिरिक्तम्, आशास्यम् = प्रार्थनीयम् (आशंसनीयम्), पुनरुक्तभूतम् = सिद्धानुवादभूतम् (पिष्टपेषणसमम्) (अस्ति), किन्तु = परन्तु, ईड्यम् = स्तुत्यम् (स्तुतियोग्यम्), भवन्तम् = त्वम् (नृपं रघुम्), भवतः = तव, पिता = जनकः, इव = यथा (त्वमपि = भवन्तमपि) आत्मगुणानुरूपम् = आत्मनः तुल्यगुणम्, पुत्रम् = तनयम् (सुतम्), लभस्व प्राप्नुहि।

**भावार्थः**– प्राप्तमनोरथः मुनिः कौत्सः राजानं रघुमुद्दिश्य कथयति यत्–हे राजन्! अखिलवैभवालङ्कृतस्य भवतः किमन्यत् मङ्गलमहमभिलषामि, यतोहि सर्वे कल्याणप्रदाः प्रदार्थाः भवतः समीपे पूर्वत एव विद्यन्ते, अतः तदर्थमाशिषः द्विरुक्तभूता एव भविष्यन्ति, तथापि यथा सकलगुणसम्पन्नः भवतः जनकः भवन्तम् अलभत, तथैव भवान् अपि स्वसदृशं सुतं प्राप्नुहि।

**व्याकरणात्मकटिप्पणी**– श्रेयांसि–श्रेयस्+जस् (प्र.वि.ब.व.)। आशास्यम् = आशासितुं योग्यम्–आङ्+शास्+ण्यत्(य)+सु (प्र.वि.ए.व.)। पुनरुक्तभूतम् = पुनः+उक्तभूतम् (विसर्गसन्धिः)। ईड्यम् = ईड्+ण्यत्(य)+सु (प्र.वि.ए.व.)। भवन्तम् = भू+शतृ(अत्)+अम्(द्वि.वि.ए.व.)। भवतः = भू+शतृ(अत्)+ङस्(ष.वि.ए.व.)। आत्मगुणानुरूपम् = आत्मनः गुणाः–आत्मगुणाः (ष.तत्पु.) आत्मगुणैः अनुरूपम्– आत्मगुणानुरूपम् (तृ.त.स.) तम्–आत्मगुणानुरूपम्।

**छन्दः**– अस्मिन् पद्ये 'उपजाति' नामधेयं वृत्तं वर्तते।

## अभ्यास-प्रश्नाः

**बहुविकल्पात्मकप्रश्नाः–**

**(क) अधोलिखितानां प्रश्नानाम् उत्तराणि सङ्केताक्षरमाध्यमेन कोष्ठके लेखनीयानि–**

1. उपात्तविद्यः कौत्सः शिष्यः आसीत्–
   (क) महर्षेः वसिष्ठस्य  (ख) गुरु द्रोणाचार्यस्य
   (ग) महर्षेः काश्यपस्य  (घ) महर्षेःवरतन्तोः  (   )
2. कालो ह्ययं सङ्क्रमितुं द्वितीयम् इत्यत्र द्वितीयस्य तात्पर्यमस्ति–
   (क) ब्रह्मचर्याश्रमम्  (ख) सन्न्यासाश्रमम्
   (ग) गृहस्थाश्रमम्  (घ) वानप्रस्थाश्रमम्  (   )

3. निर्गलिताम्बुगर्भं शरद्घनं कः न अर्दति–

(क) कपोतः (ख) चातकः

(ग) वकः (घ) हंसः ( )

4. कीदृशः कौत्सः गुरुदक्षिणायै महर्षिणं वरतन्तुं निवेदितवान्–

(क) समाप्तविद्यः (ख) प्राप्तसम्पद्

(ग) अप्राप्तविद्यः (घ) गुरुभक्तिविमुखः ( )

5. गुरुदक्षिणायां महर्षिः वरतन्तुः कियद्धनमानेतुम् आदिष्टवान्–

(क) दशकोटीम् (ख) चतस्रकोटीम्

(ग) द्वादशकोटीम् (घ) चतुर्दशकोटीम् ( )

6. नृपः रघुः कुत्र निवासार्थं कौत्साय कथयति–

(क) पाकशालायाम् (ख) यज्ञशालायाम्

(ग) पाठशालायाम् (घ) धर्मशालायाम् ( )

**(ख) अतिलघूत्तरात्मकाः प्रश्नाः–**

1. विश्वजित् यज्ञानन्तरं नृपः कीदृशम् अभवत्?
2. कौत्सस्य आगमनमात्रेण नृपस्य मनः किमर्थं न तृप्तमासीत्?
3. प्रजायाः अकुशलत्वं कदा भवितुं नार्हति?
4. नृपस्य पुरतः स्वस्य आगमनप्रयोजनं किम् उक्तं मुनिना कौत्सेन?
5. आचार्यः वरतन्तुः गुरुदक्षिणापेक्षया किं वस्तु श्रेष्ठम् इति स्वीकृतवान्?
6. नृपस्य कोषगृहे प्रस्थानात् पूर्वं कुत्र कस्य वृष्टिः अभूत्?

**(ग) लघूत्तरात्मकाः प्रश्नाः–**

1. कीदृशः नृपः किं कृत्वा कौत्सस्य पुरतः अवदत्?
2. नृपः रघुः गमनेच्छुकं कौत्सं निरुध्य किं पृच्छति?
3. कौत्सः गुरुदक्षिणाविषयकं निर्बन्धं श्रुत्वा गुरुः किम् अकरोत्?
4. नृपः रघुः कस्माद् अपवादात् बिभेति?
5. साकेतनिवासिनः किमर्थं रघुकौत्सयोः प्रशंसाम् अकुर्वन्?
6. लब्धमनोरथः कौत्सः कीदृशम् आशिषं नृपाय अयच्छत्?

**(घ) सामान्यज्ञानप्रश्नाः–**

1. निम्नाङ्कितपद्यानां संस्कृते व्याख्या कार्या–

(क) तमर्चयित्वा.............................कृत्यविदित्युवाच।

(ख) तवार्हतो नाभिगमेन.............................वनान् माम्।

(ग) समाप्तविद्येन.............................अगणयत् पुरस्तात्।

(घ) स त्वं प्रशस्ते.............................साधयितुं त्वदर्थम्।

(ङ) प्रातः प्रयाणाभिमुखाय.............................पतितां नभस्तः।

(च) जनस्य साकेतनिवासिनः.............................अधिकप्रदश्च।

2. निम्नाङ्कितपद्यानां संस्कृते भावार्थो लेखनीयः–

(क) अपि प्रसन्नेन............................सर्वोपकारक्षममाश्रमं ते।
(ख) सर्वत्र नो वार्तमवेहि............................कथं तमिस्रा।
(ग) स्थाने भवानेकनराधिपः............................श्लाघ्यतरो हि वृद्धेः।
(घ) निर्बन्धसञ्जातरुषा............................दश चाहरेति।
(ङ) तं भूपतिर्भासुर हेमराशिं............................वज्रभिन्नम्।
(च) आशास्यमन्यत्............................भवतः पितेव।

3. निम्नाङ्कितपद्यानाम् अन्वयः कार्यः–
(क) तमध्वरे विश्वजिति............................वरतन्तुशिष्यः।
(ख) तदन्यतस्तावद्............................नार्दति चातकोऽपि।
(ग) गुर्वर्थमर्थी ............................परीवादनवावतारः।

**(ङ) व्याकरणज्ञानसम्बन्धिनः प्रश्नाः–**

1. निम्नाङ्कितपदानां सन्धिविच्छेदः कार्यः–
(i) कृत्यविदित्युवाच = ............................।
(ii) क्रिययोत्सुकम् = ............................।
(iii) कुतस्त्वय्यशुभम् = ............................।
(iv) गुर्वर्थमाहर्तुमहम् = ............................।
(v) चिरायास्खलितोपचाराम् = ............................।
(vi) द्वावप्यभूताम् = ............................।

2. निम्नाङ्कितपदानां सन्धिः कार्यः–
(i) सम्यक्+विनीय+अनुमतः = ............................।
(ii) स्वस्ति+अस्तु= ............................।
(iii) गुरुणा+अहम्+उक्तः = ............................।
(iv) एनः+निवृत्त+इन्द्रियवृत्तिः+एनम् = ............................।
(v) सकाशात्+अनवाप्य = ............................।
(vi) सुमेरोः+इव = ............................।
(vii) सर्वाणि+अधिजग्मुषः+ते = ............................।

3. निम्नाङ्कितपदानां समासविग्रहः कार्यः–
(i) उपात्तविद्यः = ............................।
(ii) मानधनाग्रयायी = ............................।
(iii) समाप्तविद्येन = ............................।
(iv) श्रुतपारदृश्वा = ............................।
(v) प्रयाणाभिमुखाय = ............................।
(vi) आत्मगुणानुरूपम् = ............................।

4. निम्नाङ्कितपदानां समासो विधेयः–

(i) गुरुदक्षिणायाः अर्थी = .............................।

(ii) महान् चासौ ऋषिः, तेन = .............................।

(iii) गुरोः दक्षिणा, तस्यै = .............................।

(iv) वेदान् विदन्तीति, तेषाम् = .............................।

(v) भासुरहेम्नः राशिः, तम् = .............................।

(vi) अभिनन्द्यं सत्वं ययोः तौ = .............................।

5. निम्नाङ्कितक्रियापदेषु धातुलकारपुरुषवचनानि निर्दिशत–

(i) प्रपेदे = .............................।

(ii) अवेहि = .............................।

(iii) यतिष्ये = .............................।

(iv) आचचक्षे = .............................।

(v) अभूताम् = .............................।

6. निम्नलिखितेषु पदेषु मूलशब्दं, लिङ्गं, विभक्तिं, वचनं च निर्दिशत–

(i) हिमांशोः = .............................।

(ii) गुरुदक्षिणायै = .............................।

(iii) रघोः = .............................।

(iv) वेदविदाम् = .............................।

(v) मदीये = .............................।

(vi) कुबेरात् = .............................।

7. रघुकौत्ससंवाद–पाठस्य सारांशः लेखनीयः।

8. कालिदासस्य परिचयः प्रदेयः।

9. पाठस्थितान् क्रियाशब्दान् चित्वा लिखत।

10. गुरुशब्दस्य रूपाणि लिखत।

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

१. घ    २. ग    ३. ख    ४. क    ५. घ

६. ख

# षष्ठः पाठः

# छन्दांसि

छन्दसो गणना वेदस्य षट्सु अङ्गेषु भवति। '**छन्दः पादौ तु वेदस्ये**'ति प्रतिपादयद्भिर्विद्वद्भिर्व्याकरणादिवेदाङ्गवच्छन्दःशास्त्रस्यापि वेदज्ञानायानिवार्यत्वमङ्गीकृतम्। यथा लोके पादौ विना पुरुषस्यग तिर्नास्तित थैवव`देषुछ न्दोज्ञानविरहितस्यप ङ्गोर्गत्यभावःस्‌निश्चितए व।न के वलंव`दज्ञानायअ पितु लौकिककाव्यशास्त्रेषु पाटवं रचनानैपुण्यं सम्प्राप्तुमपि छन्दोबोधः परमावश्यको विद्यते।

**(i) छन्दःशास्त्रस्येतिवृत्तम्–**

वैदिकवाङ्मये लौकिकवाङ्मये च छन्दःशास्त्रस्य विशिष्टं स्थानं विद्यते। छन्दःशास्त्रस्य प्राचीनं नाम छन्दोविचितिरप्यस्ति। शास्त्रभेदेन चास्य छन्दोऽनुशासनं, छन्दोविवृत्तिः, छन्दोमानादीनि नामानि अपि प्राप्यन्ते। छन्दो द्विविधमुच्यते (अ) वैदिकच्छन्दांसि (आ) लौकिकच्छन्दांसि च। तत्र –

(अ) **वैदिकच्छन्दांसि**– प्रमुखानि वैदिकछन्दांसि निम्नलिखितानि सन्ति–

१. गायत्री २.उष्णिक् ३.अनुष्टुप् ४.बृहती ५.पङ्क्तिः ६.त्रिष्टुप् ७.जगती

इमानि "सप्तच्छन्दांसि" इति नाम्ना प्रसिद्धानि सन्ति। एषां छन्दसामक्षरसंख्या क्रमशश्चत्वारि-चत्वारि वर्धते। वैदिकानां छन्दसां प्रयोगो वेदेषु प्राप्यते।

**(आ) लौकिकच्छन्दांसि**– काव्यशास्त्रादिषु प्रयुक्तानि छन्दांसि लौकिकच्छन्दांसीत्युच्यन्ते यद्यपि छन्दःशास्त्रे वार्णिकेन मात्रिकेन च भेदेनानेकेषां छन्दसामुल्लेखः प्राप्यते, परं तेषां सर्वेषां प्रयोगः साहित्ये नावलोक्यते। कवयः स्वरुच्यनुसारं विविधच्छन्दसां प्रयोगं स्वकाव्येषु विधाय लोकप्रियतामभजन्त।

**(ii) छन्दःशास्त्रस्य परम्परा–**

रामानुजाचार्यस्य गुरुणा श्रीमताऽऽचार्येण यादवप्रकाशेन पिङ्गलसूत्रे छन्दःपरम्परापरिचायकमेकं पद्यमुद्धृतम्। तद्यथा–

**छन्दोज्ञानमिदं भवाद्भगवतो लेभे गुरूणां गुरुस्–**
**तस्माद् दुश्च्यवनस्ततोऽसुरगुरुर्माण्डव्यनामा ततः।**
**माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गल–**
**स्तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्मदाद्यैः क्रमात्॥**

**तत्र प्रथमः क्रमः**– युधिष्ठिरमीमांसककृतवैदिकच्छन्दोमीमांसानुसारं प्रथमः क्रमः– बृहस्पतिः–दुश्च्यवनः–शुक्राचार्यः–माण्डव्यः–सैतवः–यास्कः–पिङ्गलश्चेत्येवं विद्यते। यथोक्तम्–

**छन्दःशास्त्रमिदं पुरा त्रिनयनाल्लेभे गुहोऽनादितस्–**
**तस्मात् प्राप सनत्कुमारकमुनिस्तस्मात् सुराणां गुरुः।**
**तस्माद्देवपतिस्ततः फणिपतिस्तस्माच्च सत्पिङ्गल–**
**स्तच्छिष्यैर्बहुभिर्महात्मभिरिदं मह्यां प्रतिष्ठापितम्॥**

**द्वितीयःक्रमः**– शिवः–गुहः–सनत्कुमारः–बृहस्पतिः–इन्द्रः–शेषनागः (पतञ्जलिः)–पिङ्गलश्चेत्येवं वर्तते।

**तृतीयःक्रमः**– पिङ्गलच्छन्दःसूत्रस्य हलायुधवृत्तौ पिङ्गलात् पूर्ववर्तिनां केषाञ्च नाचार्याणामुल्लेखो विद्यते।

तद्यथा–

न्यङ्कु–कौ (क्र) ष्टुकयास्कशाकटायनादिभिर्महर्षिभिर्विरचितानिच्छन्द:शास्त्राण्यत्यन्तकठिनानि ज्ञात्वा संसारोपकारेच्छया पिङ्गलाचार्येण छन्द:शास्त्रं विरचितम्।

**(iii) लौकिकच्छन्दसामवतार: छन्द:शास्त्रस्याचार्यपरम्परा च–**

लौकिकच्छन्दसां सम्बन्धे कालिदासस्यानुभूति: ''**निषाधविद्धाण्डजदर्शनोत्थ: श्लोकत्वमापद्यत यस्य शोक:**''। भवभूतिविरचितस्योत्तररामचरितनाटकस्य द्वितीयाङ्के ब्रह्मणो मुखान्निर्गता– ''**अहो! नूतनछन्दसामवतार:**'' महर्षिवाल्मीकेश्च ''**शोक: श्लोकत्वमागत:**'' इत्यादयस्तिस्र उक्तयो लौकिकच्छन्दसां शुभारम्भं सङ्केतयन्ति।

**छन्द:शास्त्रस्याचार्यपरम्परा** – छन्द:शास्त्रस्याचार्यपरम्परायां प्रमुखा आचार्या निम्नलिखिता: सन्ति–

**( १ ) आचार्यपिङ्गल:**– पिङ्गलस्य ''छन्द:सूत्रम्''–समुपलब्धेषु छन्दोग्रन्थेषु प्राचीनतमो ग्रन्थो विद्यते।। देशकालोऽस्याचार्यस्य सप्रमाणं न ज्ञायते। एका परम्परा पिङ्गलं पाणिनेरनुजतया वर्णयति, किन्तु प्रमाणाभावो विद्यते। पिङ्गलकृतस्य छन्द:सूत्रस्यानेके व्याख्याकारा अभूवन् तेषु हलायुध: सुप्रसिद्धो विद्यते।

**( २ ) जयदेव:**– आचार्यस्यास्य रचना ''जयदेवच्छन्द:'' इति नाम्ना प्रसिद्धा विद्यते। तदाधार: पिङ्गलकृतं छन्द:सूत्रमेव वर्तते।

**( ३ ) जयकीर्ति:**– कन्नडदेशीयोऽयं जैनसम्प्रदायसम्बद्धाचार्योऽष्टाधिकारविभक्तं ''छन्दोऽनुशासनम्'' अरचयत्। ग्रन्थस्य सप्तमेऽधिकारे कन्नडच्छन्दसां विवरणमुपलभ्यते।

**( ४ ) केदारभट्ट:**– केदारभट्टस्य प्रसिद्धरचना ''वृत्तरत्नाकर:'' विद्यते। वृत्तरत्नाकरे षट्सु अध्यायेषु १३६ श्लोका: सन्ति। ग्रन्थोऽयं छन्दोबद्धो विद्यते। अत्र लक्षणमेव छन्दस उदाहरणमपि समुपलभ्यतेऽत: पाठकानां कृते सौविध्यं भवति। वृत्तरत्नाकरस्य चतुर्दश टीकाकारा: सन्ति। वस्तुतो वृत्तरत्नाकर: छन्द:शास्त्रस्य लोकप्रियो ग्रन्थो विद्यते।

**( ५ ) क्षेमेन्द्र:**– क्षेमेन्द्रस्य ''सुवृत्ततिलकम्'' छन्दसां प्रयोगज्ञानाय श्रेष्ठा सोपानपरम्परा विद्यते। अस्मिन् ग्रन्थे रोचकं वर्णनं प्राप्यते। यत् कस्य छन्दस: कस्मिन् रूपे? कुत्र? कथञ्च प्रयोग: करणीय:? स्वकाव्येऽल्पच्छन्दसां प्रयोगकर्त्तार: कवयोऽनेनाचार्येण दरिद्रकवय इत्यभिधानेन भूषिता:।

**( ६ ) कालिदास:**– कालिदासस्य ''श्रुतबोध:'' लौकिकच्छन्दसां ज्ञानाय सर्वाधिकोपयोगी ग्रन्थो विद्यते। श्रुतबोधस्य ४४ श्लोकेषु ३७ छन्दसां वर्णनं प्राप्यते।

**( ७ ) हेमचन्द्र:**– हेमचन्द्रस्य ''छन्दोऽनुशासनम्'' छन्द:शास्त्रस्य सुप्रसिद्धो ग्रन्थो वर्तते। अत्र प्राकृतानां तथाऽपभ्रंशच्छन्दसां ज्ञानमपि कार्यते।

**( ८ ) गङ्गादास:**– गङ्गादासस्य ''छन्दोमञ्जरी'' अपि छन्द:शास्त्रस्य लोकप्रियो ग्रन्थो विद्यते। अत्रापि वृत्तरत्नाकरवल्लक्षणान्येवोदाहरणरूपं प्राप्नुवन्ति।

यद्यपि पिङ्गलरचितं छन्द:सूत्रं लौकिकच्छसां प्राचीनतमो ग्रन्थो विद्यते किन्त्वत्र सूत्रशैल्यां छन्दसां लक्षणानि प्रस्तुतानि सन्ति। तदाधृत्य रचितो वृत्तरत्नाकरश्छन्दोमञ्जरी च सरलतया सरसतया चोदाहरणान्वितं लक्षणं प्रस्तूय छन्द:परिचयं कारयत्यत एवेदं ग्रन्थद्वयं साहित्यिकेषु प्रसिद्धं विद्यते। तदेवात्रापि गृहीतम्। यथावसरञ्चान्येषां छन्दोग्रन्थानां साहाय्यमपि स्वीकृतम्।

**(iv) लौकिच्छन्दसां द्विविधत्वं गणानां शुभाशुभविचाराश्च–**

महर्षिपिङ्गलादयोऽन्ये च आचार्या लौकिकच्छन्दसां विभागद्वयं प्रतिपादयन्ति। तद्यथा–

(१) मात्राच्छन्द: (२) वर्णच्छन्दश्चेति। यथोक्तं वृत्तरत्नाकरे–

**पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा।**

**मात्रावर्णविभागेन छन्दस्तदिह कथ्यते ।।**

तत्र (१) **मात्राच्छन्दः**- यस्मिन् छन्दसि मात्रागणना क्रियतेऽर्थान्मात्रासङ्ख्यामाधृत्य रचना भवति तच्छन्दो मात्राच्छन्द इत्युच्यते। यथा आर्या, उपगीतिरित्यादीनि।

**(२) वर्णच्छन्दः**- यस्मिन् छन्दसि वर्णानां नियतसंख्याऽऽधारेण छन्दोरचना विधीयते तद् वर्णच्छन्द इत्युच्यते। यथा ''अनुष्टुप्'' इन्द्रवज्रादीनि।

**(v) गणादिलक्षणं, शुभाशुभविचारश्च-**

यथेदं त्रैलोक्यं भगवता विष्णुना व्याप्तं तथैव सर्वमपि वाङ्मयं म-य-र-स-त-ज-भ-न-ग-ल-इत्यादिभिर्दशभिरक्षरैर्व्याप्तं विद्यते। एषु दशसु अक्षरेषु आद्यान्यष्टावक्षराणि क्रमशोऽष्टगणानां नामानि सन्ति। ''ग'' इत्यनेन गुरोस्तथा ''ल'' इत्यनेन ''लघु'' इत्यस्य बोधो भवति। यथोक्तं वृत्तरत्नाकरे-

**म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।**
**समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ।।**

छन्दःशास्त्रे त्रयाणामक्षराणां समूहो गणसंज्ञको भवति। यत्र त्रयोऽपि वर्णा गुरवः, असौ मगणः। आदिलघुर्यगणः, मध्यलघू रगणः, अन्तगुरुः सगणः, अन्तलघुस्तगणः, आदिगुरुर्भगणः, मध्यगुरुर्जगणः सर्वलघुश्च नगण इत्युच्यते। अनेन प्रकारेण त्रित्र्यरक्षराणामष्टौ गणा भवन्ति। यथोल्लिखितं वृत्तरत्नाकरे-

**सर्वगुर्मो मुखान्तलो यरावन्तगलौ सतौ।**
**ग्-मध्याद्यौ जभौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः।।**

गणानां लक्षणं श्रुतबोधे यथा-

**आदिमध्यावसानेषु भजसा यान्ति गौरवम्।**
**यरता लाघवं यान्ति मनौ तु गुरुलाघवम्।।**

छन्दोमञ्जर्यामपि-

**मस्त्रिगुरुस्त्रिलघुश्च नकारो भादि गुरुः पुनरादिलघुर्यः।**
**जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः।।**

छन्दःशास्त्रानुसारम् अष्टानां गणानां स्वरूपं यथा-

| **मगणः** | **यगणः** | **रगणः** | **सगणः** | **तगणः** | **जगणः** | **भगणः** | **नगणः** |
|---|---|---|---|---|---|---|---|
| ऽऽऽ | ।ऽऽ | ऽ।ऽ | ।।ऽ | ऽऽ। | ।ऽ। | ऽ।। | ।।। |
| **सर्वगुरुः** | **आदिलघुः** | **मध्यलघुः** | **अन्तगुरुः** | **अन्तलघुः** | **मध्यगुरुः** | **आदिगुरुः** | **सर्वलघुः** |

छन्दःशास्त्रे एतेषां गणानां विषये बहुविचारः कृतो विद्यते। एतेषां भिन्ना भिन्ना देवताः सन्ति, फलान्यप्येतेषां भिन्नानि भिन्नानि भवन्ति। एतेषां स्वरूपमपि भिन्नं-भिन्नं भवति। यथा मगणनगणौ मित्रे स्तः। भगणयगणौ भृत्यौ स्तः। जगणतगणवुदासीनौ रगणसगणौ च शत्रू भवतः। यथा वर्णितं वृत्तरत्नाकरे-

**मनौ मित्रे भयौ भृत्यावुदासीनौ जतौ स्मृतौ**
**रसावरी नीचसंज्ञौ द्वौ द्वावेतौ मनीषिभिः।।**

मगणस्य देवता मही विद्यते सा लक्ष्मीं करोति। यगणस्य देवता जलमस्ति सा वृद्धिं ददाति। रगणस्य देवताऽग्निर्विद्यते सा मरणफला वर्तते। सगणस्य देवता वायुः फलं च परदेशगमनमस्ति। तगणस्य देवता आकाशः फलं च शून्यं विद्यते। जगणस्य देवता सूर्योऽस्ति रोगकरणं तत्फलं वर्तते, भगणस्य देवता चन्द्रमाः फलं च निर्मलकीर्तिर्विद्यते। नगणस्य देवता स्वर्गः, फलं च सुखदानं भवति। वृत्तरत्नाकरानुसारम्-

**मो भूमिः श्रियमातनोति यजलं वृद्धिं रचाग्निर्मृतिं,**

**सो वायुः परदेशदूरगमनं, तव्योम शून्यं फलम्।**
**जः सूर्यो रुजमाददाति विपुलं, भेन्दुर्यशो निर्मलं,**
**नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः।।**

**कोष्ठकम्**

| | **गणनाम** | **रूपम्** | **देवता** | **फलम्** | **मित्रादिकम्** | **फलम्** |
|---|---|---|---|---|---|---|
| १. | मगणः | ऽऽऽ | मही | लक्ष्मीः | मित्रम् | शुभम् |
| २. | यगणः | ।ऽऽ | जलम् | वृद्धिः | दासः | शुभम् |
| ३. | रगणः | ऽ।ऽ | अग्निः | मरणम् | शत्रुः | अशुभम् |
| ४. | सगणः | ।।ऽ | वायुः | विदेशगमनम् | शत्रुः | अशुभम् |
| ५. | तगणः | ऽऽ। | आकाशम् | शून्यम् | उदासीनः | अशुभम् |
| ६. | जगणः | ।ऽ। | सूर्यः | रोगः | उदासीनः | अशुभम् |
| ७. | भगणः | ऽ।। | चन्द्रमाः | कीर्तिः | दासः | शुभम् |
| ८. | नगणः | ।।। | स्वर्गः | आयुः | मित्रम् | शुभम् |

गणानां शुभाशुभविचारमिव वर्णानामपि शुभाशुभविचारश्छन्दःशास्त्रे क्रियते। साधारणतया ऋ-ङ-झ-ञ-र-ल-व-स-ह-इत्यादयो वर्णाः टवर्गस्य पवर्गस्य च सर्वे वर्णा अशुभा मन्यन्ते। अवशिष्टाः सर्वे वर्णाः शुभफलदायका भवन्ति। काव्यस्यादौ दुष्टवर्णानां दुष्टगणानाञ्च प्रयोगस्य निषेधो विद्यते।

आर्यादिमात्राच्छन्दसामपि गणा भवन्ति, ते चतुर्मात्रिका भवन्ति। एतादृशाः पञ्च गणा भवन्ति। यथा-

| १ | २ | ३ | ४ | ५ |
|---|---|---|---|---|
| ऽऽ | ।।ऽ | ।ऽ। | ऽ।। | ।।।। |
| (सर्वगुरुः) | (अन्तगुरुः) | (मध्यगुरुः) | (आदिगुरुः) | (सर्वलघुः) |

**लघुगुरुलक्षणम्-वृत्तरत्नाकरानुसारम्-**

**सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।**
**वा पदान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः।।**

अर्थात्- १. अनुस्वारयुक्तः स्वरो गुरुर्भवति।

२. यस्यान्ते विसर्गो विद्यमानो भवति स स्वरो गुरुर्भवति।

३. दीर्घः प्लुतस्वरश्च गुरुर्भवति।

४. यस्य स्वरस्याग्रे संयुक्तवर्णो भवति स गुरुर्भवति।

अ. व्यञ्जनस्य पुरोभागे विद्यमानत्वे सति स्वरो गुरुर्भवति।

आ. जिह्वामूलीयस्य तथा

इ. उपध्मानीयस्याग्रे विद्यमानत्वे लघुस्वरो गुरुर्भवति।

५. छन्दःशास्त्रे पादादावक्षरसंयोगः क्रमसंज्ञको भवति। तस्य पुरतो विद्यमानो गुरुवर्णोऽपि क्वचिल्लघुतां याति। यथोक्तं वृत्तरत्नाकरे-

**पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः।**
**पुरःस्थितेन तेन स्यात् लघुतापि क्वचिद् गुरोः।।**

यथा- **तरुणं सर्षपशाकं नवौदनं पिच्छलानि च दधीनि।**
**अल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति।।**

अत्रच तुर्थचरणस्यादौ स्थित:स ंयुक्त:' 'ग्र''इ तिश ाब्द:क्र मनामाभ वति ात थाच स ंयुक्तपरत्वाद्ग ुरु: ''सुन्दरि'' इत्येतस्य इकार आर्यायास्तृतीयचरणस्थद्वादशमात्रानिर्वाहकतया लघुभावं स्वीकरोति।

छन्द:शास्त्रे प्रयुज्यमानानामब्धिभूतरसादीनां संज्ञा लोकतोऽवगन्तव्या। यथोक्तं वृत्तरत्नाकरे–

**अब्धिभूतरसादीनां ज्ञेया संज्ञात्र लोकतः।**

यथा– संङ्ख्यानां कृते प्रयुक्ताः शब्दा:– छन्दसां लक्षणेषु सङ्ख्यां ज्ञापयितुं साङ्केतिक–शब्दाः अपि प्रयुज्यन्ते। छन्दसां लक्षणबोधाय साङ्केतिकशब्दानां ज्ञानमपेक्षितं भवति। छन्द:शास्त्रे सुप्रसिद्धाः साङ्केतिक–सङ्ख्याशब्दाः यथा–

| **क्र.सं.** | **साङ्केतिकशब्दाः** | **सङ्ख्या** |
|---|---|---|
| १. | चन्द्रमा:, पृथ्वी | एकम् |
| २. | पक्षौ, नेत्रे | द्वे |
| ३. | गुणा:, रामा:, अग्नय: | त्रीणि |
| ४. | वेदा:, वर्णा:,युगा:,आश्रमा: | चत्वारि |
| ५. | शरा:,इन्द्रियाणि,भूता:,तत्वानि | पञ्च |
| ६. | शास्त्राणि,रसा:,ऋतव: | षट् |
| ७. | अश्वा:,मुनय:,लोका:,स्वरा:, | सप्त |
| ८. | वसव:,यामा:,सिद्धय: | अष्ट |
| ९. | अङ्का:,ग्रहा:,द्रव्याणि,निधय: | नव |
| १०. | दिश:,अवतारा: | दश |
| ११. | रुद्रा: | एकादश |
| १२. | सूर्या:,मासा: | द्वादश |

छन्द:शास्त्रे संख्याद्योतनाय एतेषां शब्दानामेव प्रयोगः क्रियते।

**चरण:**– पद्यस्य चतुर्थो भागश्चरण इत्युच्यते।

यथोक्तं वृत्तरत्नाकरे – **ज्ञेयो पादश्चतुर्थोऽशः।**

**यतिः** – वृत्ते यत्र विरामो भवति तत्र यतिर्बोध्या।

वस्तुतो विच्छेदोऽथवा विराम एव यतिसंज्ञां भजते।

यथोक्तं वृत्तरत्नाकरे – **यतिर्विच्छेदसंज्ञिका।**

छन्द:शास्त्रे समस्थानयोरर्थाद् द्वितीयचतुर्थयोर्युक्संज्ञा विषमयोरर्थात् प्रथमतृतीयस्थानयोश्चायुक् संज्ञा भवति।

**वृत्त–विभागः**

**(vi) वृत्तविभागस्तज्जातयश्च** – पद्यं द्विविधं भवति–(१)जाति: (२)वृत्तञ्च। जातिच्छन्दो मात्रासंख्यामालम्बते। वृत्तञ्च वर्णानां नियमितसन्निवेशाधृतं भवति। वृत्तं त्रिविधं भवति–(१) समवृत्तम् (२) अर्धसमवृत्तम् (३) विषमवृत्तञ्च। यथोक्तं वृत्तरत्नाकरे–

**युक् समं विषमं चायुक् स्थानं सद्भिर्निगद्यते।**
**सममर्धसमं वृत्तं विषमं च तथाऽपरम्।।**

तत्र समवृत्तं यथा–

**अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः।**

**तत् छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ।।**

अर्धसमवृत्तं यथा–

**प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।**
**द्वितीयस्तुर्यवत् वृत्तं तदर्धसममुच्यते ।।**

विषमवृत्तं यथा–

**यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।**
**तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ।।**

समवृत्तभेदाः– एकाक्षरात् पादादारभ्य एकाक्षरवर्धितैः पादैर्यावत् षड्विंशतिसङ्ख्याकं प्रति गमनं भवति, तावत् पृथक् छन्दो भवति । वृत्तरत्नाकरानुसारम्–

**आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः ।**
**पृथक् छन्दो भवेत् पादैर्यावत् षड्विंशतिं गतम् ।।**

ततः षड्विंशत्यक्षरात्मकपादात् वृत्तादूर्ध्वमर्थात् सप्तविंशत्याद्यक्षरपादा यदा भवन्ति तदा ते चण्डवृष्ट्याद्यभिधाना दण्डकाःपरिकीर्तिता भवन्ति। एभ्यो वृत्तेभ्योऽन्यास्त्रिभिः षड्भिर्वा चरणैरुपलक्षिता गाथा इत्युच्यन्ते । यथोक्तं वृत्तरत्नाकरे–

**तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः ।**
**शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ।।**

षड्विंशतिविधानि समच्छन्दांसि भवन्ति। प्रत्येकं छन्दः एकया जात्या सम्बन्धितं भवति। अतो नियमतः षड्विंशतिजातयः सन्ति । ताश्च–

१. उक्ता २. अत्युक्ता ३. मध्या ४. प्रतिष्ठा ५.सुप्रतिष्ठा ६.गायत्री ७.उष्णिक् ८.अनुष्टुप् ९.बृहती १०.पङ्क्तिः ११.त्रिष्टुप् १२.जगती १३.अतिजगती १४.शक्वरी १५.अतिशक्वरी १६.अष्टिः १७.अत्यष्टिः १८.धृतिः १९.अतिधृतिः २०.कृतिः २१.प्रकृतिः २२.आकृतिः २३.विकृतिः २४.सङ्कृतिः २५.अतिकृतिः २६.उत्कृतिः

एषु छन्दःसु क्रमशश्चत्वारि चत्वार्यक्षराणि वर्धन्ते । वृत्तरत्नाकरे यथा–

**उक्ताऽत्युक्ता तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका ।**
**गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ।।**
**त्रिष्टुप् च जगती चैव तथाऽतिजगती मता ।**
**शक्वरी साऽतिपूर्वा स्यादष्ट्यत्यष्टी तथा स्मृते ।।**
**धृतिश्चाधृतिश्चैव कृतिः प्रकृतिराकृतिः ।**
**विकृतिः सङ्कृतिश्चैव तथाऽतिकृतिरुत्कृतिः ।।**

अनेन प्रकारेणोक्तादिभेदेन छन्दसां षड्विंशतिजातयो भवन्ति। छन्दसां विषये विस्तरेण साहित्यशास्त्रे विचारः सम्प्राप्यते।

अत्र पाठ्यक्रमानुरोधेन क्रमशः प्रहर्षिणी–वसन्ततिलका–मालिनी–मन्दाक्रान्ता–हरिणी–शिखरिणी–शार्दूलविक्रीडित–स्रग्धरावृत्तानां लक्षणोदाहरणानि प्रस्तूयन्ते–

**( १ ) प्रहर्षिणी**– लक्षणम्– **म्नौ ज्रौ गः त्रिदशयतिः प्रहर्षिणीयम् ।** अर्थात् यस्य प्रतिचरणं मगण–नगण–जगण–रगणाः अन्ते च एकः गुरुवर्णः भवति तत् प्रहर्षिणीनाम वृत्तं भवति । अत्र त्रिभिः दशभिश्च अक्षरैः यतिः भवति ।

**उदाहरणम्–**

म. न. ज. र. गु.
ऽ ऽ ऽ । । । । ऽ । ऽ । ऽ ऽ
निर्दिष्टां कुलपतिना च पर्णशाला

**मध्यास्य प्रयतपरिग्रहद्वितीयः।**
**तच्छिष्याध्ययननिवेदितावसानां,**
**संविष्टः कुशशयने निशां निनाय।।**

**(२) वसन्ततिलका**- लक्षणम्- **उक्ता वसन्ततिलका तभजा जगौ गः।** अर्थात् यस्य वृत्तस्य प्रतिचरणं क्रमशः तगण-भगण-जगण-जगणाः अन्ते च द्वौ गुरुवर्णौ भवेतां तत् वसन्ततिलकावृत्तं भवति। अत्र अष्टाभिः षड्भिश्च अक्षरैः यतिः भवति।

**उदाहरणम्-**

त. भ. ज. ज. गु.गु. (विकल्पेन)
ऽ ऽ । ऽ । । । ऽ । । ऽ । ऽ ऽ
पापान्निवारयति योजयते हिताय

**गुह्यं निगूहति गुणान् प्रकटीकरोति।**
**आपद्गतं च न जहाति ददाति काले**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।**

(३) **मालिनी**- लक्षणम्- **ननमयययुतेयं मालिनी भोगिलोकैः।** अर्थात् यस्य प्रतिचरणं नगण-नगण-मगण-यगण-यगणाः च भवन्ति तत् मालिनीवृत्तं भवति। अत्र अष्टाभिः सप्तभिश्च अक्षरैः यतिः।

**उदाहरणम्-**

न. न. म. य. य.
। । । । । । ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ
मनसि वचसि काये पुण्यपीयूषपूर्णा

**स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।।**

**(४) शिखरिणी**- लक्षणम्- **रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।** अर्थात्- यस्य प्रतिचरणं क्रमशः यगण-मगण-नगण-सगण-भगणाः अन्ते च एकः लघुवर्णः एकश्च गुरुवर्णः भवति तत् शिखरिणीवृत्तं भवति। षड्भिः एकादशभिश्च वर्णैः यतिः भवति।

**उदाहरणम्-**

य. म. न. स. भ. ल.गु.
। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । । । ऽ
शिरः शार्वं स्वर्गात् पशुपतिशिरस्तः क्षितिधरं

**महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।**
**अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा**
**विवेकभ्रष्टानां भवति विनिपातः शतमुखः।।**

**( ५ ) हरिणी**– लक्षणम्– **न समरसलागः षड्वेदैर्हयै र्हरिणी मता।** अर्थात् यस्य प्रतिचरणं क्रमशः नगण–सगण–मगण–रगण–सगणाः अन्ते च एकः लघुवर्णः एकश्च गुरुवर्णः भवेत् तत् हरिणीवृत्तं भवति। अत्र षड्भिः चतुर्भिः सप्तभिश्च वर्णैः यतिः भवति।

**उदाहरणम्**–

न. स. म. र. स. ल.गु.

। । । । । ऽ ऽ ऽ ऽ ऽ ऽ । ऽ । । ऽ । ऽ

न समरसनाः कालं भोगाश्चलं धनयौवनं

**कुरुत सुकृतं यावन्नेयं तनुः प्रविशीर्यते।**

**किमपि कलना कालस्येयं प्रधावति सत्वरा**

**तरुणहरिणी सन्त्रस्तेव प्लवप्रविसारिणी।।**

**( ६ ) मन्दाक्रान्ता**– लक्षणम्– **मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्।** अर्थात् यस्य प्रतिचरणं मगण–भगण–नगण–तगण–तगणाः अन्ते च द्वौ गुरुवर्णौ भवतः तत् मन्दाक्रान्तावृत्तं भवति। अत्र चतुर्भिः षड्भिः सप्तभिश्च यतिः भवति।

**उदाहरणम्**–

म. भ. न. त. त. गु. गु.

ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं

**विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।**

**लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं**

**वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्।।**

**( ७ ) शार्दूलविक्रीडितम्**– लक्षणम्– **सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।** अर्थात् यस्य प्रतिचरणं मगण–सगण–जगण–सगण–तगण–तगणाः अन्ते च एकः गुरुवर्णः भवति तत् शार्दूलविक्रीडितवृत्तं भवति। द्वादशभिः सप्तभिश्च वर्णैः यतिः भवति।

**उदाहरणम्**–

म. स. ज. स. त. त. गु.

ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ ऽ । ऽ ऽ । ऽ

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,

**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**

**विद्या बन्धुजनो विदेशगमने विद्या परा देवता,**

**विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।**

**( ८ ) स्रग्धरा**– लक्षणम्– **म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।** अर्थात् यस्य प्रतिचरणं मगण–रगण–भगण–नगण–यगण–यगण–यगणाः भवन्ति। त्रिवारं सप्तभिः अर्थात् सप्तभिः, सप्तभिः सप्तभिश्च वर्णैः यतिः भवति।

**उदाहरणम्**–

म. र. भ. न. य. य. य.

ऽ ऽ ऽ ऽ । ऽ ऽ । । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री

**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**

**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**

**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतुवस्ताभिरष्टाभिरीशः।।**

# अभ्यास-प्रश्नाः

## बहुविकल्पात्मकाः प्रश्नाः

१. वेदस्य पादौ स्तः –

(क) छन्दः (ख) ज्योतिषम्

(ग) व्याकरणम् (घ) कल्पः

२. छन्दःशास्त्रस्य प्रथमः आचार्यः अस्ति –

(क) पाणिनिः (ख) भरतः

(ग) पिङ्गलः (घ) केदारभट्टः

३. पिङ्गलस्य छन्दोविषयका रचना अस्ति –

(क) वृत्तरत्नाकरः (ख) छन्दोमञ्जरी

(ग) छन्दःसूत्रम् (घ) श्रुतबोधः

४. छन्दःशास्त्रे गणाः भवन्ति –

(क) त्रयः (ख) पञ्च

(ग) सप्त (घ) अष्ट

५. निम्नलिखितेषु मात्रिकच्छन्दः अस्ति –

(क) इन्द्रवज्रा (ख) वसन्ततिलका

(ग) आर्या (घ) अनुष्टुप्

## अतिलघूत्तरात्मकाः प्रश्नाः

१. छन्दोगणविधायकं सूत्रं लेखनीयम्।

२. ह्रस्वः वर्णः कः भवति?

३. दीर्घः वर्णः कः भवति?

४. लौकिकच्छन्दः कतिविधं भवति?

५. वार्णिकच्छन्दः कतिविधं भवति?

६. छन्दःशास्त्रे पादः कः उच्यते?

७. छन्दःशास्त्रानुसारं गणस्य परिभाषां लिखत।

८. यतेः परिभाषां लिखत।

९. सर्वदा यतिः कुत्र भवति?

## लघूत्तरात्मकाः प्रश्नाः

१. वर्णानां लघु-गुरु-व्यवस्थां लिखत।

२. लौकिकच्छन्दः कतिविधं भवति? नामोल्लेखं कुरुत।

३. मात्रिकच्छन्दसः परिभाषा लेख्या।

४. अष्टानां गणानां स्वरूपं प्रदर्शनीयम्।

५. समवृत्तस्य परिभाषा लेखनीया।

६. अर्द्धसमवृत्तस्य परिभाषा का?

७. विषमवृत्तस्य स्वरूपं ज्ञापनीयम्।

८. प्रहर्षिणी–वृत्तस्य लक्षणं लेखनीयम्।

९. हरिणी–वृत्तस्य लक्षणं लेखनीयम्।

१०. स्रग्धरावृत्तस्य लक्षणं प्रदर्शनीयम्।

११. शिखरिणीवृत्तस्य लक्षणं लेखनीयम्।

**निबन्धात्मका: प्रश्ना:**

१. वसन्ततिलकावृत्तस्य लक्षणोदाहरणे लेखनीये।

२. मालिनीच्छन्दसो लक्षणोदाहरणे प्रदर्शनीये।

३. मन्दाक्रान्तावृत्तस्य लक्षणोदाहरणे लेखनीये।

४. शार्दूलविक्रीडितवृत्तस्य लक्षणोदाहरणे प्रदर्शनीये।

५. अधोलिखित–पङ्क्तिषु छन्दोनिर्देश: कार्य:–

    १. पापान्निवारयति योजयते हिताय

    २. निर्दिष्टां कुलपतिना च पर्णशाला–

    ३. मनसि वचसि काये पुण्यपीयूषपूर्णा

    ४. न समरसना: कालं भोगाश्चलं धनयौवनम्

६. निम्नलिखितोदाहरणेषु छन्दोनिर्णयं कृत्वा तल्लक्षणानि लेख्यानि –

१. या सृष्टि: स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्त: श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहु: सर्वबीजप्रकृतिरिति यया प्राणिन: प्राणवन्त:
प्रत्यक्षाभि: प्रपन्नस्तनुभिरवतुवस्ताभिरष्टाभिरीश:।।

२. शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्।।

३. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी यश:सुखकरी विद्या गुरूणां गुरु:।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता,
विद्या राजसु पूज्यते न तु धनं विद्याविहीन: पशु:।।

४. शिर: शार्वं स्वर्गात् पशुपतिशिरस्त: क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।
अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपात: शतमुख:।।

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

१. क    २. ग    ३. ग    ४. घ    ५. ग

# सप्तमः पाठः

## अलङ्काराः

'**अलङ्काररहिता विधवेव सरस्वती**' इति अग्निपुराणवचनानुसारमलङ्कारस्य महत्त्वं स्पष्टतया ज्ञातुं शक्यते। यद्यपि काव्येऽलङ्काराणां बाह्यशोभाधायकरूपेणैव प्रतिष्ठा वर्तते किन्त्वेतत्तु स्वीकरणीयमेव यज्जीवने यथा वस्त्रादीनाम् आभूषणानाञ्च महत्त्वं वर्तते तथैव काव्ये अलङ्काराणाम् अपि महत्त्वं वर्तते। अत्र पद्यमिदं सार्थकं प्रतीयते–

**वासः प्रधानं खलु योग्यताया,**
**वासोविहीनं विजहाति लक्ष्मीः।।**
**पीताम्बरं वीक्ष्य ददौ तनूजां,**
**दिगम्बरं वीक्ष्य विषं समुद्रः।।**

एवमेव भाषान्तरगुम्फितम् एतदुदाहरणमपि काव्येऽलङ्काराणां महत्त्वं समुद्घोषयति–

**यदपि सुजाति सुलच्छना सुबरन सरस सुवृत्त।**
**भूषन बिन न बिराजई कविता वनिता मित्त।।**

अलङ्कारशास्त्रस्य प्रथमाचार्यरूपेण प्रतिष्ठितस्य भामहस्य कथनमपि एतदेव समर्थयति –**न कान्तमपि निर्भूषं विभाति वनिताननम्।** तन्मतेऽलङ्कारविहीनं काव्यमपि न शोभते।

**अलङ्कारस्य स्वरूपम् अलङ्कारशास्त्रञ्च–**

प्रचलितभाषायां शोभावर्धकवस्तुनः कृतेऽलङ्कारशब्दस्य प्रयोगः क्रियते। तत्र काव्यस्य शोभावर्धकं तत्त्वम् अलङ्कारं कथयन्ति काव्यज्ञाः। यथोक्तं काव्यादर्शे आचार्यदण्डिना–

**काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।**

अलम्पूर्वकात् 'कृ' धातोः '**अलङ्क्रियतेऽनेनाथवाऽलङ्करोतीति**' व्युत्पत्त्या करणेऽथवा भावे घञ्–प्रत्यये कृते सति अलङ्कारपदं निष्पन्नं भवति। अर्थाद् येन पदार्थेन तत्त्वेन वा किञ्चिद् वस्तु सुशोभितं भवत्यथवा तस्य सौन्दर्ये वृद्धिर्भवति स पदार्थः अलङ्कार इत्युच्यते।

काव्यगतसौन्दर्यस्य समीक्षकं शास्त्रम् अलङ्कारशास्त्रम् इति कथ्यते। काव्यशास्त्राचार्या अलङ्कारशब्दस्य प्रयोगं व्यापकेऽर्थेऽकुर्वन्। तदनुसारम् अलङ्कारशास्त्रमद्यतनसाहित्यशास्त्रस्य पर्यायत्वेन ज्ञायते। सर्वप्रथमम् आचार्यो वामनः अलङ्कारशब्दस्य व्यापकतां प्रतिपादयन्नाह–

'**काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारः।**'

अर्थात् काव्ये अलङ्कारस्य महत्त्वं भवति सौन्दर्यमेव च अलङ्कारः अस्ति। वस्तुतः सौन्दर्यबोधस्य समग्रा दृष्टिरेव अलङ्कारपदवाच्या भवति। कस्यचित् केनचित् सह समानताप्रदर्शनमेव अलङ्कारपदभाक् न भवत्यपितु सर्वे अलङ्काराः हृदयाह्लादकत्वेन काव्यशोभावर्धकाः सन्तः अलङ्काररूपेण मान्या भवन्ति। यथा 'गोसदृशो गवयः' इति कथनमात्रेण उपमालङ्कारो न भवति। यावदुपमानोपमेययोः सादृश्यलक्ष्मीर्न उल्लसति वर्णने तावद् उपमालङ्कारो न स्वीक्रियते। वस्तुतः सर्वेषाम् अलङ्काराणां मूले सौन्दर्यमेव विद्यते। प्राचीनाचार्यैः सौन्दर्यमेवालङ्काररूपेण स्वीकृतम्, अलङ्काराणां च काव्ये प्राधान्यादेव साहित्यशास्त्रस्य प्राचीनं नाम अलङ्कारशास्त्रम् इति अङ्गीकृतम्।

उत्तरवर्त्तिकाले '**काव्यास्यात्मा ध्वनि**' रिति सिद्धान्तः सर्वमान्यः अभवत्। तदा रसः अलङ्कार्यः अलङ्कारश्च

तत्शोभावर्धकरूपेण स्वीकृतः काव्यज्ञैः। अत एव '**अलङ्कृतिः अलङ्कारः**' इति व्युत्पत्तिस्थाने '**अलङ्क्रियते अनेने**' ति अलङ्कारः इति व्युत्पत्तिः प्रचलिता सञ्जाता। अनेनार्थेन '**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।**' इति लक्षणं संगतं भवति।

अलङ्काराणां प्राचीनता महत्त्वञ्चानेनैव सिध्यति यत् प्राचीनतमे वैदिकसाहित्ये अन्यसाहित्येष्वपि च अलङ्काराणां संस्थितिः दृश्यते। अलङ्कारशास्त्रस्य प्रारम्भः कुतः अभवदिति निश्चितरूपेण तु वक्तुं न शक्यते किन्तु वेदाङ्गभूतयोः निरुक्तव्याकरणयोः उपमा-उपमान-उपमेय-सामान्यवचनादि-शब्दाः प्रसिद्धिं प्राप्तवन्त आसन् इति अलङ्कारशब्दस्य प्राचीनतां परिचेतुम् अलम्।

अत्र अलङ्कारशास्त्रस्य (साहित्यशास्त्रस्य) केषाञ्चन प्रसिद्धाचार्याणां तन्निर्मितालङ्कारग्रन्थानां च सूचीप्रदर्शनं प्रासङ्गिकतां भजते। केचन प्रसिद्धा आलङ्कारिका आचार्या तन्निर्मितग्रन्थाश्च निम्नलिखिताः सन्ति-

| **आचार्यः** | **समयः** | **ग्रन्थः** |
|---|---|---|
| १.भामहः | (षष्ठी शताब्दी ई.) | काव्यालङ्कारः |
| २.दण्डी | (अष्टमी शताब्दी ई.) | काव्यादर्शः |
| ३.उद्भटः | (७७९ ई तः ८१३ ई. यावत्) | काव्यालङ्कारसारसंग्रहः |
| ४.वामनः | (नवमी शताब्दी ई.) | काव्यालङ्कारसूत्राणि |
| ५.रुद्रटः | (नवमी शताब्दी ई.) | काव्यालङ्कारः |
| ६.भोजराजः | (एकादश-शताब्दी) | सरस्वतीकण्ठाभरणम् |
| ७.मम्मटः | (एकादश-शताब्द्या उत्तरार्द्धः) | काव्यप्रकाशः |
| ८.राजानकरुय्यकः | (द्वादश-शताब्दी) | अलङ्कारसर्वस्वम् |
| ९.हेमचन्द्रः | (द्वादश-शताब्दी) | काव्यानुशासनम् |
| १०.शोभाकरमिश्रः | (द्वादश-शताब्दी) | अलङ्कार-रत्नाकरः |
| ११.वाग्भटः | (द्वादश-शताब्दी ई.) | वाग्भटालङ्कारः |
| १२.जयदेवः | (त्रयोदश-शताब्दी ई.) | चन्द्रालोकः |
| १३.विद्याधरः | (त्रयोदश-चतुर्दश-शताब्दी) | एकावली |
| १४.विश्वनाथः | (चतुर्दश-शताब्दी) | साहित्यदर्पणः |
| १५.अप्पयदीक्षितः | (षोडश-सप्तदश-शताब्दी) | कुवलयानन्दः |
| १६.पण्डितराजजगन्नाथः | (सप्तदश-शताब्दी) | रसगङ्गाधरः |
| १७.विश्वेश्वरपण्डितः | (अष्टादश-शताब्द्याः-पूर्वार्द्धः) | अलङ्कारकौस्तुभम् |

यद्यपि काव्यात्मरूपेण अलङ्काराणां महत्त्वं स्वीकर्तुं न शक्यते, तथापि शब्दार्थशरीरस्य बाह्यसौन्दर्यं वर्धयन्त एते रसादीन् अपि पोषयन्ति। यथा सकलगुणसमन्वितः अपि मानवो निर्वसनो न शोभते, तथैव अलङ्कारहीनं काव्यमपि न शोभते। अलङ्काराणां काव्यशोभा-कर्तृत्वधर्मस्वीकरणे नास्ति वैमत्यम्।

**अलङ्काराणां वर्गीकरणम्**- '**शब्दार्थौ काव्यमिति**' कथयद्भिः साहित्याचार्यैः शब्दार्थयोः सम्मिलितस्वरूपमेव काव्यत्वेन अङ्गीकृतम् अतः अलङ्काराणां वर्गीकरणमपि मुख्यतया द्विविधं क्रियते- १. शब्दालङ्कारः २. अर्थालङ्कारश्च। तत्र-

**१. शब्दालङ्कारः**- यत्र शब्देन अलङ्कारस्थितिः भवति तत्र शब्दालङ्कारो भवति। यथोक्तम्- शब्दपरिवर्तनासहत्वे शब्दालङ्कारः। अर्थाद् यत्र शब्दपरिवर्तनेन अलङ्कारो लुप्तो भवति तत्र शब्दालङ्कारो भवति, यतो हि अस्य शब्दनिष्ठता भवति।

शब्दालङ्काराणां सङ्ख्या षड् विद्यते– १. अनुप्रासः २. यमकम् ३. श्लेषः ४. वक्रोक्तिः ५.पुनरुक्तवदाभासः ६.चित्रालङ्कारः।

**२. अर्थालङ्कारः–** अर्थाश्रितोऽलङ्कारः अर्थालङ्कारः कथ्यते। पर्यायशब्दप्रयोगेऽपि यत्र अलङ्कारस्थितिः अक्षुण्णा तिष्ठति तत्रार्थालङ्कारो भवति। यथोक्तम्– **शब्दपरिवर्तनसहत्वेऽर्थालङ्कारः।**

अर्थालङ्काराणां वर्गीकरणं बहुधा क्रियते। रूपकोपमाप्रमुखा अर्थालङ्काराः शतमतिक्रामन्ति। कुवलयानन्दकारेणाप्पयदीक्षितेन ११३ अलङ्कारा वर्णिताः। अत्रावधेयं यत् श्लेष उभयालङ्कारत्वेन गण्यते। अस्य द्वौ भेदौ साहित्ये प्राप्येते– १. शब्दश्लेषः २. अर्थश्लेषश्च।

अत्र पाठ्यक्रमानुबन्धेन अनुप्रास–यमक–श्लेष–उपमा–रूपक–उत्प्रेक्षा–अन्वयालङ्काराणां भेदोपभेदप्रदर्शनं विना लक्षणोदाहरणानि प्रस्तूयन्ते। तत्र–

**१.अनुप्रासः–** 'अनु=अनुगतः, प्र=प्रकृष्टः, आसः=न्यासः' अनुप्रासः। अर्थाद् रसभावादि–अनुगतो वर्णविन्यासः अनुप्रासः भवति। अयं शब्दालङ्कारः विद्यते।

**लक्षणम्–अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।**

अर्थात् स्वराणां वैषम्ये (भिन्नत्वे) सति अपि शब्दानां समानता यत्र भवति तत्रानुप्रासालङ्कारो भवति। अत्र शब्दसाम्येन वर्णानामेव समानता अभिप्रेता विद्यते। स्वरसाम्येऽपि अनुप्रासो भविष्यति। उदाहरणम्–

**ततो मृगेन्द्रस्य मृगेन्द्रगामी**
**वधाय वध्यस्य शरं शरण्यः**
**जाताभिषङ्गो नृपतिर्निषङ्गा–**
**दुद्धर्तुमैच्छत् प्रसभोद्धृतारिः।।**

अत्रम ृगेन्द्रस्य–मृगेन्द्रगामी,व धाय–वध्यस्य,श रं–शरण्यः,ज ाताभिषङ्गःन ृपतिर्निषङ्गात्इ त्यादिषुस् थलेषु शब्दसाम्याद् अनुप्रासः।

**२.यमकम्–** शब्दालङ्कारेषु यमकः प्रमुखालङ्कारो विद्यते। यमकशब्दस्यार्थो भवति युगलमिति अत्र स्वर–व्यञ्जनसमूहस्य युगलं निर्मितं भवति।

**लक्षणम्–**

**सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।**
**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।**

अर्थात् स्वर–व्यञ्जनसमुदायस्य तेनैव क्रमेण आवृत्तिः यमकमिति कथ्यते, यदि स समुदायः अर्थवान् भवेत् अपरः समुदायश्च भिन्नार्थकः भवेत्। अत्र आवर्त्त्यमान–समुदायस्य तिस्रः स्थितयो भविष्यन्ति–

१.कुत्रचिद् द्वावपि सार्थकौ भविष्यतः। २.कुत्रचिद् उभावपि निरर्थकौ भविष्यतः। ३.कुत्रचिद् एकः सार्थकः अपरश्च निरर्थको भविष्यति।

उदाहरणम्–

**नवपलाश–पलाशवनं पुरः**
**स्फुटपराग–परागतपङ्कजम्।**
**मृदुल–तान्त–लतान्तमलोकयत्**
**स सुरभिं सुरभिं सुमनोभरैः।।**

प्रस्तुते पद्ये 'पलाश–पलाश सुरभिं–सुरभिं' च इति पदद्वयम् अपि सार्थकं विद्यते। 'पराग–पराग' इति पदद्वये

एकं सार्थकम् अपरं च निरर्थकं विद्यते। एवमेव 'लतान्त-लतान्त' इत्यत्रैकं सार्थकमन्यच्च निरर्थकं विद्यते।

**३. श्लेष:**- अनेकार्थपदानां प्रयोगे श्लेषनामक: अलङ्कारो भवति।

**लक्षणम्- श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।** अर्थात् यत्र अनेकार्थकानि श्लिष्टानि पदानि प्रयुज्यन्ते तत्र श्लेषालङ्कारो बोधनीय:। उदाहरणम्-

**प्रतिकूलतामुपगते हि विधौ**
**विफलत्वमेति बहुसाधनता।**
**अवलम्बनाय दिनभर्तुरभून्**
**न पतिष्यत: करसहस्रमपि।।**

अत्र विधौ (भाग्ये चन्द्रमसि च) करसहस्रम् (हस्तसहस्रं रश्मिसहस्रं च) इत्यत्र श्लेषो विद्यते।

**४. उपमा**- अर्थालङ्कारेषु सादृश्यगर्भालङ्काराणां मूले उपमा एव भवति। उपमायां भेदे सत्यपि साधर्म्येणाभेद एव तिष्ठति।

**लक्षणम्- प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते।**

अर्थात् स्फुटं सुन्दरं च साम्यम् उपमा इति कथ्यते। उपमालङ्कारस्य पूर्णतायै चतुर्णां तत्त्वानाम् आवश्यकता भवति। एते भवन्ति- १. उपमानम् २.उपमेयम् ३.साधारण-धर्म: ४.उपमावाचक: शब्दश्च। तत्र- यस्य वर्णनं क्रियते तत् उपमेयं, येन साम्यं प्रदर्श्यते तत् उपमानं, यत्साम्यं वर्ण्यते स साधारणधर्म: यै: शब्दैश्च तत्साम्यं प्रदर्श्यते ते उपमावाचका: शब्दा: भवन्ति। यथा-हंस इव धवलो बक:। इत्यत्र हंस उपमानपदं, बक उपमेयपदं, धवल: साधारण-धर्मपदं इव च उपमावाचकं पदं विद्यते। यदा एतानि चत्वारि तत्त्वानि भवन्ति तदा पूर्णोपमा कस्यचिद् एकस्य अथवा अनेकेषाम् अभावे च लुप्तोपमा भवति।

**उदाहरणम्- हंसीव कृष्ण! ते कीर्तिः स्वर्गङ्गामवगाहते।**

अत्रोपमेयं कीर्ति:, उपमानं हंसी, उपमावाचक इव-शब्द: साधारणधर्मश्च आकाशगङ्गायाम् अवगाहनं विद्यते। चतुर्णामङ्गानां पूर्णतयाऽत्र पूर्णोपमा विद्यते। किन्तु सामान्यरूपेण तु पूर्णोपमाया: अभावे उपमानाम्नाऽपि एषोऽलङ्कार: प्रसिध्यति।

**५.रूपकम्**- रूपयतीति रूपकम्। उपमेयं यत्र उपमानरूपं क्रियते तत्र रूपकालङ्कारो भवति। अत्रोपमेयस्य उपमानेन सह अभेद: प्रदर्श्यते।

**लक्षणम्-तद्रूपकमभेदो य उपमानोपमेययो:।**

अर्थाद् यत्र उपमानोपमेययो: अभेदरूपम् आरोपितं क्रियते तत्र रूपकालङ्कारो भवति।

उदाहरणम्-

**संसार-विषवृक्षस्य द्वे एव रसवत्फले।**
**काव्यामृत-रसास्वादः सङ्गमः सज्जनैः सह।।**

अत्र संसार-उपमेये उपमान-विषवृक्षस्य काव्ये अमृतस्य च आरोपो रूपकालङ्कारतां प्राप्नोति।

**विभावना-अलङ्कारः-**

**लक्षणम्- विभावना विनापि स्यात् कारणं कार्यजन्म चेत्।**

अर्थात् यत्र कारणं विनापि कार्यस्य उत्पत्ति: वर्ण्यते तत्र विभावनालङ्कारो भवति।

उदाहरणम्- **पश्य लाक्षारसासिक्तं रक्तं तच्चरणद्वयम्।।**

अत्र लाक्षारसानुलेपनं विनापि चरणयुगलस्य रक्तवर्णता वर्णिताऽतोऽत्र विभावनाऽलङ्कारो वर्तते।

**विशेषोक्तिः-**

**लक्षणम्- विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे।**

अर्थात् कारणे विद्यमानेऽपि यत्र कार्यस्य अभावः कथ्यते तत्र विशेषोक्तिनामकोऽलङ्कारो भवति।

**उदाहरणम्- नमन्तमपि धीमन्तं न लङ्घयति कश्चन।।** अत्र नमनरूपं कारणं वर्तते तथापि लङ्घनरूपकार्यस्य अभावः वर्णितः। अतः अत्र विशेषोक्तिनामकालङ्कारो वर्तते।

**अर्थान्तरन्यासः**

**लक्षणम्- भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा।**

अर्थात् अनुषक्तम्=सम्बद्धम् अर्थान्तरम्=अन्यः अर्थः तस्य अभिधा=कथनम्-मुख्यार्थसम्बद्धस्य अन्यार्थस्य कथनम् अर्थान्तरन्यासालङ्कारो भवति। सम्बद्धेन अन्यार्थेन मुख्यार्थसमर्थनम् अर्थान्तरन्यासोऽलङ्कारः इति।

**उदाहरणम्- हनुमानब्धिमतरद् दुष्करं किं महात्मनाम्।**

अत्र श्रीहनुमतः समुद्रतरणं मुख्यार्थो वर्तते 'महात्मनां किं दुष्करम्' इत्ययं च वाक्यार्थो मुख्यार्थेन सम्बद्धः अस्ति। इत्थं सम्बद्धेन अन्यार्थेन मुख्यार्थस्य समर्थनात् अत्र अर्थान्तरन्यासालङ्कारो वर्तते।

## अभ्यास-प्रश्नाः

**बहुविकल्पात्मकप्रश्नाः-**

१. 'न कान्तमपि निर्भूषं विभाति वनिताननम्।' इति कथनमस्ति-

(क) मम्मटस्य (ख) विश्वनाथस्य

(ग) अप्पयदीक्षितस्य (घ) भामहस्य ( )

२. निम्नलिखितेषु शब्दालङ्कारः अस्ति-

(क) अनुप्रासः (ख) अर्थान्तरन्यासः

(ग) विभावना (घ) रूपकम् ( )

३. उभयालङ्कारः विद्यते-

(क) अनुप्रासः (ख) श्लेषः

(ग) उपमा (घ) अनन्वयः ( )

**अतिलघूत्तरात्मकाः प्रश्नाः**

१. प्रचलितभाषायां शोभावर्धकवस्तुनः कृते कः शब्दः प्रयुज्यते?

२. आचार्यदण्डिना काव्यादर्शे अलङ्कारस्य का परिभाषा प्रदत्ता?

३. अलङ्कारपदं कथं निष्पद्यते?

४. अलङ्कारशास्त्रम् इति नामकरणं कथम्?

५. अलङ्कारशास्त्रस्य अद्यतनं नाम किं विद्यते?

६. वामनमते अलङ्कारस्य परिभाषा का विद्यते?

७. 'गोसदृशो गवयः' इत्यत्र उपमालङ्कारः किमर्थं नास्ति?

८. उत्तरवर्तिकाले कः सिद्धान्तः सर्वमान्यः अभवत्?

९. अलङ्कारशास्त्रस्य प्रथमः आचार्यः को मन्यते?

१०. भामहेन कस्य ग्रन्थस्य रचना कृता?

११. कुवलयानन्दस्य रचनाकारः कः?

१२. जयदेवस्य अलङ्कारशास्त्रीयः ग्रन्थः कः?

१३. रसगङ्गाधरस्य रचयिता कः?

१४. अलङ्कारः मुख्यतया कतिविधः? नामोल्लेखं कुरुत।

**लघूत्तरात्मकाः प्रश्नाः**

१. शब्दालङ्कारः कुत्र भवति?

२. अर्थालङ्कारः कुत्र भवति?

३. शब्दालङ्काराः के-के सन्ति?

४. अनुप्रासालङ्कारस्य लक्षणं विलिख्य तस्य उदाहरणम् अपि प्रदर्शयत।

५. यमकालङ्कारस्य लक्षणं लिखत।

६. यमकोदाहरणं प्रदर्शयत।

**निबन्धात्मकप्रश्नाः**

१. श्लेषालङ्कारं सोदाहरणं विवेचयत।

२. 'हंसीव कृष्ण! ते कीर्तिः स्वर्गङ्गामवगाहते।' इत्यत्र कः अलङ्कारः? तल्लक्षणमपि प्रदर्शयत।

३. 'संसार-विषवृक्षस्य द्वे एव रसवत्फले।
काव्यामृत-रसास्वादः सङ्गमः सज्जनैः सह।।' इत्यत्र कोऽलङ्कारः? सलक्षणं विवेचयत।

४. विभावना-अलङ्कारस्य लक्षणोदाहरणे लेखनीये।

५. विशेषोक्तिरलङ्कारस्य लक्षणोदाहरणे लेख्ये।

६. हनुमानब्धिमतरद् दुष्करं किं महात्मनाम्। इत्यत्र कोऽलङ्कारः? लक्षणसहितं विवेचयत।

७. निम्नलिखित-पद्यांशेषु अलङ्कारान् परिचिनुत। तेषां लक्षणान्यपि लिखत।

(१) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

(२) अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयम्

(३) नमन्तमपि धीमन्तं न लङ्घयति कश्चन।

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

१. घ     २. क     ३. ख

# अष्टमः पाठः

# अमरकोशः

**'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवती'**ति पातञ्जल-महाभाष्यानुसारं शब्दमहत्त्वं सुस्पष्टमेव। श्रुतिस्मृत्यादिशास्त्रज्ञानं शब्दार्थलिङ्गादिबोधककोषज्ञानाधीनम्। साकल्येन तज्ज्ञानं च प्रकृतिप्रत्ययतदर्थबोधकस्वरादिसम्प्रापकव्याकरणज्ञानाधीनम्। इत्थं शब्दशास्त्रस्य (व्याकरणशास्त्रस्य) शब्दकोषस्य च महत्त्वं स्पष्टमेव।

पुरा हि तपोयोगबलेन शब्दब्रह्मकृतसाक्षात्कारा महर्षयो हस्तामलकवत्साक्षान्मन्त्रार्थद्रष्टारो भवन्ति स्म। एकस्यापि शब्दस्य तत्त्वार्थज्ञाने लेशमात्रमपि शङ्कावसरस्तेषां न अभूत्। अत एव वैयाकरणानामयं सिद्धान्तः प्रसिध्यति यत् – **'सर्वे सर्वार्थवाचकाः'।** ततः कालक्रमेण तपोयोगादिह्रासमवलोक्य भगवान् कश्यपो वेदानां दुर्बोधशब्दसमुदायं संगृह्य 'निघण्टु' नामकं वैदिककोषं रचितवान्। ततश्च बुद्धिमान्द्येन निघण्टुज्ञानेऽप्यक्षमं विद्वल्लोकमालोक्य यास्को नाम महामुनिः निघण्टुव्याख्याभूतं निरुक्तनामकं ग्रन्थं प्रणीतवान्।

एवमेवाग्रेऽपि दूषितान्नपानसंसर्गाचरणादिदोषैः ततोऽप्यधिकतमे तपश्चरणादिक्षयेन बुद्धिह्रासे जाते निरुक्तज्ञानेऽप्यशक्ते विद्वद्वर्गे लौकिकान् कोषान् अरचयन् आचार्याः यतः –

१. भोगीन्द्रः २. कात्यायनः ३. साहसाङ्कः ४. वाचस्पतिः ५. व्याडिः ६. विश्वरूपः ७. मङ्गलः ८. शुभाङ्गः ९. वोपालितः १०. भागुरिः, इत्येतैः रचिताः प्राचीनकोषाः।

१. उत्पलिनी २. शब्दार्णवः ३. संसारावर्तः ४. नाममालाख्यः ५. वररुचिः ६. शाश्वतः ७. रन्तिदेवः ८. रत्नापरनामहरः ९. गोवर्धनः १०. रभसयालः ११. रुद्रः १५. अमरदत्तः १३. गङ्गाधरः १४. वाग्भटः १५. माधवः १६. धर्मः १७. तारपालः १८. वामनः १९. चन्द्रः २०. विक्रमादित्यः गोमिरचितकोषः २२. पाणिनिशब्दानुशासनं च। अन्ये च 'बलह' प्रभृतिकोषाः सन्ति।

अस्मिन्नेव क्रमे महाविदुषा अमरसिंहेन नामलिङ्गानुशासनकोषस्य रचना कृता। अमरकोशनाम्ना लोके प्रथितस्यास्य कोशस्य रचयिता अयममरसिंहः कदा कुत्र च जातः इति विषये सम्यक् निर्णयो न जातः। प्रथमकाण्डे स्वर्गवर्गे देवपर्यायकथनानन्तरं बुद्धस्य पर्यायकथनेनायं बौद्ध आसीदिति बहूनामितिहासज्ञानां मतम्। अपरे केचिदमरसिंहं जैनधर्मावलम्बिनं मन्यमानाः प्रमाणानि प्रस्तुवन्ति। केचित्तु –

**इन्द्रश्चन्द्रः काशकृत्स्नापिशलीः शाकटायनः।**
**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ हि शाब्दिकाः।।**

इति पद्याधारेण पाणिनेः पश्चाज्जातम् अमरसिंहं मन्यन्ते विद्वांसः। अपरे तु –

**धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।**
**ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य।।**

इत्युक्त्या अमरसिंहं विक्रमादित्यसमकालीनं तद्राजसभास्थनवरत्नान्तर्गतं मन्यते। अत्रापि सन्देहं कुर्वाणा इतिहासकाराः अमरकोशरचयितारममरसिंहं खीष्टाब्दीय-षष्ठ-शताब्द्यां जातमङ्गीकुर्वन्ति।

अमरकोशस्यास्य चत्वारि नामानि प्रसिद्धानि सन्ति –

१. नामलिङ्गानुशासनम्।

२. त्रिकाण्डकोशः।

३. देवकोशः।

४. अमरकोशः इति च।

अन्येषु बहुषु कोशेषु विद्यमानेषु अपि अमरकोशस्य मान्यता लोकप्रियता च सर्वत्र अस्ति। अत्र कारणमेतत् यत् केचित् कोशग्रन्थाः केवलं पर्यायशब्दान् अपरे केवलं नानार्थशब्दानेवोक्तवन्तः, किन्तु अमरसिंहस्तु नास्ति। अमरकोशस्य सुप्रथिता व्याख्या 'व्याख्यासुधा' स्वकर्त्तुः सिद्धान्तकौमुदीकारस्य महावैयाकरणस्य श्रीमतो भट्टोजिदीक्षितस्य पुत्रस्य श्रीमतो भानुजिदीक्षितस्य 'रामाश्रम' इति नामकारणात् 'रामाश्रमी' ति नाम्ना सुप्रसिद्धा अस्ति।

अमरकोशे त्रिषु काण्डेषु विभिन्नवर्गानुसारं शब्दाः सङ्गृहीताः सन्ति। अमरकोशस्थविषयानुक्रमणिका यथा–

(क) प्रथमकाण्डम् –

१. स्वर्गवर्गः
२. व्योमवर्गः
३. दिग्वर्गः
४. कालवर्गः
५. धीवर्गः
६. शब्दादिवर्गः
७. नाट्यवर्गः
८. पातालभोगिवर्गः
९. नरकवर्गः
१०. वारिवर्गः

(ख) द्वितीयकाण्डम् –

१. भूमिवर्गः
२. पुरवर्गः
३. शैलवर्गः
४. वनौषधिवर्गः
५. सिंहादिवर्गः
६. मनुष्यवर्गः
७. ब्रह्मवर्गः
८. क्षत्रियवर्गः
९. वैश्यवर्गः
१०. शूद्रवर्गः

(ग) तृतीयकाण्डम्

१. विशेष्यनिघ्नवर्गः
२. सङ्कीर्णवर्गः
३. नानार्थवर्गः
४. अव्ययवर्गः

५. लिङ्गादिसङ्ग्रहवर्ग:

पाठेऽस्मिन् पाठ्यक्रमानुसारं अमरकोशस्य प्रथमकाण्डे स्वर्गवर्गत: देवनामभ्य: प्रारभ्य इन्द्रस्य नामानि यावत् श्लोका: प्रदत्ता: सन्ति। एतेषां स्मरणं संस्कृतभाषासमृद्धिदृष्ट्या छात्राणां कृते महदुपकारकमस्ति।

**प्रथमकाण्डे स्वर्गवर्ग:**

**देवनामानि–**

**अमरा निर्जरा देवास्त्रिदशा विबुधा: सुरा:।**
**सुपर्वाण: सुमनसस्त्रिदिवेशा दिवौकस:।।७।।**
**आदितेया दिविषदो लेखा अदितिनन्दना:।**
**आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धस:।।८।।**
**बर्हिमुखा: क्रतुभुजो गीर्वाणो दानवारय:।**
**वृन्दारका दैवतानि पुंसि वा देवता: स्त्रियाम्।।९।।**

अर्थात् देवानां षड्विंशति:(२६) नामानि सन्ति। तेषु चतुर्विंशति: (२४) पुंलिङ्गनामानि–

| | | |
|---|---|---|
| १. अमर: | २.निर्जर: | ३.देव: |
| ४.त्रिदश: | ५.विबुध: | ६.सुर: |
| ७.सुपर्वा(सुपर्वन्) | ८.सुमना:(सुमनस्) | ९.त्रिदिवेश: |
| १०.दिवौका: (दिवौकस्) | ११.आदितेय: | १२.दिविषत् (दिविषद्) |
| १३.लेख: | १४. अदितिनन्दन: | १५.आदित्य: |
| १६.ऋभु: | १७.अस्वप्न: | १८.अमर्त्य: |
| १९.अमृतान्धा: (अमृतान्धस्) | २०.बर्हिमुख: | २१.क्रतुभुक् (क्रतुभुज्) |
| २२.गीर्वाण: | २३.दानवारि: | २४.वृन्दारक: |

एकं पुंलिङ्ग–नपुंसकलिङ्ग नाम – २५. दैवतम्

एकं च स्त्रीलिङ्ग–नाम– २६. देवता अस्ति।

गणदेवता–नामानि–

**आदित्य–विश्व–वसवस्तुषिताभास्वरानिला:।**
**महाराजिक–साध्याश्च रुद्राश्च गणदेवता:।।१०।।**

अर्थात् गणदेवता=एकैकस्य गणस्य समूहस्य वा नव (९) नामानि सन्ति–

| | |
|---|---|
| १. आदित्या: (१२) | २. विश्वे (१०) |
| ३. वसव: (८) | ४. तुषिता: (२६ अथवा ३६) |
| ५. आभास्वरा: (६४) | ६. अनिला: (४९) |
| ७. महाराजिका: (२२०) | ८. साध्या: (१२) |
| ९. रुद्रा: (१०) | |

एतानि सर्वाणि नामानि पुंलिङ्गे भवन्ति।

**देवयोनि–नामानि–**

**विद्याधरोऽप्सरो–यक्ष:रक्षो–गन्धर्व–किन्नरा:।**
**पिशाचो गुह्यक: सिद्धो भूतोऽमी देवयोनय:।।११।।**

अर्थात् देवयोनीनां दश नामानि सन्ति–

१. विद्याधरा: (पुं.) (जीमूतवाहन+,...)
२. अप्सरस: (स्त्री.) – देवस्त्रिय:।
३. यक्षा: (पुं.) – कुबेर:, ...)
४. रक्षांसि (पुं.) (रक्षस्) – पूर्वतन–लङ्कावासिनो मायाविन:।।
५. गन्धर्वा: (पुं.) (देवगायका:)
६. किन्नरा: (पुं.) (अश्वमुखा: मानवशरीरिण:, मानवमुखा अश्वशरीरिणश्च)
७. पिशाचा: (पुं.) (मांसभोजिनो भूतविशेषा:)
८. गुह्यका: (पुं.) (मणिभद्रा:,...)
९. सिद्धा: (पुं.) (विश्वावसु:,...)
१०. भूता: (पुं.) (शिवगणविशेषा: – प्रमथ:,...)

**असुर–नामानि–**

**असुरा दैत्य–दैतेय–दनुजेन्द्रारि–दानवा:।**
**शुक्रशिष्या दितिसुता: पूर्व–देवा: सुरद्विष:।।१२।।**

अर्थात् असुराणां दश (१०) नामानि सन्ति–

| | |
|---|---|
| १. असुर: | २. दैत्य: |
| ३. दैतेय: | ४. दनुज: |
| ५. इन्द्रारि: | ६. दानव: |
| ७. शुक्रशिष्य: | ८. दितिसुत: |
| ९. पूर्वदेव: | १०.सुरद्विट्(सुरद्विष्) |

एतानि सर्वाणि नामानि पुंलिङ्गे भवन्ति।

**बुद्ध–नामानि–**

**सर्वज्ञ: सुगतो बुद्धो धर्मराजस्तथागत:।**
**समन्तभद्रो भगवान्मारजिल्लोकजिज्जिन:।।१३।।**
**षडभिज्ञो दशबलोऽद्वयवादी विनायक:।**
**मुनीन्द्र: श्रीघन: शास्ता मुनि:...........**

अर्थात् महात्मनो बुद्धस्य अष्टादश नामानि सन्ति–

| | |
|---|---|
| १. सर्वज्ञ: | २. सुगत: |
| ३. बुद्ध: | ४. धर्मराज: |
| ५. तथागत: | ६. समन्तभद्र: |
| ७. भगवान्(भगवत्) | ८. मारजित् |
| ९. लोकजित् | १०.जिन: |
| ११. षडभिज्ञ: | १२. दशबल: |
| १३. अद्वयवादी(अद्वयवादिन्) | १४. विनायक: |
| १५. मुनीन्द्र: | १६. श्रीघन: |
| १७. शास्ता(शास्तृ) | १८. मुनि: |

एतानि सर्वाणि नामानि पुंलिङ्गे भवन्ति।

**सप्तमबुद्धस्य नामानि–**

**..........शाक्यमुनिस्तु यः ।।१४।।**
**स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः।**
**गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः।।१५।।**

अर्थात् बुद्धस्यावान्तरभेदस्य सप्तमबुद्धस्य सप्त नामानि सन्ति–

| | |
|---|---|
| १. शाक्यमुनिः | २. शाक्यसिंहः |
| ३. सर्वार्थसिद्धः | ४. शौद्धोदनिः |
| ५. गौतमः | ६. अर्कबन्धुः |
| ७. मायादेवीसुतः | |

एतानि सर्वाणि नामानि पुंलिङ्गे भवन्ति।

**ब्रह्मणो नामानि–**

**ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः**
**हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः।।१६।।**
**धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः।**
**स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः।।१७।।**
**नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः [ १ ]**
**सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः [ २ ]**

अर्थात् ब्रह्मणो विंशतिः(२०) नामानि सन्ति–

| | |
|---|---|
| १. ब्रह्मा (ब्रह्मन्) | २. आत्मभूः |
| ३. सुरज्येष्ठः | ४. परमेष्ठी (परमेष्ठिन्) |
| ५. पितामहः | ६. हिरण्यगर्भः |
| ७. लोकेशः | ८. स्वयम्भूः |
| ९. चतुराननः | १०.धाता(धातृ) |
| ११. अब्जयोनिः | १२. द्रुहिणः |
| १३. विरिञ्चिः | १४. कमलासनः |
| १५. स्रष्टा(स्रष्टृ) | १६. प्रजापतिः |
| १७. वेधाः(वेधस्) | १८. विधाता(विधातृ) |
| १९. विश्वसृट् (विश्वसृज्) | २०. विधिः (सर्वाणि पुंलिङ्गे) |

अपि च– ब्रह्मणो नव(९) नामानि इतोऽपि सन्ति–

| | |
|---|---|
| १. नाभिजन्मा(नाभिजन्मन्) | २. अण्डजः |
| ३. पूर्वः | ४. निधनः |
| ५. कमलोद्भवः | ६. सदानन्दः |
| ७. रजोमूर्तिः | ८. सत्यकः |
| ९. हंसवाहनः (सर्वाणि पुंलिङ्गे) | |

**कृष्ण–नामानि–**

**विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः।**

**दामोदरो हृषीकेशः केशवो माधवः स्वभूः ।।१८।।**
**दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।**
**पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ।।१९।।**
**उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।**
**पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ।।२०।।**
**देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।**
**वनमाली बलिध्वंसी कंसारातिरधोक्षजः ।।२१।।**
**विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छ नः ।**
**पुराणपुरुषो यज्ञपुरुषो नरकान्तकः [ ३ ]**
**जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः [ ४ ]**

अर्थात् कृष्णस्य नवत्रिंशत्( ३९ ) नामानि सन्ति–

| | |
|---|---|
| १. विष्णुः | २. नारायणः |
| ३. कृष्णः | ४. वैकुण्ठः |
| ५. विष्टरश्रवाः( विष्टरश्रवस् ) | ६. दामोदरः |
| ७. हृषीकेशः | ८. केशवः |
| ९. माधवः | १०. स्वभूः |
| ११. दैत्यारिः | १२. पुण्डरीकाक्षः |
| १३. गोविन्दः | १४. गरुडध्वजः |
| १५. पीताम्बरः | १६. अच्युतः |
| १७. शार्ङ्गी ( शार्ङ्गिन् ) | १८. विष्वक्सेनः |
| १९. जनार्दनः | २०. उपेन्द्रः |
| २१. इन्द्रावरजः | २२. चक्रपाणिः |
| २३. चतुर्भुजः | २४. पद्मनाभः |
| २५. मधुरिपुः | २६. वासुदेवः |
| २७. त्रिविक्रमः | २८. देवकीनन्दनः |
| २९. शौरिः | ३०. श्रीपतिः |
| ३१. पुरुषोत्तमः | ३२. वनमाली( वनमालिन् ) |
| ३३. बलिध्वंसी( बलिध्वंसिन् | ३४. कंसारातिः |
| ३५. अधोक्षजः | ३६. विश्वम्भरः |
| ३७. कैटभजित् | ३८. विधुः |
| ३९. श्रीवत्सलाञ्छ नः ( सर्वाणि पुंलिङ्गे ) | |

अपि च– कृष्णस्य सप्त नामानि इतोऽपि सन्ति–

| | |
|---|---|
| १. पुराणपुरुषः | २. यज्ञपुरुषः |
| ३. नरकान्तकः | ४. जलशायी( जलशायिन् ) |
| ५. विश्वरूपः | ६. मुकुन्दः |
| ७. मुरमर्दनः ( सर्वाणि पुंलिङ्गे ) | |

कृष्णस्य पितुर्नामनी– **वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ।।२१ ।।**

अर्थात् कृष्णस्य पितुर्द्वे नामनी स्तः– १. वसुदेवः २. आनकदुन्दुभिः (उभे पुंलिङ्गे)

**बलदेव-नामानि–**

**बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।**
**रेवतीरमणो रामः कामपालो हलायुधः ।।२३ ।।**
**नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।**
**सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः ।।२४ ।।**

अर्थात् बलदेवस्य सप्तदश (१७) नामानि सन्ति–

| | |
|---|---|
| १. बलभद्रः | २. प्रलम्बघ्नः |
| ३. बलदेवः | ४. अच्युताग्रजः |
| ५. रेवतीरमणः | ६. रामः |
| ७. कामपालः | ८. हलायुधः |
| ९. नीलाम्बरः | १०. रौहिणेयः |
| ११. तालाङ्कः | १२. मुसली (मुसलिन्) |
| १३. हली (हलिन्) | १४. सङ्कर्षणः |
| १५. सीरपाणिः | १६. कालिन्दीभेदनः |
| १७. बलः (सर्वाणि पुंलिङ्गे) | |

**कामदेव-नामानि–**

**मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।**
**कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ।।२५ ।।**
**सम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ।**
**पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ।।२६ ।।**
**ब्रह्मसूर्विश्वकेतुः स्यात्.........**

अर्थात् कामदेवस्य (श्रीकृष्णपुत्रस्य प्रद्युम्नस्य) एकविंशतिः (२१) नामानि सन्ति–

| | |
|---|---|
| १. मदनः | २. मन्मथः |
| ३. मारः | ४. प्रद्युम्नः |
| ५. मीनकेतनः | ६. कन्दर्पः |
| ७. दर्पकः | ८. अनङ्गः |
| ९. कामः | १०. पञ्चशरः |
| ११. स्मरः | १२. सम्बरारिः |
| १३. मनसिजः | १४. कुसुमेषुः |
| १५. अनन्यजः | १६. पुष्पधन्वा (पुष्पधन्वन्) |
| १७. रतिपतिः | १८. मकरध्वजः |
| १९. आत्मभूः | २०. ब्रह्मसूः |
| २१. विश्वकेतुः (सर्वाणि पुंलिङ्गे) | |

**अनिरुद्ध-नामनी–**

**अनिरुद्ध उषापतिः ।**

अर्थात् प्रद्युम्नपुत्रस्यानिरुद्धस्य द्वे नामनी स्तः–

१. अनिरुद्धः २. उषापतिः (उभे पुंलिङ्गे)

**लक्ष्मी-नामानि–**

**लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।।२७।।**
**इन्दिरा लोकमाता मा क्षीरोदतनया रमा [ ९ ]**
**भार्गवी लोकजननी क्षीरसागरकन्यका:[ १० ]**

अर्थात् लक्ष्म्याः षट्(६) नामानि सन्ति–

१. लक्ष्मीः २. पद्मालया
३. पद्मा ४. कमला
५. श्रीः ६. हरिप्रिया

लक्ष्म्याः अष्ट(८) नामानि इतोऽपि सन्ति–

१. इन्दिरा २. लोकमाता
३. मा ४. क्षीरोदतनया
५. रमा ६. भार्गवी
७. लोकजननी ८. क्षीरसागरकन्यका (सर्वाणि स्त्रीलिङ्गे)

**विष्णोः शङ्खादीनां नामानि–**

**शङ्खो लक्ष्मीपतेः पाञ्चजन्यः चक्रं सुदर्शनः ।**
**कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ।।२८।।**
**चापं शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छ नं स्मृतम् [ ११ ]**
**अश्वाश्च शैव्यसुग्रीवमेघपुष्पबलाहकः [ १२ ]**
**सारथिर्दारुको मन्त्री ह्युद्धवश्चानुजो गदः [ १३ ]**

अर्थात् लक्ष्मीपतेर्विष्णोः शङ्खस्य नाम पाञ्चजन्यः (पुं.) चक्रस्य सुदर्शनः (पुं.) गदायाः कौमोदकी (स्त्री.) खड्गस्य नन्दकः(पुं.) मणेः कौस्तुभः(पुं.) चापस्य(धनुषः) शार्ङ्गम्(नपुं.) विष्णुचिह्नस्य नाम च श्रीवत्सः (पुं.) वर्तते। शैव्यः, सुग्रीवः, मेघपुष्पः बलाहकश्च, एतानि चत्वारि पुंलिङ्गनामानि विष्णोरश्वानां सन्ति इत्थमेव विष्णोः। सारथिः दारुकः(पुं.) विष्णोर्मन्त्री उद्धवः(पुं.) विष्णोरनुजश्च गदः (पुं.) वर्तते।

**गरुडनामानि–**

**गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।**
**नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ।।२९।।**

अर्थात् विष्णोर्वाहनस्य गरुडस्य नव (९) नामानि सन्ति–

१. गरुत्मान् (गरुत्मत्) २. गरुडः
३. तार्क्ष्यः ४. वैनतेयः
५. खगेश्वरः ६. नागान्तकः
७. विष्णुरथः ८. सुपर्णः
९. पन्नगाशनः (सर्वाणि पुंलिङ्गे)

**शिव-नामानि–**

**शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः।**
**ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः।।३०।।**
**भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः।**
**मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः।।३१।।**
**उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्।**
**वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः।।३२।।**
**कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः।**
**हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः।।३३।।**
**गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः।**
**व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः।।३४।।**
**अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः[ १४ ]**

अर्थात् शिवस्य अष्टचत्वारिंशत्(४८) नामानि सन्ति–

| | | |
|---|---|---|
| १. शम्भुः | २. ईशः | ३. पशुपतिः |
| ४. शिवः | ५. शूली(शूलिन्) | ६. महेश्वरः |
| ७. ईश्वरः | ८. शर्वः | ९. ईशानः |
| १०. शङ्करः | ११. चन्द्रशेखरः | १२. भूतेशः |
| १३. खण्डपरशुः | १४. गिरीशः | १५. गिरिशः |
| १६. मृडः | १७. मृत्युञ्जयः | १८. कृत्तिवासाः(कृत्तिवासम्) |
| १९. पिनाकी(पिनाकिन्) | २०. प्रमथाधिपः | २१. उग्रः |
| २२. कपर्दी(कपर्दिन्) | २३. श्रीकण्ठः | २४. शितिकण्ठः |
| २५. कपालभृत् | २६. वामदेवः | २७. महादेवः |
| २८. विरूपाक्षः | २९. त्रिलोचनः | ३०. कृशानुरेताः(कृशानुरेतस्) |
| ३१. सर्वज्ञः | ३२. धूर्जटिः | ३३. नीललोहितः |
| ३४. हरः | ३५. स्मरहरः | ३६. भर्गः |
| ३७. त्र्यम्बकः | ३८. त्रिपुरान्तकः | ३९. गङ्गाधरः |
| ४०. अन्धकरिपुः | ४१. क्रतुध्वंसी | ४२. वृषध्वजः |
| ४३. व्योमकेशः | ४४. भवः | ४५. भीमः |
| ४६. स्थाणुः | ४७. रुद्रः | ४८. उमापतिः (सर्वाणि पुंलिङ्गे) |

इतोऽपि शिवस्य चत्वारि नामानि सन्ति–

१. अहिर्बुध्न्यः २. अष्टमूर्तिः ३. गजारिः ४. महानटः (सर्वाणि पुंलिङ्गे)

**कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः।**
**प्रमथाः स्युः पारिषदाः...............**

अर्थात् शिवस्य जटाजूटस्य नाम कपर्दः, धनुषो द्वे नामनी – १. पिनाकः (पुं.) अजगवम्(नपुं.) च वर्तते। प्रमथाः शिवस्य सभासदः सन्ति।

**ब्राह्मीत्याद्यास्तु मातरः।।३५।।**
**ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा[ १५ ]**

**वाराही च तथेन्द्राणी चामुण्डा लोकमातरः [ १६ ]**

अर्थात् ब्राह्मीत्याद्याः सप्त लोकमातरः सन्ति–

१. ब्राह्मी २. माहेश्वरी

३. कौमारी ४. वैष्णवी

५. वाराही ६. इन्द्राणी

७. चामुण्डा ( सर्वाः स्त्रीलिङ्गे )

**सिद्धिनामानि तद्भेदाश्च–**

**विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा।**
**अणिमा महिमा चैव गरिमा लघिमा तथा [ १७ ]**
**प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः [ १८ ]**

अर्थात् सिद्धेः त्रीणि नामानि सन्ति–

१. विभूतिः ( स्त्री. ) २. भूतिः ( स्त्री. )

३. ऐश्वर्यम् ( नपुं. ) च तद्भेदास्तु अष्ट ( ८ ) सन्ति–

१. अणिमा ( पुं. ) २. महिमा ( पुं. ) ३. गरिमा ( पुं. )

४. लघिमा ( पुं. ) ५. प्राप्तिः ( स्त्री. ) ६. प्राकाम्यम् ( नपुं. )

७. ईशित्वम् ( नपुं. ) ८. वशित्वम् ( नपुं. ) च।

**पार्वती–नामानि–**

**उमा कात्यायनी गौरी कालीहैमवतीश्वरी।।३६।।**
**शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला।**
**अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका।।३७।।**
**आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा [ १९ ]**
**कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका [ २० ]**

अर्थात् पार्वत्याः सप्तदश ( १७ ) नामानि सन्ति–

१. उमा २. कात्यायनी

३. गौरी ४. काली

५. हैमवती ६. ईश्वरी

७. शिवा ८. भवानी

९. रुद्राणी १०. शर्वाणी

११. सर्वमङ्गला १२. अपर्णा

१३. पार्वती १४. दुर्गा

१५. मृडानी १६. चण्डिका

१७. अम्बिका ( सर्वाणि स्त्रीलिङ्गे )

पार्वत्याः चत्वारि नामानि इतोऽपि सन्ति–

१. आर्या २. दाक्षायणी

३. गिरिजा ४. मेनकात्मजा( सर्वाणि स्त्रीलिङ्गे)

चामुण्डाया: द्वे नामनी स्त:–

१. कर्ममोटी (स्त्री.) २. चामुण्डा (स्त्री.) च।

चण्डिकाया द्वे नामनी स्त:–

१. चर्ममुण्डा (स्त्री.) २. चर्चिका (स्त्री.) च।

**गणेश-नामानि–**

**विनायको विघ्नराजद्वैमातुरगणाधिप:।**
**अप्येकदन्तहेरम्बलम्बोदरगजानना:।।३८।।**

अर्थात् शिवपुत्रस्य गणेशस्य अष्ट (८) नामानि सन्ति–

१. विनायक: २. विघ्नराज:

३. द्वैमातुर: ४. गणाधिप:

५. एकदन्त: ६. हेरम्ब:

७. लम्बोदर: ८. गजानन: (सर्वाणि पुंलिङ्गे)

**कार्तिकेय-नामानि–**

**कार्तिकेयो महासेन: शरजन्मा षडानन:।**
**पार्वतीनन्दन: स्कन्द: सेनानीरग्निभूर्गुह:।।३९।।**
**बाहुलेयस्तारकजिद्विशाख: शिखिवाहन:।**
**षाण्मातुर: शक्तिधर: कुमार: क्रौञ्चदारण:।।४०।।**

अर्थात् शिवपुत्रस्य कार्तिकेयस्य सप्तदश (१७) नामानि सन्ति–

१. कार्तिकेय: २. महासेन:

३. शरजन्मा (शरजन्मन्) ४. षडानन:

५. पार्वतीनन्दन: ६. स्कन्द:

७. सेनानी: ८. अग्निभू:

९. गुह: १०.बाहुलेय:

११.तारकजित् १२.विशाख:

१३.शिखिवाहन: १४.षाण्मातुर:

१५.शक्तिधर: १६.कुमार:

१७.क्रौञ्चदारण: (सर्वाणि पुंलिङ्गे)

**शिववाहनस्य 'नन्दी' इत्यस्य नामानि–**

**शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वर: [ २१ ]**

अर्थात् शिववाहनभूतस्य नन्दीति-नाम्नो वृषभस्य षट् नामानि सन्ति–

१. शृङ्गी( शृङ्गिन्) २. भृङ्गी (भृङ्गिन्)

३. रिटि: ४. तुण्डी( तुण्डिन्)

५. नन्दिक: ६. नन्दिकेश्वर: (सर्वाणि पुंलिङ्गे)

**इन्द्र-नामानि-**

> **इन्द्रो मरुत्वान् मघवा विडौजाः पाकशासनः।**
> **वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः।।४१।।**
> **जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः।**
> **सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा।।४२।।**
> **वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः।**
> **जम्भभेदी हरिहयः स्वाराण्मुचिसूदनः।।४३।।**
> **सङ्क्रन्दनो दुश्च्यवनस्तुषाराण्मेघवाहनः।**
> **आखण्डलः सहस्राक्ष ऋभुक्षाः..................**

अर्थात् इन्द्रस्य पञ्चत्रिंशत् (३५) नामानि सन्ति-

| | |
|---|---|
| १. इन्द्रः | २. मरुत्वान् (मरुत्वत्) |
| ३. मघवा (मघवन्) | ४. विडौजाः(विडौजस्) |
| ५. पाकशासनः | ६. वृद्धश्रवाः (वृद्धश्रवस्) |
| ७. सुनासीरः | ८. पुरुहूतः |
| ९. पुरन्दरः | १०.जिष्णुः |
| ११.लेखर्षभः | १२.शक्रः |
| १३.शतमन्युः | १४.दिवस्पतिः |
| १५.सुत्रामा(सुत्रामन्) | १६.गोत्रभिद् |
| १७.वज्री(वज्रिन्) | १८.वासवः |
| १९.वृत्रहा(वृत्रहन्) | २०.वृषा |
| २१.वास्तोष्पतिः | २२.सुरपतिः |
| २३.बलारातिः | २४.शचीपतिः |
| २५.जम्भभेदी(जम्भभेदिन्) | २६.हरिहयः |
| २७.स्वाराट् | २८.मुचिसूदनः |
| २९.सङ्क्रन्दनः | ३०.दुश्च्यवनः |
| ३१.तुषाराट् (तुरासाह्) | ३२.मेघवाहनः |
| ३३.आखण्डलः | ३४.सहस्राक्षः |
| ३५.ऋभुक्षाः(ऋभुक्षन्) (सर्वाणि पुंलिङ्गे) | |

## अभ्यास-प्रश्नाः

### बहुविकल्पात्मकाः प्रश्नाः

१. अमरकोशस्य रचयिता अस्ति -

(क) पाणिनिः (ख) अमरदत्तः

(ग) अमरसिंहः (घ) भानुजिदीक्षितः

२. अमरकोशस्य अपरं नाम अस्ति -

(क) नामलिङ्गानुशासनम् (ख) शब्दसागर:

(ग) अमरसिंहसंग्रह: (घ) रामाश्रमी

३. अमरकोशे काण्डानि सन्ति –

(क) पञ्च (ख) सप्त

(ग) चत्वारि (घ) त्रीणि

४. अमरकोशस्य प्रसिद्धा टीका अस्ति –

(क) रामाश्रमी (व्याख्यासुधा) (ख) अमरवाणी

(ग) कोशार्थप्रकाशिका (घ) अमरटीका

५. 'आखण्डल:' इति नाम अस्ति –

(क) ब्रह्मण: (ख) विष्णो:

(ग) शिवस्य (घ) इन्द्रस्य

६. हेरम्ब: अस्ति –

(क) हरि: (ख) अम्बकासुर:

(ग) गणेश: (घ) कार्तिकेय:

७. 'उपेन्द्र:' अस्ति–

(क) विष्णु: (ख) इन्द्र:

(ग) नृप: (घ) मन्त्री

८. 'पशुपति:' अस्ति –

(क) पशुस्वामी (ख) शिव:

(ग) सिंह: (घ) धनिक:

**अतिलघूत्तरात्मका: प्रश्ना:**

१. 'आत्मभू:' क: अस्ति?

२. 'हिरण्यगर्भ:' कस्य नाम अस्ति?

३. 'विरिञ्चि:' क: उच्यते?

४. श्रीवत्सलाञ्छ न: क:?

५. 'पुराणपुरुष:' कस्य नाम अस्ति?

६. पीताम्बर: क:?

७. कृष्णस्य पितु: नाम किम्?

८. रेवतीरमण: क:?

९. 'मुसली' इति कस्य नाम?

१०. 'हली' क: कथ्यते?

११. 'मीनकेतन:' इति कस्य नाम अस्ति?

१२. 'पद्मालया' का उच्यते?

१३. लक्ष्मीपते: विष्णो: शङ्खस्य नाम किम्?

१४. विष्णो: चक्रस्य नाम किमस्ति?

१५. विष्णो: खड्गस्य नाम किम्?

१६. ''कौस्तुभ:'' इति कस्य नाम अस्ति?
१७. विष्णो: धनुषो नाम किम्?
१८. गद: क: अस्ति?
१९. विष्णो: मन्त्री क:?
२०. विष्णो: अश्वस्य नाम किम्?
२१. अष्टमूर्ति: क:?
२२. 'स्थाणु:' कस्य नाम अस्ति?
२३. शिवस्य जटाजूटस्य नाम किम्?
२४. शिवस्य धनुष: द्वे नामनी के?
२५. सिद्धय: कति सन्ति?
२६. 'अपर्णा' इति कस्या: नाम अस्ति?
२७. 'चर्चिका' का अस्ति?
२८. 'द्वैमातुर:' क:?
२९. 'स्कन्द:' क:?
३०. 'नन्दिकेश्वर:' क: अस्ति?
३१. 'सहस्राक्ष:' इति कस्य नाम अस्ति?

**लघूत्तरात्मका: प्रश्ना:**

१. अमरकोशे कति काण्डानि सन्ति? नामानि लिखन्तु।
२. ब्रह्मण: कानिचन पञ्च नामानि लेखनीयानि।
३. विष्णो: कानिचन पञ्च नामानि लेख्यानि।
४. बलदेवस्य पञ्च नामानि लेखनीयानि।
५. शिवस्य कानिचन पञ्च नामानि लेखनीयानि।
६. अष्टानां सिद्धीनां नामानि लेखनीयानि।
७. चामुण्डाया: नामद्वयं लेखनीयम्।
८. गणेशस्य अष्ट नामानि लेखनीयानि।
९. कार्तिकेयस्य कानिचन सप्त नामानि लेखनीयानि।
१०. शिववाहनस्य नन्दिन: सर्वाणि नामानि लेख्यानि।
११. इन्द्रस्य कानिचन पञ्च नामानि लेखनीयानि।

**निबन्धात्मका: प्रश्ना:**

१. ब्रह्मण: सर्वाणि नामानि लेखनीयानि।
२. भगवत: कृष्णस्य सर्वाणि नामानि लिखन्तु।
३. शिवस्य सर्वाणि नामानि लेखनीयानि।
४. कामदेवस्य नामानि लेखनीयानि।
५. लक्ष्म्या: नामानि लिखन्तु।
६. विष्णो: आयुधानाम् आभूषणानां च नामानि लिखन्तु।

७. पार्वत्या: नामानि लेखनीयानि।

८. गणेशस्य नामानि लेख्यानि।

९. कार्तिकेयस्य सर्वाणि नामानि लिखन्तु।

१०. इन्द्र-नामानि लेखनीयानि।

११. देवानां सर्वाणि नामानि लेखनीयानि।

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

| | | | | |
|---|---|---|---|---|
| १. ग | २. क | ३. घ | ४. क | ५. घ |
| ६. ग | ७. क | ८. ख | | |

# गद्य-भागः

अस्मिन् पुस्तके नवमपाठात् प्रारभ्य त्रयोदशपाठं यावत् पञ्च पाठाः पञ्चतन्त्रादेव समुद्धृताः सन्ति। 'पञ्चतन्त्रम्' एकः कथासङ्ग्रहोऽस्ति। पशुकथानामेष कथासङ्ग्रहोऽतीवलोकप्रियो वर्तते। एतत्कथासाहित्यं रोचकं मधुरतरं सरलतरं भावात्मकमुपदेशात्मकं च अस्ति। अत्र ये पाठाः चिताः तेषां भाषा बालानां सुखबोधाय सरला सुगमा ग्राह्या च वर्तते। एतेषु नीतिपरकपाठेषु जीवनस्य व्यावहारिकपक्षो वर्णितः। साम्प्रतिके काले छात्रेषु नैतिकता प्रायेण लुप्ता अतः तस्या विकासार्थमयं कथासङ्ग्रहः सङ्कलितः। एतदेव अस्य कथासङ्ग्रहस्य प्रमुखमुद्देश्यम्। वर्तमानशासनशिक्षाप्रणाल्यां शिक्षाविदः चिन्तितवन्तः यत् पाठ्यवस्तु छात्राणां स्तरानुरूपं रुचिकरं सरलमुपयोगि च स्यात्। इदं सर्वमाधृत्य कर्त्तव्याकर्त्तव्योपदेशात्मकाः, रुचिकराः, सरलाः, पदे पदे च सुभाषितैर्युताः कथा अत्र प्रस्तुताः सन्ति।

## पञ्चतन्त्रस्य परिचयः

पञ्चतन्त्रं पञ्चसु तन्त्रेषु निबद्धमत्र तन्त्रशब्दः विभागस्य खण्डस्य वा द्योतकः। एतानि पञ्च तन्त्राणि (१)मित्रभेदः (२)मित्रसम्प्राप्तिः (३)काकोलुकीयम् (४)लब्धप्रणाशम्(५) अपरीक्षितकारकञ्च।

**कथामुखम्**- मित्रभेदस्य प्रधानकथायाः प्राक् अमरशक्तेः जडबुद्धीनां पुत्राणामाख्यानमस्ति। एतैः अविनीतैः मूर्खैः पुत्रैः नृपो दुःखी वर्तते। 'अहं षण्मासाभ्यन्तरे तव पुत्रान् नयशास्त्रं प्रति असाधारणान् करिष्यामि' इति विष्णुशर्मणः प्रतिज्ञां श्रुत्वा नृपः तस्मै स्वपुत्रान् समर्पयति।

**(१) मित्रभेदः**- तन्त्रेऽस्मिन् एका मुख्या कथा त्रयोविंशतिः उपकथाश्च वर्णिताः सन्ति। मुख्या कथा एवमस्ति-कदाचित् पिङ्गलको नाम सिंहः आपत्तिकाले स्वस्वामिपरित्यक्तं सञ्जीवकनामकं वृषभं संरक्षति। तस्य सिंहस्य करटकदमनकौ शृगालौ विश्वासभाजौ मन्त्रिणौ स्तः, तयोरनिच्छया सिंहः वृषभेण सह मित्रतां करोति। ततः शृगालौ प्रपञ्चयुतानि उपाख्यानानि प्रस्तुतवन्तौः, तेन सिंहो वृषभे अविश्वासं करोति। तदनन्तरं स वृषभः तेन हन्यते। सिंहश्च गतासुं तं दृष्ट्वा अनुशोचति-'विश्वासघातात् पापतरम् अन्यत् कर्म नास्ति।'

मित्रयोर्मध्ये भेदः उपस्थाप्यते, अतः 'मित्रभेदः' इति नामकरणं विहितमस्य तन्त्रस्य।

**(२) मित्रसम्प्राप्तिः**- अस्मिन् तन्त्रे एका मुख्या कथा सप्त उपकथाश्च सन्ति। चित्रग्रीवो नाम कपोतराजः सपरिवारः कस्यचित् लुब्धकस्य जाले निबद्धो भवति। लुब्धकमायान्तं दृष्ट्वा स तान् कपोतान् कथयति-'अहो, न भेतव्यम्। सपाशजालैरस्माभिः उड्डयितव्यम्।' एवं कृत्वा सः परिवारं स्वमित्रस्य हिरण्यकस्य गृहं गत्वा पाशबन्धनात् मोचयति। यदा हिरण्यकः चित्रग्रीवस्य पाशं छेत्तुमुद्यतो भवति तदा स वदति-'भद्र! प्रथमं मम भृत्यानां पाशच्छेदं कुरु।' तदनु मम।'

यदा कपोताः पाशमुक्ताः भवन्ति, तदनन्तरं लघुपतनको नाम वायसः मूषकेण मन्थरकनामकेन कूर्मेण च सह मित्रतां प्राप्नोति। हिरण्यकः ताम्रचूडस्य सन्न्यासिनः कथनं श्रावयित्वा स्वगृहपरित्यागस्य कारणं तस्मै वायसाय कथयति। अस्मिन्नेव क्रमे चित्राङ्गनाम्ना मृगेण सह हिरण्यकस्य मैत्री जायते। एकदा स मृगः अपि जाले निबद्धो भवति। बहुकालं प्रतीक्षानन्तरं येन केनापि प्रकारेण स स्वमित्रैः (काकमृगकपोतमूषकैः) बन्धनमुक्तो जायते।

अस्मिन् तन्त्रे काकमृगकपोतमूषकाः परस्परं मित्राणि भूत्वा समागतानां विपत्तीनां बन्धनात् मुक्ताः जाताः। अतः मित्रस्य सम्प्राप्तिः यत्र मित्रसम्प्राप्तिः इति तन्त्रस्य अन्वर्थसंज्ञा। अन्ते मित्रस्य महत्त्वं कथयित्वा तन्त्रं समाप्यते।

**(३) काकोलूकीयम्**- अत्र एका मुख्या कथा सप्तदश उपकथाश्च सन्ति। काकश्च उलूकश्च तयोः

समाहार: काकोलूकम्, तदधिकृत्य कृतमेतत्तन्त्रम्। अस्मिन् तन्त्रे सन्धिविग्रहयो: वर्णनमस्ति। मुख्या कथा इत्थमस्ति–

एकस्मिन् न्यग्रोधपादपे मेघवर्णो नाम वायसराज: प्रतिवसति स्म। तस्य समीपे गिरिगुहायाम् अरिमर्दनो नाम उलूकराज: बहूलूकपरिवारै: सह प्रतिवसति स्म। स च रात्रौ नित्यं न्यग्रोधं समया परिभ्रमति। पूर्वविरोधवशात् स कञ्चित् वायसम् आसादयति, तं हत्वा गच्छति। इत्थं त्रस्तो वायसराज: सर्वान् सचिवान् आहूय उवाच–भो:! अस्माकं शत्रु: उलूकराज: प्रबल: नित्यं निशागमे अस्मत्पक्षीयप्राणिविनाशं करोति। कथमस्य प्रतीकार: करणीय:। कथमेष: अस्माकं शत्रु:? सर्वेषां सचिवानां नीतिविचारान् ज्ञात्वा मेघवर्ण: पितृसचिवं स्थिरजीविनामानं प्रणम्य आह–भवद्भ्य: एतेषां सचिवानां विचारा: श्रुता:, अधुना यदुचितं तन्मे समादिशन्तु।' सर्वप्रथमं स पितृसचिव: काकोलूकस्य शाश्वतिकवैरकथां श्रावयति– कदाचित् सर्वे पक्षिण: समेत्य वैनतेयस्य(गरुडस्य) स्थाने उलूकस्य नाम राजपदाय प्रस्तुतवन्त: किन्तु वायस: कथयति– एतत् न युक्तम्, मयूरहंसकोकिलादिषु पक्षिप्रधानेषु विद्यमानेषु दिवान्धस्य भयानकमुखस्य अभिषेक: न शोभनीय:। तदा प्रभृति काकोलूकस्य शाश्वतिकशत्रुता जाता। तत: मेघवर्ण: कथयति– 'अस्माभि: किं करणीयम्?' स्थिरजीवी प्रोवाच–'स्वयमेव अहं त्वद्विजयाय यास्यामि, रिपून् वञ्चयित्वा वधिष्यामि।' मेघवर्णो युक्तिमिमां स्वीकरोति। तदा स्थिरजीवी तेन सह कृत्रिमकलहं प्रारभते। समाहृतरुधिरै: आलिप्य तदुपदिष्टम् ऋष्यमूकपर्वतं सपरिवारो गत: मेघवर्ण:। स स्थिरजीवी अपि अरिमर्दनस्य शरणं गच्छति, युक्त्या विश्वासं प्राप्य तत्रैव निवसति। तत: गुहायां स्वनीडनिर्माणार्थं काष्ठसङ्ग्रहं करोति, तदनुसारं मेघवर्ण: सपरिजन: एकैकां ज्वलन्तीं वनकाष्ठिकां तद्गुहाद्वारं प्रक्षिपति। इत्थमरिमर्दन: सपरिजन: मृत:। एवम् अनेकै: नीतिपरकश्लोकै: तन्त्रं समाप्यते।

**(४) लब्धप्रणाशम्**– लब्धस्य प्रणाशो यत्र तत् तन्त्रं लब्धप्रणाशमिति। एकया मुख्यकथया एकादशोपकथाभि: युतमिदं तन्त्रम्। मुख्यकथायां रक्तमुखनामकस्य वानरस्य करालमुखमकरस्य च कथा वर्तते। वानर: प्रतिदिनं मकराय जम्बूफलानि ददाति स्म। सोऽपि तानि भक्षयित्वा तेन सह चिरं वार्तालापसुखमनुभूय शेषाणि फलानि भार्यायै अर्पयति स्म। सा तयो: प्रगाढमैत्रीं दृष्ट्वा कथितवती–'स: सदा अमृततुल्यानि फलानि भक्षयति, तस्य हृदयम् अमृतमयं भविष्यति। अत: तस्य हृदयं मह्यम् प्रयच्छ, येन तद्भक्षयित्वा जरामरणरहिता त्वया सह सभोगान् भोक्ष्ये। मकरोऽब्रवीत्–'स अस्माकं भ्राता, अपरं फलदाता, अत: त्यज एनं मिथ्याग्रहम्।' मकरी आह–'यदि तस्य हृदयं न भक्षयामि, तर्हि मम मरणं सुनिश्चितं जानीहि।' अप्रीतो मकर: वानरपार्श्वं गच्छति, नैकै: नीतिवचनै: स्वगृहं गन्तुं तं वानरं प्रसादयति सोऽपि गन्तुमुत्सुक: तस्य पृष्ठम् आरूढ:। परं समुद्रस्य मध्ये वानरेण मकरस्य योजना ज्ञायते। प्रत्युत्पन्नमति: वानर:क थयतिय त्म मह्य दयंज म्बूकोटरेस दैवम यास ुगुसंक् तम् ाा दाकर्ण्यम कर:स ानन्दमाह–अहंत वांत मेव जम्बूपादपं प्रापयामि। वानरोऽपि कथमपि जल्पितविविधदेवतोपचारपूर्ण: तीरमासादयति जम्बूपादपं च शीघ्रमारोहति। चिन्तयति च–'अहो। लब्धा: तावत् प्राणा:।' मकर: आह–'भो मित्र! अर्पय तत् हृदयम्।' वानर: विहस्य तमाह–'धिक् धिक् मूर्ख! विश्वासघातक!' किं कस्यचित् हृदयद्वयं भवति।' मकर: पुन: मैत्रीं प्रदर्शयति परं वानर: नैकै: नीतिवचनैरुपाख्यानैश्च तं प्रति धिक्कृतं कथयति। एवं तन्त्रस्य समाप्ति: भवति।

**(५) अपरीक्षितकारकम्**– न परीक्षितम् अपरीक्षितं, कुर्वन्तीति कारका:, अपरीक्षितस्य कारका: अपरीक्षितकारका:, तान् अधिकृत्य कृतं तन्त्रम् अपरीक्षितकारकम् इति। अत्र एका मुख्या कथा चतुर्दश उपकथाश्च सन्ति। मुख्या कथा इत्थमस्ति–क्वचित् मणिभद्रो नाम श्रेष्ठी धनक्षयात् विषादं प्राप्त:। रात्रौ स्वप्ने तस्य समीपे पद्मनिधि: क्षपणकरूपे दर्शनं दत्त्वा आह श्रेष्ठिन्! अनेन एव रूपेण प्रात: त्वद्गृहम् आगमिष्यामि, त्वया लगुडप्रहारेण अहं शिरसि ताडनीय:, येन कनकमयो भूत्वा अक्षयो भवामि। एतस्मिन्नेव काले तस्य भार्यया कश्चित् नापित: पादरञ्जनाय आहूत:। अत्रान्तरे क्षपणक: सहसा प्रादुर्बभूव। प्रहृष्टमना: स श्रेष्ठी काष्ठदण्डेन तस्य शिरसि अताडयत्, सोऽपि सुवर्णमयो भूत्वा भूमौ निपतित:। नापितोऽपि स्वगृहं गत्वा व्यचिन्तयत्–'मया अपि एवमेव करणीयम्।' तेन केचन क्षपणका: हता:। स

सुवर्णराशिं तु न प्राप्तवान् किन्तु क्रुद्धन्यायाधीशः तस्मै मृत्युदण्डम् अयच्छत्। तन्त्रस्य अन्ते नीतिववचनानि व्यावहारिकोपख्यानानि च दत्तानि सन्ति। तद्यथा–

**मन्त्रे तीर्थे द्विजे देवे देवज्ञे भेषजे गुरौ।**

**यादृशी भावना यस्य सिद्धिर्भवति तादृशी।।**

पञ्चतन्त्रस्य कथाभिः छात्रेषु नैतिकताया व्यावहारिकज्ञानस्य च प्रवर्धनं भवति इति बुद्ध्या अस्मिन् पुस्तके पञ्चसु पाठेषु पञ्च महत्त्वपूर्णाः कथाः गृहीताः। कथाश्च सरसाः सरलाः च सन्ति। आशास्महे छात्राः लाभं प्राप्स्यन्ति।

**पञ्चतन्त्रस्य कर्तुः परिचयः**– पञ्चतन्त्रस्य रचयिता सर्वशास्त्रनिष्णातः पं. विष्णुशर्मा अस्ति। चाणक्यस्यापि अपरं नाम विष्णुशर्मा प्रचलितं वर्तते। अतः बहुभिः विद्वभिः पञ्चतन्त्रं चाणक्यस्य एव रचना स्वीक्रियते। परं प्रस्तावनायाः श्लोकेषु तयोः पार्थक्यं मन्यते। वस्तुतः अत्र यानि नीतिविषयकगूढतत्त्वानि दत्तानि सन्ति, तैः प्रतीयते यत् चाणक्यसदृशः विद्वानेव अस्य रचनाकारः भवितुं शक्यते। पञ्चतन्त्रस्य रचनाकालः २०० ई.पू. इति कीथहर्टेलमहाशयौ स्वीकृतवन्तौ। गुणाढ्यकृतबृहत्कथायांप ञ्चतन्त्रस्यउ ल्लेखोऽस्ति।अ तःअ स्यस मयः३ ००ई .पू.अ धिकप्रामाणिकःस वीक्रियते। पञ्चतन्त्रस्य भाषा ललिता हृदयग्राह्या सरला सुबोधा च वर्तते। पदे पदे अलङ्कृता व्यङ्ग्यपूर्णा शैली च प्रयुक्ताऽस्ति।

# नवमः पाठः

# काष्ठभ्रष्टकच्छपकथा

(पञ्चतन्त्रस्य मित्रभेदतः)

**पाठ-परिचयः**

अयं पाठः पं. विष्णुशर्मविरचितस्य पञ्च तन्त्रस्य मित्रभेदाद् उद्धृतोऽस्ति। अस्मिन् तन्त्रे एका मुख्या कथा त्रयोविंशतिः उपकथाश्च वर्णिताः सन्ति। अत्र द्वयोः हंसयोः एकस्य कच्छपस्य च कथा चित्रिताऽस्ति। यो जनो हितकामानां मित्राणां वचः न अङ्गीकरोति, तस्य विनाशः अवश्यं भवति। इत्यस्य समर्थने एका टिट्टिभी स्वपतिं टिट्टिभमिमां कथां श्रावयति। कस्मिंश्चिज्जलाशये कम्बुग्रीवः नाम कच्छपः आसीत्। तस्य च सङ्कट-विकटनाम्नी हंसौ मित्रे आस्ताम्। एकदा जलाभावात् ते प्रभूतजलयुक्तं सरो गच्छन्तः आसन्, किन्तु भवता मौनव्रतेन स्थातव्यमिति हंसाभ्यां कथितं वचः कच्छपेन न कृतम्। तेन सः मृतः। अतएव कथ्यते-

**सुहृदां हितकामानां न करोतीह यो जनः। सः कूर्म इव दुर्बुद्धिः काष्ठाद् भ्रष्टो विनश्यति।।**

**अस्ति कस्मिंश्चिज्जलाशये कम्बुग्रीवो नाम कच्छपः। तस्य च सङ्कटविकटनाम्नी मित्रे हंसजातीये परमस्नेहकोटिमाश्रिते, नित्यमेव सरस्तीरमासाद्य, तेन सहाऽनेक-देवर्षि-महर्षीणां कथाः कृत्वाऽस्तमयवेलायां, स्वनीडसंश्रयं कुरुतः। अथ गच्छता कालेनाऽनावृष्टिवशात्सरः शनैः शनैः शोषमगमत्। ततस्तद्दुःखदुःखितौ तावूचतुः- 'भो मित्र! जम्बालशेषमेतत्सरः सञ्जातं, तत्कथं भवान् भविष्यतीति व्याकुलत्वं नो हृदि वर्तते। तच्छ्रुत्वा कम्बुग्रीव आह-' भो! साम्प्रतं नाऽस्त्यस्माकं जीवितव्यं, जलाऽभावात्। तथाप्युपायश्चिन्त्यतामिति।**

**व्याख्या**- कस्मिंश्चित्, जलाशये = सरोवरे, तडागे इत्यर्थः, कम्बुग्रीवो नाम = एतन्नामकः, कच्छपः = कूर्मः, अस्ति = आसीत् वर्तमानसामीप्ये भूते लट्। तस्य = कम्बुग्रीवस्य, च, सङ्कटविकटनाम्नी = सङ्कटविकटाख्ये, मित्रे = सखायौ, हंसजातीये = हंसजात्युत्पन्ने, हंसौ वा, परमस्नेहकोटिम् = प्रेमातिशयम्, आश्रिते-प्राप्ते, नित्यमेव = सर्वदैव, प्रतिदिनम् इत्यर्थे, सरस्तीरम् = तडागस्य तटम्, आसाद्य = प्राप्य, तेन = कच्छपेन, सह = साकम्, अनेक-देवर्षि-महर्षीणाम् = नैक-सुराणां मुनीनां महामुनीनां च, कथाः = कथानकानि, कृत्वा = श्रुत्वा, श्रावयित्वा च, अस्तमयवेलायाम् = सायंकाले, स्वनीडसंश्रयं = स्वकुलायाश्रयणं, (नीड = घोंसला इति भाषायाम्), कुरुतः = कुर्वाते। अथ = इत्थम्, गच्छता कालेन = व्यतीते समयाधिक्ये, अनावृष्टिवशात् = वृष्ट्यभावे, सरः = तडागः, शनैः शनैः = किञ्चित्कालानन्तरम्, शोषमगमत् = शुष्कस्य भावं शोषम्, शुष्कं जातम् इति, ततः = तदनन्तरम्, तद्दुःखदुःखितौ = तडागस्य जलाभावदुःखेन पीडितौ, तौ = हंसौ, ऊचतुः = उक्तवन्तौ, भो मित्र! = हे सुहृत्! जम्बालशेषम् = पङ्कावशेषम्, एतत् = पुरो दृश्यमानम्, सरः = तडागः, सञ्जातम् = विहितम्, ततः = तर्हि, कथम् = केन प्रकारेण, भविष्यति = प्राणान् धारयिष्यति, इति = इत्थम्प्रकारिणी, व्याकुलत्वम् = दुःखम्, नः = अस्माकम्, हृदि = मनसि, वर्तते = अस्ति। तच्छ्रुत्वा = तदाकर्ण्य, कम्बुग्रीवः = एतन्नामकः कच्छपः, आह = उवाच, भो = अयि, साम्प्रतम् = इदानीम्, अस्माकम् = नः, जीवितव्यम् जीवनम्, नास्ति = न वर्तते, जलाऽभावात् = जलस्य अभावकारणात्, तथापि = तावदपि उपायः = जीवनमार्गः, चिन्त्यताम् = विचारणीयः इति।

**समासः -** कच्छपः -कच्छेन पिबति (उपपदसमासः)। महर्षीणाम् = महान्तश्च ते ऋषयः महर्षयः तेषाम् (कर्मधारय)। स्वनीडसंश्रयम्-स्वस्य नीडं स्वनीडम्, तस्य संश्रयम्, स्वनीडसंश्रयम् (षष्ठी-तत्पुरुषः)। जलाऽभावात् = जलस्य अभावः तस्मात् (षष्ठी-तत्पुरुषः)

**सन्धिविच्छेदः**- कम्बुग्रीवो नाम = कम्बुग्रीवः+नाम (विसर्गसन्धिः उत्वम्)। सरस्तीरम् = सरः+तीरम् (विसर्गसन्धिः सत्वम्)। देवर्षिः = देव+ऋषिः (गुणसन्धिः)। तावूचतुः = तौ+ऊचतुः (अयादिसन्धिः)। तच्छ्रुत्वा = तत्+श्रुत्वा (हल्सन्धिः श्चुत्वं छत्वं च)। तथाप्युपायः = तथापि+उपायः (यण्-सन्धिः)।

**प्रकृतिप्रत्ययौ**- आश्रिते = आङ्+श्रि+क्त। कृत्वा= डुकृञ्+क्त्वा। श्रुत्वा = श्रु+क्त्वा। संश्रयम् = सम्+श्रि+अच्(अम्)। गच्छता = गम्+शतृ (टा)। दुःखितः = दुःख+इतच्। जीवितव्यम् = जीव्+तव्यत्। उक्तञ्च,

**त्याज्यं न धैर्यं विधुरेऽपि काले,**
**धैर्यात्कदाचित्स्थितिमाप्नुयात्सः।**
**जाते समुद्रेऽपि च पोतभङ्गे,**
**सांयात्रिको वाञ्छ ति तर्तुमेव।।**

**प्रसङ्गः** – धैर्यस्य माहात्म्यं प्रदर्श्यतेऽत्र यत् कदापि धैर्यं न त्याज्यम्।

**पदच्छेदः** – त्याज्यम् न धैर्यम् विधुरे अपि काले धैर्यात् कदाचित् स्थितिम् आप्नुयात् सः। जाते समुद्रे अपि च पोतभङ्गे सांयात्रिकः वाञ्छ ति तर्तुम् एव।

**अन्वयः** – विधुरे अपि काले धैर्यं न त्याज्यम्। धैर्यात् कदाचित् सः स्थितिम् आप्नुयात्। समुद्रे पोतभङ्गे जाते अपि च सांयात्रिकः तर्तुम् एव वाञ्छ ति।

**व्याख्या**– विधुरे अपि = विपरीतेऽपि, विपदि अपि इत्यर्थः। काले = समये। धैर्यम् = गाम्भीर्यम्। न = नहि। त्याज्यम्= हातव्यम्। धैर्यात्= गाम्भीर्यात्। कदाचित्= कस्मिन्नपि काले। सः= धैर्यवान्। स्थितिम्= स्थानं, यथेष्टमित्यर्थः।अ ाप्नुयात् = लभेत।स मुद्रे = जलधौ।प ोतभङ्गेज ातेअ पि = जलयानभग्नेअ पि।स ांयात्रिकः = पोतवणिक्। तर्तुम् एव = पारं गन्तुमेव। वाञ्छ ति = इच्छति।

**सरलार्थः** – आपत्तिकालेऽपि जनः धैर्यं न त्यजेत्। धैर्यात् इष्टसिद्धिः प्राप्यते। यथा पोतवणिक् (जहाजी व्यापारी) समुद्रे वाणिज्यद्रव्यपूर्णजलयानस्य नाशे जाते अपि धैर्यपूर्वकं काष्ठफलकादिकं गृहीत्वा तरितुमिच्छति, अथवा पोतभङ्गेन धनविनाशे सत्यपि पुनरपि धैर्यमासाद्य व्यापारं कर्तुम् इच्छति इत्यर्थः।

**व्याकरणम्**– विधुरेऽपि = विधुरे+अपि (पूर्वरूप–सन्धिः)। समुद्रेऽपि = समुद्रे+अपि (पूर्वरूप– सन्धिः)। पोतभङ्गे = पोतस्य भङ्गः पोतभङ्गः तस्मिन् (ष.–तत्पुरुषः)। त्याज्यम् = त्यज्+ण्यत्। धैर्यम् = धीर+ष्यञ्। स्थितिम् = स्था+क्तिन् (अम्)। जाते = जन+क्त (ङि)।

**छन्दः** – इन्द्रवज्रा।

**तदानीयतां काचिद् दृढरज्जुर्लघुकाष्ठं वा। अन्विष्यतां च प्रभूतजलसनाथं सरः। येन मया मध्यप्रदेशे दन्तैर्गृहीते सति, युवां कोटिभागयोस्तत्काष्ठं मया सहितं संगृह्य, तत्सरो नयथः।**

तावूचतुः–' भो मित्र! एवं करिष्यावः, परं त्वया मौनव्रतेन स्थातव्यम्, नो चेत्तव काष्ठोत्पातो भविष्यति।

**व्याख्या**– तत् = एतस्मात् कारणात्। काचित् दृढरज्जुः = काऽपि एका सशक्तरज्जुः (रस्सी इति भाषायाम्)। लघु = क्षुद्रं स्वल्पं वा इत्यर्थः। काष्ठम् = दारु। वा = अथवा, आनीयताम् = आह्रियताम्। प्रभूतजलसनाथम् = बहुजलपरिपूर्णम्। सरः = तडागः। च = तथा। अन्विष्यताम् = अन्वेषणं क्रियताम्। येन = येन कारणेन। मया = कच्छपेन। मध्यप्रदेशे = मध्यमभागे। दन्तैः = रदनैः। गृहीते सति = गृह्यमाणे। युवां = हंसौ। कोटिभागयोः = अग्रकोणांशयोः। तत्काष्ठम् = पूर्वोक्तं दारु। मया सहितं = कच्छपेन युक्तम्। संगृह्य = गृहीत्वा। तत्सरः = तं बहुजलयुक्तं तडागम्। नयथः = वहथः

तौः = हंसौ। ऊचतुः = आहतुः। भो मित्र! = हे सुहृत्। एवम् = इत्थम्। करिष्यावः = विधास्यावः। परम् = किन्तु। भवता = त्वया कच्छपेन। मौनव्रतेन = मौनिना। स्थातव्यम् = भवितव्यम् अर्थात् मुखं न उद्घाटयितव्यम्। नो चेत् = अन्यथा। तव = भवतः। काष्ठात् = दारुणः। पातो भविष्यति = पतिष्यति, पतनं भविष्यति इत्यर्थः।

**समासः** – दृढरज्जुः = दृढा च असौ रज्जुः (कर्मधारयसमासः)। लघुकाष्ठम् = लघु च तत् काष्ठम् (कर्मधारयसमासः)। प्रभूत–जलसनाथम् = प्रभूतं च तत् जलं प्रभूतजलं तेन सनाथम् = प्रभूतजलसनाथम् (कर्मधारयगर्भतृतीयातत्पुरुषः)।

**सन्धिविच्छेदः** – तावूचतुः = तौ+ऊचतुः (अयादि सन्धिः)। दन्तैर्गृहीते = दन्तैः+गृहीते (विसर्ग –रुत्व– सन्धिः)। संगृह्य = सम्+गृह्य (अनुस्वारसन्धिः)। काष्ठं वा = काष्ठम्+वा (अनुस्वारसन्धिः)।

**प्रकृतिप्रत्ययौ** – स्थातव्यम् = स्था+तव्यत्। दृढः = दृह्+क्त। संगृह्य = सम्+ग्रह्+ल्यप्। गृहीते = ग्रह्+क्त

(ङि)।प्रदेशे = प्र+दिश्+घञ् (ङि)।

**तथाऽनुष्ठिते, गच्छता कम्बुग्रीवेणऽधोभागे व्यवस्थितं किञ्चित्पुरमालोकितम्। तत्र ये पौरास्ते तं तथा नीयमानं विलोक्य सविस्मयमिदमूचुः – 'अहो! चक्राकारं किमपि पक्षिभ्यां नीयते, पश्यत। पश्यत।।**

**अथ तेषां कोलाहलमाकर्ण्य, कम्बुग्रीव आह–'भो! किमेषः कोलाहलः?' इति वक्तुमना अर्धोक्ते पतितः, पौरैः, खण्डशः कृतश्च।**

**व्याख्या–** तथाऽनुष्ठिते = लघुकाष्ठखण्डे कच्छपेन दन्तैर्गृहीते सति। गच्छता = व्रजता। कम्बुग्रीवेण = एतन्नामकेन कच्छपेन। अधोभागव्यवस्थितम् = निम्नस्थितम्। किञ्चित् = किमपि। पुरम् = नगरम्। आलोकितम् = दृष्टम्। तत्र = तस्मिन् नगरे। ये पौराः = ये नागरिकाः। (ते) तम् = कच्छपम्। तथा = तेन प्रकारेण। नीयमानम् = हरन्तम्। विलोक्य = दृष्ट्वा। सविस्मयम् = आश्चर्यान्वितम्। इदम् = इत्थम्। ऊचुः = आहुः। अहो! = आश्चर्यार्थे अव्ययम्। चक्राकारम् = वर्तुलाकृतिम्। किमपि = किञ्चित्। पक्षिभ्याम् = खगाभ्याम्। नीयते = ह्रियते। पश्यत! पश्यत!! = अवलोकय! अवलोकय!! अथ = अनन्तरम्। तेषाम् = पुरवासिनाम्। कोलाहलम् = शब्दध्वनिम्। आकर्ण्य = श्रुत्वा। कम्बुग्रीवः = स कच्छपः। आह = उवाच 'भो' = अरे! 'किमेषः किमर्थम्! कोलाहलः = शब्दनादः। इति = इत्थम्। वक्तुमनाः = कथयितुम् इच्छुकः। अर्धोक्ते = अर्धवचने कथिते। पतितः = पतनं प्राप्तवान्। पौरैः = नागरिकैः। खण्डशः = खण्ड–खण्डम्। कृतश्च = विहितश्च।

**समासः** – चक्राकारम् = चक्रमिव आकारः चक्राकारः तम् (कर्मधारयसमासः)। कम्बुग्रीवः = कम्बुवत् ग्रीवा यस्य स कम्बुग्रीवः (बहुव्रीहिसमासः)। अर्धोक्तः = अर्धम् उक्तस्य अर्धोक्तः (षष्ठी–तत्पुरुषः)।

**सन्धि–विच्छेदः–** पौरास्ते = पौराः+ते (विसर्गसन्धिः, सत्वम्)। चक्राकारम् = चक्र+आकारम् (दीर्घसन्धिः)। अर्धोक्तः = अर्ध+उक्तः (गुणसन्धिः)। तथाऽनुष्ठिते = तथा+अनुष्ठिते (दीर्घसन्धिः)।

**प्रकृतिप्रत्ययौ–** गच्छता = गम्+शतृ (टा)। व्यवस्थितम् = वि+अव+स्था+क्त। पौराः = पुर+अण् (जस्)। नीयमानम् = नी+यक्+शानच् (अम्)। आकर्ण्य = आ+कर्ण्+ल्यप्। पतितः = पत्+क्त।

**अत एव उच्यते–**

**सुहृदां हितकामानां न करोतीह यो वचः।**
**स कूर्म इव दुर्बुद्धिः काष्ठाद् भ्रष्टो विनश्यति।।**

**प्रसङ्गः** – मित्राणां वचांसि यो जनः न स्वीकरोति, स दुःखं प्राप्नोतीत्याह कथाकारः।

**पदच्छेदः** – सुहृदाम् हितकामानाम् न करोति इह यः वचः। सः कूर्मः इव दुर्बुद्धिः काष्ठाद् भ्रष्टः विनश्यति।

**अन्वयः** – यः हितकामानां सुहृदां वचः इह न करोति। सः दुर्बुद्धिः काष्ठाद् भ्रष्टः कूर्मः इव विनश्यति।

**व्याख्या–** यः = यः जनः। हितकामानाम् = हितैषिणाम्। सुहृदाम् = मित्राणाम्। वचः = वचनम्, हितकारिकथनमित्यर्थः। इह = संसारे। न करोति = न शृणोति। सः = असौ। दुर्बुद्धिः = दुष्टा बुद्धिर्यस्य सः दुर्मतिः इति। काष्ठात् = काष्ठखण्डात्। भ्रष्टः = पतितः। कूर्मः = कच्छपः। इव = यथा। विनश्यति = विनाशं प्राप्नोति।

**सरलार्थः** – अस्मिन् संसारे यो जनः हितार्थिनां मित्राणां वचनानि न शृणोति, स जनः दुःखं प्राप्नोति, यथा हंसयोः वचनमपालयन् कूर्मः मृतः।

**व्याकरणम्–** सुहृदाम् = शोभनं हृदयं यस्य सः, तेषां (बहुव्रीहिसमासः) दुर्बुद्धि = दुष्टा बुद्धिः यस्य सः दुर्बुद्धिः (बहुव्रीहिः)। करोतीह = करोति+इह (दीर्घसन्धिः)। यो वचः = यः + वचः (विसर्गसन्धिः उत्वम्)। काष्ठाद्भ्रष्टः = काष्ठात्+भ्रष्टः (जश्त्वसन्धिः)। भ्रष्टः = भ्रंश्+क्त। हितम् = धा+क्त। कामः = कम्+घञ्। दुर्बुद्धिः = दुर्+बुध्+क्तिन्।

**छन्दः** – अनुष्टुप् वृत्तम्।

# अभ्यास-प्रश्नाः

**बहुविकल्पात्मक-प्रश्नाः**

१. पञ्चतन्त्रस्य रचनाकारो वर्तते-

(अ) पं. नारायणः (ब) पं. विष्णु शर्मा

(स) भर्तृहरिः (द) भासः

२. पञ्चतन्त्रे प्रथमं तन्त्रमस्ति-

(अ) मित्रसम्प्राप्तिः (ब) लब्धप्रणाशम्

(स) मित्रभेदः (द) काकोलूकीयम्

३. कच्छपस्य नाम आसीत्-

(अ) कम्बुग्रीवः (ब) सङ्कटः

(स) विकटः (द) हिरण्यकः

४. सङ्कटविकटौ आस्ताम्-

(अ) वायसौ (ब) कच्छपौ

(स) शशकौ (द) हंसौ

५. 'तावूचतुः' इत्यत्र सन्धिः अस्ति-

(अ) गुणसन्धिः (ब) यण्सन्धिः

(स) अयादिसन्धिः (द) वृद्धिसन्धिः

६. 'त्याज्यम्' इत्यत्र प्रत्ययः वर्तते-

(अ) यत् (ब) ण्यत्

(स) क्यप् (द) अण्

७. यः सुहृदां वचः न पालयति सः -

(अ) विनश्यति (ब) जीवति

(स) निन्दयति (द) जानाति

८. 'पश्यत ! पश्यत !' इति ये ऊचुः ते -

(अ) मित्राणि (ब) बालाः

(स) पौराः (द) काकाः

**अतिलघूत्तरात्मक-प्रश्नाः**

१. अयं पाठः पञ्चतन्त्रस्य कस्मात् तन्त्रात् उद्धृतः?

२. विधुरेऽपि काले किं न त्याज्यम्?

३. कच्छपस्य मित्रे के?

४. काष्ठात् कः पतितः?

५. 'सायांत्रिकः' इत्यस्य कोऽर्थः?

६. अनावृष्टिवशात् किं जातम्?

७. 'भो ! साम्प्रतं नाऽस्त्यस्माकं जीवितव्यम्' इति केन कथितम्?

८. 'भवता' इत्यत्र का विभक्तिः?

**लघूत्तरात्मकप्रश्नाः**

१. 'विधुरेऽपि काले धैर्यं न त्याज्यम्।' कथम्?

२. सुहृदां वचः अश्रुत्वा जनः कथं विनश्यति?

३. सरो गन्तुं तैः क उपायः चिन्तितः?

४. कच्छपः कथं मृतः?

५. कच्छपः हंसौ च कथं चिन्तितवन्तः?

**निबन्धात्मकः प्रश्नः**

१. काष्ठभ्रष्टकच्छपकथा सरलसंस्कृतेन लेख्या।

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

१.ब २.स ३.अ ४.द ५.स ६.ब ७.अ ८.स

# दशमः पाठः

# हिरण्यकताम्रचूडकथा

(पञ्चतन्त्रस्य मित्रसम्प्राप्तितन्त्रात्)

**पाठ-परिचयः** अयं पाठः पं. विष्णुशर्मविरचितस्य पञ्च तन्त्रस्य मित्रसंप्राप्तितन्त्राद् उद्धृतोऽस्ति। अस्मिन् तन्त्रे एका मुख्या कथा सप्त उपकथाश्च वर्णिताः सन्ति। अत्र ताम्रचूडाभिधेयस्य परिव्राजकस्य हिरण्यकाख्यमूषकस्य च कथा चित्रिताऽस्ति। कदाचित् लघुपतनाख्यवायसस्य मन्थरनाम्ना कच्छपेन हिरण्यकनाम्ना मूषकेण च सह मित्रता भवति। हिरण्यकः ताभ्यां पूर्वगृहपरित्यागस्य कारणं निवेदयन् इमां कथां श्रावयति। कथामध्ये वित्तसम्बद्धप्रसङ्गो रमणीयो वर्तते। तद्यथा– **ऊष्मापि वित्तजो वृद्धिं तेजो नयति देहिनाम्। किं पुनस्तस्य सम्भोगस्त्याग-कर्मसमन्वितः॥**

**'अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्। तस्य नातिदूरे मठायतनं भगवतः श्रीमहादेवस्य। तत्र च ताम्रचूडो नाम परिव्राजकः प्रतिवसति स्म। स च नगरे भिक्षाटनं कृत्वा प्राणयात्रां समाचरति। भिक्षाशेषञ्च तत्रैव भिक्षापात्रे निधाय, तद्भिक्षापात्रं नागदन्तेऽवलम्ब्य, पश्चाद्रात्रौ स्वपिति।**

**अन्यस्मिन्नहनि मम (हिरण्यकनामकस्य मूषकस्य) बान्धवैः निवेदितं–'स्वामिन्! मठायतने सिद्धमन्नं मूषकभयात्तत्रैव भिक्षापात्रे निहितं, नागदन्ते अवलम्बितं तिष्ठति सदैव। तद्वयं भक्षयितुं न शक्नुमः। स्वामिनः पुनरगम्यं किमपि नास्ति। अद्य तत्र गत्वा यथेच्छं भुञ्ज महे भवत्प्रसादात्।**

**तदाकर्ण्याऽहं (हिरण्यकः) सकलयूथपरिवृतः तत्र गतः। उत्पत्य च तस्मिन् भिक्षापात्रे समारूढः। तत्र भक्ष्यविशेषाणि सेवकानां दत्त्वा पश्चात्स्वयमेव भक्षयामि। एवं नित्यमेव तदन्नं भक्षयामि।**

**अथ कदाचित् तेन मम रक्षणार्थं महान् यत्नः कृतः जर्जरवंशश्चैकः समानीतः। तेन सुप्तोऽपि मम भयाद् भिक्षापात्रं ताडयति।**

**व्याख्या**– दाक्षिणात्ये = दक्षिणस्यां दिशि। जनपदे = देशे, मण्डले वा। महिलारोप्यं नाम = एतन्नामकम्। नगरम् = पूः पुरं वा। अस्ति = वर्तते। तस्य = तन्नगरस्य। नातिदूरे = समीपे। भगवतः = ईश्वरस्य। श्रीमहादेवस्य = शिवस्य। मठायतनम् = देवागारं मन्दिरं वा। तत्र च = तस्मिन् मन्दिरे च। ताम्रचूडो नाम = एतन्नामकः। परिव्राजकः = सन्न्यासी। प्रतिवसति स्म = निवासं करोति स्म। स च = असौ सन्न्यासी च। नगरे = पुरि। भिक्षाटनं कृत्वा = भिक्षावृत्त्या। प्राणयात्राम् = जीवनम्। समाचरति = विदधाति। भिक्षाशेषञ्च = भोगपश्चाद् अवशिष्टं भैक्ष्यम्। तत्रैव = तस्मिन्नेव स्थाने। भिक्षापात्रे = भिक्षायाः पात्रे 'झोली' इति (भाषायाम्) । निधाय = स्थापयित्वा। तद्भिक्षापात्रम् = पूर्वोक्तं भिक्षापात्रम्। नागदन्ते = गृहभित्तौ स्थापिते दण्डविशेषे 'खूंटी' इति भाषायाम्। अवलम्ब्य = आश्रयं दत्वा। पश्चात् = तदनन्तरम्। रात्रौ = रजन्याम्। स्वपिति = शेते।

अन्यस्मिन्नहनि = अपरस्मिन् दिने। मम = मे, हिरण्यकस्य। बान्धवैः = मदाश्रितैः मूषकैः। निवेदितम् = प्रार्थना कृता। स्वामिन् = राजन्। मठायतने = मन्दिरे। सिद्धमन्नम् = पक्वमन्नम्। मूषकभयात् = आखुभ्यः त्रातुम्। तत्रैव = तस्मिन्नेव भिक्षापात्रे। निहितम् = स्थापितम्। नागदन्ते = भित्तिदण्डे। अवलम्बितम् = आश्रितम्। सदैव तिष्ठति = सर्वदा विद्यते। तद् = अन्नम्। वयम् = मूषकाः। भक्षयितुम् = खादितुम्। न शक्नुमः = असमर्थाः स्मः। स्वामिनः = भवतः। पुनरगम्यं किमपि नास्ति = किमपि कठिनं न वर्तते। अतः = एतस्मात् कारणात्। तत्र गत्वा = मन्दिरं गत्वा। यथेच्छम् = इच्छानुसारम्। भुञ्ज महे = भक्षयामः। भवत्प्रसादात् = भवतः (राज्ञः) कृपया। तदाकर्ण्य = तच्छ्रुत्वा। अहम् = हिरण्यकः। सकलयथपरिवृतः = समस्तबान्धवयुक्तः। तत्र = तस्मिन् मन्दिरे। गतः = यातः। उत्पत्य च = उत्प्लुत्य। तस्मिन् भिक्षापात्रे = पर्वोक्ते पात्रे। समारूढः = आसीनः। तत्र = तस्मिन् स्थाने। भक्ष्यविशेषाणि = खादितुं विशिष्टपदार्थान्। सेवकानाम् = भृत्यानाम्, मूषकाणाम् वा। दत्त्वा = प्रदाय। पश्चात् = अनन्तरम्। स्वयमेव = आत्मना। भक्षयामि = खादामि। एवम् =

इत्थम्। नित्यमेव = प्रतिदिनम्। तदन्नं = भैक्ष्यमन्नम्। भक्षयामि = खादामि।

अथ = अनन्तरम्। कदाचित् = एकस्मिन् समये। तेन = सन्न्यासिना। मम रक्षणार्थम् = मत् भोज्यपदार्थान् रक्षयितुम्। महान् = श्रेष्ठः, यत्नः = प्रयासः। कृतः = विहितः। एकः = एकसंख्याकः। जर्जरवंशः = जीर्णवंशदण्डः। समानीतः = गृहीतः। तेन = वंशेन। सुप्तोऽपि = शयितः अपि। मम = हिरण्यकस्य। भयात् = भयकारणात्। भिक्षापात्रं = भिक्षाभाजनम्। ताडयति = नादं करोति।

**समासः** –प्ऱाणयात्राम् =प्ऱाणानांय त्रापऱाणयात्रात ां( षष्ठी–तत्पुरुषः) ाि भक्षाशेषम् =ि भक्षायाःश ेषः भिक्षाशेषः तं (षष्ठीतत्पुरुषः)। यथेच्छम् = इच्छामनतिक्रम्य (अव्ययीभावः )। जर्जरवंशः = जर्जरः च असौ वंशः (कर्मधारयसमासः)। सकलयूथपरिवृतः = सकलः च असौ यूथः तेन परिवृतः (कर्मधारयगर्भतृतीयातत्पुरुषः)। भक्ष्यविशेषाणि = भक्ष्याय विशेषाणि।

**सन्धि-विच्छेदः** – नातिदूरे = न+अतिदूरे (दीर्घसन्धिः) भिक्षाटनम् = भिक्षा+अटनम् (दीर्घसन्धिः)। तत्रैव = तत्र+एव (वृद्धिसन्धिः)। पश्चाद्रात्रौ = पश्चात्+रात्रौ (जश्त्वम्)। अन्यस्मिन्नहनि = अन्यस्मिन्+अहनि (ङमुडागमः)। यथेच्छम् = यथा+इच्छम् (गुणसन्धिः)। सुप्तोऽपि = सुप्तः + अपि (विसर्गसन्धिः उत्वपूर्वरूपे) तदन्नम् = तत्+ अन्नम् (जश्त्वम्)।

**प्रकृति-प्रत्ययौ**- अटनम् = अट् + ल्युट् (सु)। कृत्वा = कृ + क्त्वा। विधाय = वि + धा+ ल्यप्। भक्षयितुम् = भक्ष् + तुमुन्। अवलम्ब्य = अव+लम्ब्+ल्यप्। गत्वा = गम्+क्त्वा। आकर्ण्य = आ+कर्ण+ल्यप्। उत्पत्य = उद्+पत्+ल्यप्। यत्नः = यत्+नङ् (सु)। सुप्तः = स्वप्+क्त (सु)। दत्वा = दा+क्त्वा। निहितम् = नि+धा+क्त (सु)।

**अथाऽन्यस्मिन्नहनि तस्य मठे बृहत्स्फिक्नामा परिव्राजकस्तस्य सुहृत्तीर्थयात्राप्रसङ्गेन प्राघुणिकः समायातः।**

**तं दृष्ट्वा प्रत्युत्थानविधिना संभाव्य, प्रतिपत्तिपूर्वकमभ्यागतक्रियया नियोजितवान्। ततश्च रात्रौ एकत्र कुशसंस्तरे द्वावपि प्रलुप्तौ धर्मकथां कथयितुमारब्धौ।**

**अथ बृहत्स्फिक्कथागोष्ठीषु स ताम्रचूडो मूषकत्रासार्थं व्याक्षिप्तमना जर्जरवंशेन भिक्षापात्रं ताडयंस्तस्य शून्यं प्रतिवचनं प्रयच्छति तन्मयो न किञ्चिदुदाहरति।**

**अथाऽसावभ्यागतः परं कोपमुपागतस्तमुवाच-'भोस्ताम्रचूड! परिजातस्त्वं सम्यङ् न सुहृत्। तेन मया सह साह्लादं न जल्पसि। तदेकमठप्राप्त्याऽपि त्वं गर्वितः, व्यक्तः सुहृत्स्नेहः, नैतद्वेत्सि यत्त्वया मठाश्रयव्याजेन नरकोपार्जनं कृतम्। तदहं त्वदीयं मठं परित्यज्य यास्यामि।**

**व्याख्या**- अथ = अनन्तरम्। अन्यस्मिन्नहनि = अपरस्मिन् दिने। तस्य = ताम्रचूडस्य। मठे = मन्दिरे। बृहत्स्फिक्नामा = एतन्नामकः। परिव्राजकः = सन्न्यासी। तस्य = ताम्रचूडस्य। सुहृत् = मित्रम्। यात्राप्रसङ्गेन = परिभ्रमणविषयेन। प्राघुणिकः = अतिथिः। समायातः = आगतवान्।

तम् = परिव्राजकम्। दृष्ट्वा = अवलोक्य। प्रत्युत्थानविधिना = प्रत्युद्गमनाद्यनुष्ठानेन। सम्भाव्य = सत्कृत्य। प्रतिपत्तिपूर्वकम् = आदरसहितम्। अभ्यागत-क्रियया = अतिथिपरिचर्यया। नियोजितवान् = सन्तर्पितवान्। ततश्च = अनन्तरम्। रात्रौ = निशायाम्। एकत्र = एकस्मिन् स्थाने। कुशसंस्तरे = दर्भशय्यायाम्। द्वावपि = उभावपि। प्रसुप्तौ = शयनाय गतौ। धर्मकथाम् = धर्मचर्चाम्। कथयितुम् = वक्तुम्। आरब्धौ = प्रारब्धौ। अथ = अनन्तरम्। बृहत्स्फिक्कथागोष्ठीषु = बृहत्स्फिका सह वार्ताप्रसङ्गेषु। सः = असौ, ताम्रचूडः = एतन्नामकः। मूषकत्रासार्थम् = मूषकं भीषयितुम्। व्याक्षिप्तमनाः = व्याकुलचित्तः। जर्जरवंशेन = जीर्णवंशेन। भिक्षापात्रम्। ताडयन् = वादयन्! तस्य = बृहत्स्फिचः। शून्यम् = केवलम्। प्रतिवचनम् = 'हुंकार' ध्वनिना उत्तरम्। प्रयच्छति = ददाति। तन्मयः = मूषकाक्षिप्तचित्तः। न किञ्चित् = किमपि न। उदाहरति = ब्रूते।

अथ = ताम्रचूडस्य व्यस्तचित्तं दृष्ट्वा। असौ = सः। अभ्यागतः = अतिथिः। परं कोपम् = क्रोधातिशयम्। उपागतः = प्राप्तः। तम् = ताम्रचूडम्। उवाच = अवदत्। भोस्ताम्रचूड! = हे सन्न्यासिन्। परिज्ञातः = सर्वतो ज्ञातः। त्वम् =

भवान्। सम्यक् = सुष्ठु। न सुहृत् = मित्रं न। तेन = अमित्रतया। मया सह = बृहत्स्फिचा साकम्। साह्लादम् = सस्नेहम्। न जल्पसि = वार्तां न करोषि। तदेकं मठप्राप्त्याऽपि = एकं लघुमन्दिरं प्राप्य एव। त्वम् = भवान्। गर्वितः = अहङ्कारयुक्तः। व्यक्तः = दूरीकृतः। सुहृत्स्नेहः = मित्रैः सह अनुरागः। एतद् = इदम्। न वेत्सि = न जानासि। यत् त्वया = यत् भवता। मठाश्रयव्याजेन = मठस्थाधिपत्यस्वीकरणेन। नरकोपार्जनम् = दुःखमार्गः। कृतम् = विहितम्। तद् = तेन कारणेन। अहम् = बृहत्स्फिच्। त्वदीयम् = भवतः। मठम् = मन्दिरम्। परित्यज्य = विहाय। यास्यामि = गमिष्यामि।

**समासः**– बृहत्स्फिक् = बृहत्यौ स्फिचौ यस्य सः बृहत्स्फिक् (बहुव्रीहिः)। प्रत्युत्थानविधिना = प्रत्युत्थानस्य विधिः प्रत्युत्थानविधिः तेन (षष्ठी-तत्पुरुषः)। तीर्थयात्राप्रसङ्गेन = तीर्थस्य यात्रा तीर्थयात्रा, तीर्थयात्रायाः प्रसङ्गः तीर्थयात्राप्रसङ्गः तेन (षष्ठीतत्पुरुषः)। कुशसंस्तरे = कुशैः निर्मितः संस्तरः कुशसंस्तरः तस्मिन् (मध्यमपदलोपिसमासः)। कथागोष्ठीषु = कथानां गोष्ठी कथागोष्ठी, तासु कथागोष्ठीषु (षष्ठी- तत्पुरुषः)। व्याक्षिप्तमनाः = व्याक्षिप्तं मनः यस्य सः व्याक्षिप्तमनाः (बहुव्रीहिः)। जर्जरवंशेन = जर्जरश्च असौ वंशः जर्जरवंशः तेन (कर्मधारयसमासः)।

**सन्धिविच्छेदः** – तन्मयः = तद्+मयः (अनुनासिकसन्धिः)। अथासावभ्यागतः = अथ+असौ+अभ्यागतः (दीर्घसन्धिःअ यादिश्च) ।द्व ावपि =द्व ौ+अपि( अयादिसन्धिः) ।स म्यङ्न =स म्यक्+न( अनुनासिकसन्धिः)। प्राप्त्याऽपि = प्र+आप्त्या+अपि (दीर्घसन्धिः)। नैतद्वेत्सि = न+एतत्+वेत्सि (वृद्धिसन्धिः जश्त्वं च)। नरकोपार्जनम् = नरक+उपार्जनम् (गुणसन्धिः)।

**प्रकृतिप्रत्ययौ**– परिव्राजकः = परि+व्रज्+ण्वुल्। समायातः = सम्+आ+या+क्त । दृष्ट्वा = दृश्+ क्त्वा। संभाव्य = सम्+भू+णिच्+ल्यप्। नियोजितवान् = नि+युज्+णिच्+क्तवतु । तन्मयः = तद्+मयट् । त्यक्तः = त्यज्+क्त । परित्यज्य = परि+त्यज्+ल्यप्। परिज्ञातः = परि+ज्ञा+क्त । प्रतिवचनम् = प्रति+वच्+ल्युट्।

**अथ तच्छ्रुत्वा भयत्रस्तमनास्ताम्रचूडस्तमुवाच–'भो भगवन्! मैवं वद। न त्वत्समोऽन्यो मम सुहृत्कश्चिदस्ति। परं तच्छ्रूयतां गोष्ठीशैथिल्यकारणम्। 'एष दुरात्मा मूषकः प्रोन्नतस्थाने धृतमपि भिक्षापात्रमुत्प्लुत्यारोहति, भिक्षावशेषञ्च भक्षयति। तन्मूषकत्रासार्थमेतेन वंशेन भिक्षापात्रं मुहुर्मुहुस्ताडयामि।**

**बृहत्स्फिगाह–'नूनं निधानस्योपरि तस्य बिलम्। निधानोष्मणा निश्चितं प्रकूर्दतेऽसौ।**

**व्याख्या**– अथ = अनन्तरम्। तच्छ्रुत्वा = बृहत्स्फिचः भर्त्सनावचः आकर्ण्य। भयत्रस्तमनाः = भयात् पीडितचित्तः। ताम्रचूडः = एतन्नामकः सन्यासी। तम् = बृहत्स्फिचम्। उवाच = आह। भो भगवन् = हे स्वामिन्! मा एवं वद = इत्थं न कथय। त्वत्समः = भवादृशः। अन्यः = अपरः। मम = मे। सुहृत् = मित्रम्। कश्चित् न = न कोऽपि। अस्ति = वर्तते। परम् = किन्तु। गोष्ठीशैथिल्यकारणम् = धर्मचर्चायां व्यवधानस्य हेतुः। तत् = तावत्। श्रूयताम् = श्रवणीयः। एषः = अयम्। दुरात्मा = दुष्टः। मूषकः = आखुः। प्रोन्नतस्थाने = उच्चप्रदेशे। धृतमपि = स्थापितमपि। भिक्षापात्रम्। उत्प्लुत्य = उत्पतनेन। आरोहति = उद्गच्छति। भिक्षावशेषं च अवशिष्टं भिक्षान्नं च। भक्षयति = खादति। तन्मूषकत्रासार्थम् = इमं मूषकं भीषयितुम्। एतेन = अनेन। वंशेन = वंशदण्डेन। भिक्षापात्रम् = भिक्षाभाजनम्। मुहुर्मुहुः = पौनः पुन्येन। ताडयामि = वादयामि।

बृहत्स्फिक् = एतन्नामधेयः अतिथिसन्न्यासी। आह = उवाच। नूनम् = निश्चयेन। निधानस्य = भूमिस्थ-धनस्य। उपरि = ऊर्ध्वभागे। तस्य = मूषकस्य। बिलम् = गर्तः आवासस्थानम्। निधानोष्मणा = धनबाहुल्यस्य प्रभावेण। निश्चितम् = असन्देहे। असौ = मूषकः। प्रकूर्दते = उत्पतति।

**समासः** – भयत्रस्तमनाः = भयात् त्रस्तं भयत्रस्तं तच्च मनः यस्य सः भयत्रस्तमनाः (बहुव्रीहिः)। त्वत्समः = त्वया समः त्वत्समः (तृतीयातत्पुरुषः)। गोष्ठीशैथिल्य-कारणम् = शिथिलस्य भावः शैथिल्यं तस्य कारणं

शैथिल्यकारणं गोष्ठ्यां शैथिल्यकारणं गोष्ठीशैथिल्यकारणम् (षष्ठी–सप्तमी–तत्पुरुषः)। दुरात्मा = दुष्ट आत्मा दुरात्मा (प्रादितत्पुरुषः)।

**सन्धि-विच्छेदः** – मैवम् = मा+एवम् (वृद्धिः)। निधानस्योपरि = निधानस्य+उपरि (गुणः)। तन्मूषकः = तद्+मूषकः (अनुनासिकः)। त्रासार्थम् = त्रास+अर्थम् (दीर्घः)। प्रकूर्दतेऽसौ = प्रकूर्दते+असौ (पूर्वरूपम्)।

**प्रकृतिप्रत्ययौ–** भयम् = भी+अच् । त्रस्तम् = त्रस्+क्त । शैथिल्यम् = शिथिल+ष्यञ् । प्रोन्नतम् = प्र+उद्+नम्+क्त । निधानम् = नि+धा+ल्युट् । धृतम् = धृ+क्त । निश्चितम् = निस्+चि+क्त ।

**उक्तञ्च–**

**ऊष्मापि वित्तजो वृद्धिं तेजो नयति देहिनाम्।**
**किं पुनस्तस्य सम्भोगस्त्याग-कर्मसमन्वितः।।**

**प्रसङ्गः** – दानादिषु प्रयुक्तं धनं प्राणिनां प्रभावं वर्धयति एव इति ग्रन्थकार आह–

**पदच्छेदः**– उष्मा अपि वित्तजः वृद्धिम् तेजः नयति देहिनाम्। किम् पुनः तस्य सम्भोगः त्याग-कर्मसमन्वितः।

**अन्वयः** – वित्तजः ऊष्मापि देहिनां तेजः वृद्धिं नयति। तस्य त्यागकर्मसमन्वितः सम्भोगः किं पुनः?

**व्याख्या–** वित्तजः = धनात् जातः। ऊष्मापि = उत्तापः अपि। देहिनाम् = प्राणिनाम्। तेजः = प्रभावम्। वृद्धिं नयति = वृद्धिं प्रापयति वर्धयति वा इत्यर्थः। तस्य = धनस्य। त्यागकर्मसमन्वितः = दानादिव्यापारेण युक्तः। सम्भोगः = उपभोगः स्यात्। किं पुनः = तस्य विषये किं वक्तव्यम् अर्थात् तेजोवृद्धिं नयत्येव।

**व्याकरणम्–** वित्तजः = वित्तात् जायते जातः वा (उपपदसमासः)। त्यागकर्मसमन्वितः = त्यागस्य कर्म त्यागकर्म तेन समन्वितः त्यागकर्मसमन्वितः (षष्ठीतृतीया-तत्पुरुषौ)। ऊष्मापि = ऊष्मा+अपि(दीर्घः)। तेजो नयति = तेजः+नयति (उत्वसन्धिः)। पुनस्तस्य=पुनः+तस्य (विसर्गसन्धिः)। वृद्धिम् = वृध्+क्तिन् (अम्)। देहिनाम् = देह+इनि+आम्। सम्भोगः = सम्+भुज्+घञ्। त्यागः = त्यज्+घञ् । समन्वितः = सम्+अनु+इण् (इ)+क्त ।

**सरलार्थः** – यदा धनं पार्श्वे भवति, तस्य जनस्य प्रभावः लोके दृश्यते किन्तु दानादिपूर्वकं धनम् उपभुज्यते तदा अवश्यमेव मानः प्रभावश्च वर्धत एव। अतः त्यागपूर्वकं भोगः करणीयः।

**छन्दः** – अनुष्टुप्-वृत्तम्।

**तयोर्मध्ये मूषकबिलान्वेषणस्य वार्तां श्रुत्वा मयाऽपि चिन्तितम्–'अहो विनष्टोऽस्मि।' ततोऽहं भयत्रस्तमनाः सपरिवारो दुर्गमार्गं परित्यज्यान्यमार्गेण गन्तुं प्रवृत्तः। ततः सपरिजनो यावदग्रतो गच्छामि, तावत्सम्मुखीनो बृहत्कायो मार्जारः समायाति। स मूषकवृन्दमवलोक्य तन्मध्ये सहसोत्पपात।**

**अथ ते मूषका मां कुमार्गगामिनमवलोक्य, गर्हयन्तो हतशेषा रुधिरस्त्रवितवसुन्धरास्तमेव दुर्गं प्रविष्टाः।**

**अथाऽहमेकोऽन्यत्र गतः। शेषा मूढतया तत्रैव दुर्गे प्रविष्टाः। अत्राऽन्तरे स दुष्टपरिव्राजको दुर्गमुपगतः स्वहस्तिकया खनितुमारब्धः।**

**अथ तेन खनता प्राप्तं तन्निधानम्। ततो हृष्टमनास्ताम्रचूडमिदमूचेऽभ्यागतः– भो भगवन्! इदानीं स्वपिहि निःशङ्कः। एवमुक्त्वा निधानमादाय मठाभिमुखं प्रस्थितौ द्वावपि। अहमपि यावन्निधानरहितं स्थानमागच्छामि, तावदरमणीयमुद्वेगकारकं तत्स्थानं वीक्षितुमपि न शक्नोमि। एवं महाकष्टेन स दिवसो व्यतिक्रान्तः। अथाऽस्तमितेऽर्के सोद्वेगो निरुत्साहस्तस्मिन्मठे सपरिवारः प्रविष्टः।**

**अथास्मत्परिग्रहशब्दमाकर्ण्य ताम्रचूडोऽपि भूयो भिक्षापात्रं जर्जरवंशेन ताडयितुं प्रवृत्तः। अथाऽसावभ्यागतः प्राह–'सखे! किमद्याऽपि निःशङ्को निद्रां न गच्छसि। स आह–'भगवन्! भूयोऽपि समायातः सपरिवारः स दुष्टात्मा मूषकः। ततो विहस्याऽभ्यागतः प्राह–'सखे! मा भैषीः। वित्तेन सह गतोऽस्य कूर्दनोत्साहः।**

**अथाऽहं तच्छ्रुत्वा कोपाविष्टो भिक्षापात्रमुद्दिश्य विशेषादुत्कूर्दितोऽप्राप्त एव भूमौ निपतितः।**

**तद्दृष्ट्वासौ मे शत्रुर्विहस्य ताम्रचूडमुवाच-भो! पश्य कौतूहलम्। तत्स्वपिहि त्वं गतशङ्कः। तच्छ्रुत्वाऽहं मनसा विचिन्तितवान्-अहो सत्यमाह ममैषः शत्रुः। यतोऽङ्गुलिमात्रमपि कूर्दनशक्तिर्नास्ति।**

**ततश्च मद्भृत्याः प्रभाते गच्छन्तो मिथः जल्पन्ति-'अहो! असमर्थोऽयमुदरपूरणेऽस्माकम्। तत्किमनेनाराधितेन? एवं मे भृत्या मम शत्रूणां सेवकाः जाताः। तावन्मया चिन्तितम्-'अहो! धिगर्थहीनस्य पुरुषस्य जीवितम्।**

**व्याख्या-** तयोर्मध्ये = सन्न्यासिनोर्मध्ये। मूषकबिलान्वेषणस्य = आखुगर्तः कुत्र? इति ज्ञातुम्। वार्ताम् = चर्चाम्। श्रुत्वा = ज्ञात्वा। मयाऽपि = हिरण्यकेन। चिन्तितम् = विचारितम्। 'अहो = हा! विनष्टोऽस्मि = विनाशकाल आगतः। ततः = अनन्तरम्। अहम् = हिरण्यकः। भयत्रस्तमनाः = भयात् व्याकुलः। सपरिवारः = तदाश्रितमूषकैः सह। दुर्गमार्गम् = बिलपन्थानम्। परित्यज्य = त्यक्त्वा। अन्यमार्गेण = अपरपथा। गन्तुं प्रवृत्तः = यातुं रतः। ततः = अनन्तरम्। सपरिजनः = सपरिवारः। यावदग्रतः = किञ्चिद् दूरे। गच्छामि = व्रजामि। तावत् = तदैव। सम्मुखीनः = समक्षं सम्मुखं वा भूत्वा। वृहत्कायः = विशालकायः। मार्जारः = बिडालः। समायाति = आगच्छति। सः = बिडालः। मूषक-वृन्दम् = आखुसमूहम्। अवलोक्य = दृष्ट्वा। तन्मध्ये = मूषकान् अन्तरा। सहसा = अकस्मात्। उत्पपात = प्राकूर्दत।

अथ = तदनन्तरम्। ते मूषकाः = उन्दुराः। माम् = हिरण्यकम्। कुमार्गगामिनम् = दुर्गमार्गं परित्यज्य विषममार्गे प्रवृत्तम्। अवलोक्य = दृष्ट्वा। गर्हयन्तः = निन्दां कुर्वन्तः। हतशेषाः = ये मृत्युमुखं न गताः ते। रुधिरस्त्रवितवसुन्धराः = रक्तप्लावितधराः। तमेव दुर्गम् = पूर्वबिलम्। प्रविष्टाः = प्रवेशं कृतवन्तः।

अथ = अनन्तरम्। अहम् = हिरण्यकः। एकः = एकाकी एव। अन्यत्र = अन्यस्थाने। गतः = यातः। शेषाः = अन्ये। मूढतया = मूर्खतया। तत्रैव दुर्गे = तस्मिन्नेव बिले। प्रविष्टाः = गताः। अत्रान्तरे = तदैव। सः = असौ। दुष्टपरिव्राजकः = वृहत्स्फिक्। दुर्गम् = बिलम्। उपगतः = प्राप्तः। स्वहस्तिकया = खनित्रेण। खनितुम् = खननं कर्तुम्। आरब्धः = प्रवृत्तः।

अथ = ततः। तेन = सन्न्यासिना। खनता = खननं कुर्वता। तन्निधानम् = दुर्गस्थां धनपेटिकाम्। प्राप्तम् = अवाप्तम्। ततः = पश्चात्। हृष्टमनाः = प्रसन्नवदनः। अभ्यागतः = अतिथिः। ताम्रचूडम् = सन्न्यासिनम्। इदम् = एतद्। ऊचे = जगाद। भो-हे! भगवन् = स्वामिन्। इदानीम् = सम्प्रति। निःशङ्कः = चिन्तामुक्तः। स्वपिहि = शेष्व (शयनं कुरु)। एवम् = इत्थम्। उक्त्वा = कथयित्वा। निधानम् = निधिम्। आदाय = गृहीत्वा। द्वावपि = उभौ अपि। मठाभिमुखम् = मन्दिरं प्रति। प्रस्थितौ = प्रस्थानं कृतवन्तौ। अहमपि = हिरण्यकोपि। यावत् = सन्न्यासिद्वयेन तेन। निधानरहितम् = निधिशून्यम्। स्थानम् = दुर्गम्। आगच्छामि = आगतवान्। तावत् = निधानाभावे। अरमणीयम् = रन्तुमयोग्यम्। उद्वेगकारकम् = शोकप्रदम्। तत्स्थानम् तद्दुर्गम्। वीक्षितुमपि = द्रष्टुमपि। न शक्नोमि = असमर्थोऽस्मि। एवम् = इत्थम्। महाकष्टेन = दुःखाधिक्येन। स दिवसः = निधानरहितं तद्दिनम्। व्यतिक्रान्तः = व्यतीतः। अथ = तदनन्तरम्। अस्तमितेऽर्के। = सूर्यास्ते। सोद्वेगः = अप्रसन्नः। निरुत्साहः = उदासीनः। तस्मिन्मठे = तस्मिन्नेव मन्दिरे। सपरिवारः = सपरिजनः। प्रविष्टः = गतः।

अथ = तदनन्तरम्। अस्मत्परिग्रहशब्दम् = मूषक-परिवारपदक्रमणशब्दम्। आकर्ण्य = श्रुत्वा। ताम्रचूडोपि = तन्नामकः सन्न्यासी अपि। भूयः = पुनः। भिक्षापात्रम् = भिक्षाभाजनम्। जर्जरवंशेन = जीर्णवंशेन। ताडयितुं प्रवृत्तः = ताडने रतः। अथ = तदनन्तरम्। असौ = सः। अभ्यागतः = अतिथिः। प्राह = उवाच। सखे = मित्र। किमद्यापि = अधुनाऽपि। निःशङ्कः = शङ्कारहितः। निद्रां न गच्छसि = निद्रां न प्राप्नोषि। स आह = ताम्रचूडः उवाच। भगवन् = स्वामिन्। भूयोऽपि = पुनरपि। सपरिवारः = सपरिजनः। सः = असौ। दुष्टात्मा = दुष्टः। मूषकः = आखुः। समायातः = आगतः। ततः = अनन्तरम्। विहस्य = हसित्वा। अभ्यागतः = अतिथिः। प्राह-उवाच। सखे = मित्र! मा भैषीः = भयं मा कुरु। वित्तेन सह = धनेन साकम्। अस्य = मूषकस्य। कूर्दनोत्साहः = उत्प्लवनसाहसम्। गतः = विनष्टः।

अथ = तदनन्तरम्। अहम् = हिरण्यक:। तच्छ्रुत्वा = तदाकर्ण्य। कोपाविष्ट: = क्रोधयुत:। भिक्षापात्रमुद्दिश्य = भिक्षापात्रं लक्ष्यीकृत्य। विशेषात् = वैशिष्ट्यात्। उत्कूर्दित: = उत्पपात। अप्राप्त: = किन्तु भिक्षापात्रं न आरूढ:। तत्र = तस्मिन्स्थाने। भूमौ = भुवि। निपतित: = आगत:। तद्दृष्ट्वा = तस्य पतनमवलोक्य। असौ = स:। मे = मम। शत्रु: = अरि:, वृहत्स्फिक इत्यर्थ:। विहस्य = हसित्वा। ताम्रचूडम् = सन्न्यासिनम्। उवाच = जगाद। भो = रे रे। पश्य = अवलोकय। कौतूहलम् = आश्चर्योपेतदृश्यम्। तत् = अत:। त्वम् = भवान्। गतशङ्क: = नि:शङ्क:। स्वपिहि = शेष्व (शयनं कुरु)। तच्छ्रुत्वा = तदाकर्ण्य। अहम् = हिरण्यक:। मनसा = चित्तेन। विचिन्तितवान् = विचारयामास। अहो = अरे। मम = मे। एष: = अयम्। शत्रु: = अरि:, वृहत्स्फिक् इत्यर्थ:। सत्यम् = समीचीनम्। आह = कथितवान्। यत: = इदानीम्। अङ्गुलिमात्रम् = अल्पाऽपि। कूर्दनशक्ति: = उत्प्लवनसामर्थ्यम्। नास्ति = न विद्यते। ततश्च = तदनन्तरम्। मद्भृत्या: = मे सेवका:। प्रभाते = प्रात:। गच्छन्त: = व्रजन्त:। मिथ: = परस्परम्। जल्पन्ति = कथयन्ति। अहो = अरे। अयम् = हिरण्यक:। असमर्थ: = शक्तिहीन:। अस्माकम् = न:, मूषकाणाम् इत्यर्थ:। उदरपूरणे = भक्ष्यप्रदाने। तत् = अत:। किमनेनाराधितेन = अस्य शुश्रूषया न कश्चिल्लाभ:? एवम् = इत्थम्। मे = मम। भृत्या: = सेवका:। मम = मे। शत्रूणाम् = अरीणाम्। सेवका: = भृत्या:। जाता: = अभवन्। तावत् = तदा, एकान्ते इत्यर्थ: मया = हिरण्यकेन। चिन्तितम् = विचार: कृत:। अहो = अरे। धिक् = धिक्कृतम्। अर्थहीनस्य = वित्तरहितस्य। पुरुषस्य = मनुष्यस्य। जीवितम् = जीवनम्।

**समास:** – निश्शङ्क: = निर्गता शङ्का यस्मात् स: (बहुव्रीहि:)। सपरिवार: = परिवारेण सह (बहुव्रीहि:)। दुष्टपरिव्राजक: = दुष्ट: च असौ परिव्राजक: (कर्मधारयसमास:)। महाकष्टेन = महान् च असौ कष्ट: तेन (कर्मधारय:)। निरुत्साह: = निर्गत: उत्साह: यस्मात् स: (बहुव्रीहि:)। दुष्टात्मा = दुष्ट: च असौ आत्मा (कर्मधारय:)। उदरपूरणे = उदरस्य पूरणम् उदरपूरणम् तस्मिन् (षष्ठीतत्पुरुष:)। कूर्दनशक्ति: = कूर्दनस्य शक्ति: कूर्दनशक्ति: (षष्ठी-तत्पुरुष:)।

**सन्धि-विच्छेद:** – तन्निधानम् = तद्+निधानम् (अनुनासिक:)। तत्रैव=तत्र+एव (वृद्धिसन्धि:)। विनष्टोऽस्मि = विनष्ट:+अस्मि (उत्वपूर्वरूपे)। सहसोत्पपात = सहसा+उत्पपात (गुण:)। अत्राऽन्तरे = अत्र+अन्तरे (दीर्घ:)। ऊचेऽभ्यागत: = ऊचे+अभ्यागत: (पूर्वरूपम्)। द्वावपि = द्वौ+अपि (अयादि:)। उद्वेग: = उत्+वेग: (जश्त्वम्)। अथाऽसावभ्यागत: = अथ+असौ+अभ्यागत: (दीर्घ: अयादिश्च)। तच्छ्रुत्वा = तद्+श्रुत्वा। (श्चुत्व-चर्त्व-छत्वानि)। शत्रुर्विहस्य = शत्रु:+विहस्य (रुत्वम्)। धिगर्थम् = धिक्+अर्थम् (जश्त्वम्)।

**प्रकृति-प्रत्ययौ**– अन्वेषणस्य = अनु+इष्+ल्युट्। श्रुत्वा = श्रु+क्त्वा। विनष्ट: = वि+नश्+क्त। परित्यज्य = परि+त्यज्+क्त्वा (ल्यप्)। गन्तुम् = गम्+तुमुन्। अवलोक्य = अव+लोक्+क्त्वा (ल्यप्)। प्रवृत्त: = प्र+वृत्+क्त। प्रविष्टा: = प्र+विश्+क्त (जस्)। मूढतया = मूढ+तल्+टा। खनितुम् = खन्+तुमुन्। खनता = खन्+शतृ+टा। निधानम् = नि+धा+ल्युट्। उक्त्वा = वच्+क्त्वा। आदाय = आङ्(आ)+दा+क्त्वा(ल्यप्)। प्रस्थितौ = प्र+स्था+क्त(औ)। विहस्य = वि+हस्+क्त्वा (ल्यप्)। कूर्दनम् = कुर्द्+ल्युट्। उत्साह: = उद्+सह+घाञ्। निपतित: = नि+पत्+क्त। गच्छन्त: = गम्+शतृ(जस्)। जाता: = जन्+क्त (जस्)। जीवितम् = जीव्+क्त।

## अभ्यास-प्रश्ना:

**बहुविकल्पात्मका: प्रश्ना:**

१. ताम्रचूड: आसीत्–

(अ) मूषक: (ब) परिव्राजक:

(स) नृपः (द) मार्जारः।

२. महिलारोप्यस्य समीपे कस्य मठायतनम् आसीत्?

(अ) महादेवस्य (ब) ब्रह्मणः

(स) विष्णोः (द) हनुमतः।

३. मूषकराजस्य नाम आसीत्–

(अ) ताम्रचूडः (ब) महिलारोप्यम्

(स) हिरण्यकः (द) नागदन्तः।

४. 'प्राघुणिकः' इत्यस्य अर्थोऽस्ति–

(अ) सन्न्यासी (ब) जर्जरवंशः

(स) बिडालः (द) अतिथिः।

५. ताम्रचूडस्य मित्रम् आसीत्–

(अ) लघुपतनकः (ब) हिरण्यकः

(स) वृहत्स्फिक् (द) महिलारोप्यम्।

६. ताम्रचूडः भिक्षापात्रं केन ताडयति स्म?

(अ) प्रस्तरेण (ब) जर्जरवंशेन

(स) हस्तेन (द) यष्टिकया।

७. 'निधानस्योपरि तस्य बिलम्' इति कः कथितवान्?

(अ) ताम्रचूडः (ब) वृहत्स्फिक्

(स) हिरण्यकः (द) मूषकः।

८. कस्मात् जातः ऊष्माऽपि देहिनां तेजः वर्धयति।

(अ) वित्तात् (ब) ज्ञानात्

(स) कार्यात् (द) मित्रात्।

९. मार्जारः आसीत्–

(अ) कृशकायः (ब) सुन्दरः

(स) वृहत्कायः (द) मूर्खः।

१०. किमादाय उभौ परिव्राजकौ मठायतनं प्रस्थितौ–

(अ) निधानम् (ब) स्वहस्तिकाम्

(स) भिक्षापात्रम् (द) मूषकम्।

**अतिलघूत्तरात्मकाः प्रश्नाः**

१. महिलारोप्यं नाम नगरं कुत्र अस्ति?

२. ताम्रचूडः किं कृत्वा प्राणयात्रां समाचरति?

३. भिक्षापात्रं कः ताडयति स्म?

४. 'उत्पत्य' इत्यत्र कः प्रत्ययः?

५. तीर्थयात्राप्रसङ्गेन कः समायातः?

६. 'त्वदीयं मठं परित्यज्य यास्यामि।' इति केन कथितः।

७. हिरण्यक: कस्य ऊष्मणा प्रकूर्दते स्म?
८. 'अहो विनष्टोऽस्मि' इति केन चिन्तितम्?
९. मूषकवृन्दमध्ये क उत्पपात?
१०. हिरण्यकस्य कूर्दनोत्साह: केन सह गत:?

**लघूत्तरात्मका: प्रश्ना:**

१. हिरण्यकस्य बान्धवै: किं निवेदितम्?
२. वृहत्स्फिक् निधानं कथं प्राप्तवान्?
३. सन्यासिनो: वार्तां श्रुत्वा हिरण्यकेन किं कृतम्?
४. गोष्ठीशैथिल्यकारणं किमासीत्?
५. 'ऊष्माऽपि वित्तज:.....' इति श्लोकं पूरयत।

**निबन्धात्मक-प्रश्न:**

१. हिरण्यकताम्रचूडकथा सरलभाषया लेख्या।

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

| | | | | |
|---|---|---|---|---|
| १. ब | २. अ | ३. स | ४. द | ५. स |
| ६. ब | ७. ब | ८. अ | ९. स | १०. अ |

# एकादशः पाठः
# स्वर्णहंस-स्वर्णपक्षिराजकथा
(काकोलूकीयतन्त्रतः)

**पाठ-परिचयः** अयं पाठः पं. विष्णुशर्मविरचितस्य पञ्च तन्त्रस्य काकोलूकीयतन्त्राद् उद्धृतोऽस्ति। तन्त्रेऽस्मिन् एका मुख्या कथा सप्तदश उपकथाश्च वर्णिताः सन्ति। अत्र स्वर्णमयानां हंसानां सौवर्णवृहत्पक्षिणः चित्ररथनाम्नः नृपस्य च कथा प्रस्तुताऽस्ति। कदाचिद् एकः ब्राह्मणः एकस्मै सर्पाय प्रतिदिनं दुग्धं ददाति, तस्मात् सर्पाद् एकैकं दीनारं गृह्णाति। एकदा क्षीरं नयनाय पुत्रं निरूप्य सः ग्रामान्तरम् अगच्छत्। पुत्रः क्षीरं दत्त्वा दीनारं प्राप्नोति। तदा सः चिन्तितवान् – एनं सर्पं हत्वा सर्वमेकवारं ग्रहीष्यामि। तेन सः सर्पो हतः। द्वितीयदिने तस्य पिता समायातः, सर्पस्य विनाशकारणं श्रुत्वा पुत्रमेव सः पुत्रमेव निन्दितवान्। अस्मिन् एवावसरे सः ब्राह्मणः पुरुषेभ्यः इमां स्वर्णहंस-स्वर्णपक्षिराजकथां श्रावितवान्।

**अस्ति कस्मिंश्चदधिष्ठाने चित्ररथो नाम राजा। तस्य योधैः सुरक्ष्यमाणं पद्मसरो नाम सरस्तिष्ठति। तत्र च प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति। षण्मासे-षण्मासे पिच्छमेकैकं परित्यजन्ति।**

**अथ तत्र सरसि सौवर्णो बृहत्पक्षी समायातः। तैश्चोक्तः -अस्माकं मध्ये त्वया न वस्तव्यम्। येन कारणेनास्माभिः षण्मासान्ते पिच्छैकदानं कृत्वा गृहीतमेतत्सरः। एवञ्च किं बहुना, परस्परं द्वैधमुत्पन्नम्। स च राज्ञः शरणं गतोऽब्रवीत्-'देव! एते पक्षिण एवं वदन्ति, यद्-'अस्माकं राजा किं करिष्यति।' न कस्याऽप्यावासं दद्मः।' मया चोक्तं-'न शोभनं युष्माभिरभिहितम्। अहं गत्वा राज्ञे निवेदयिष्यामि। एवं स्थिते देवः प्रमाणम्।**

**व्याख्या**- कस्मिंश्चित् = एकस्मिन्। अधिष्ठाने = नगरे। चित्ररथो नाम = एतन्नामकः। राजा = नृपः। अस्ति = राज्यं करोति स्म इत्यर्थः। तस्य = चित्ररथस्य। योधैः = भटैः, सैनिकैः वा। सुरक्ष्यमाणम् = विघ्नैः त्रायमाणम्। पद्मसरो नाम = एतदभिधानम्। सरः = जलाशयः। तिष्ठति = विद्यते। तत्र च = तडागे। प्रभूताः = बहवः। जाम्बूनदमयाः = स्वर्णमयाः। हंसाः = मरालाः, पक्षिविशेषाः। तिष्ठन्ति = निवसन्ति स्म। षण्मासे-षण्मासे = प्रत्येकं षष्ठे मासे। एकैकम् = एकम् एकम्। पिच्छम् = स्वर्णपक्षम्। परित्यजन्ति = पातयन्ति।

अथ = तदनन्तरम्। तत्र = तस्मिन्। सरसि = तडागे। सौवर्णः = स्वर्णमयः। वृहत्पक्षी = विशालकायः खगः। समायातः = आगतवान्। तैः = हंसैः। च। उक्तः = कथितः। अस्माकं मध्ये = हंसानां समीपे अर्थाद् अस्मिन् तडागे। त्वया = भवता। न वस्तव्यम् = निवासो न कर्त्तव्यः। येन कारणेन = येन हेतुना। अस्माभिः = हंसैः। षण्मासान्ते = षण्मासावधेः पश्चात्। पिच्छैकदानम् = पक्षैकार्पणम्। कृत्वा = विधाय। एतत्सरः = इदं सरः। गृहीतम् = शुल्केन प्राप्तम्। एवञ्च = इत्थम्। किं बहुना = अतिशयेन कथनेन किम्। परस्परम् = मिथः। द्वैधम् = विरोधः। उत्पन्नम् = जातम्। स च = वृहत्पक्षी च। राज्ञः = नृपस्य। शरणम् = आश्रयम्। गतः = यातः। अब्रवीत् = अकथयत्। देव! = स्वामिन्। एते पक्षिणः = अमी खगाः। एवम् = इत्थम्। वदन्ति = कथयन्ति। यत्। अस्माकम् = नः, हंसानां वा इत्यर्थः। राजा = नृपः। किम् = कथम्। करिष्यति = विधास्यति।। कस्याऽपि = कस्मै अपि। आवासम् = निवासस्थानम्। न दद्मः = न यच्छामः। मया च = वृहत्खगेन। उक्तम् = कथितम्। युष्माभिः = भवद्भिः। शोभनम् = समीचीनम्। न = नहि। अभिहितम् = कथितम्। अहम् = वृहत्पक्षी। गत्वा = यात्वा। राज्ञे = नृपाय। निवेदयिष्यामि = कथयिष्यामि। एवं = इत्थम्। स्थिते = दशायाम्। देवः = भवान्। प्रमाणम् = निर्णेता।

**समासः**- वृहत्पक्षी = वृहत् चाऽसौ पक्षी (कर्मधारयः)। षण्मासे = षष्ठः मासः षण्मासः तस्मिन्, (कर्मधारयः) वृत्तिविषये सङ्ख्यावाचकशब्दस्य पूरणार्थत्वम्।

**सन्धि-विच्छेदः** – सरस्तिष्ठति = सरः+तिष्ठति (सत्वसन्धिः)। एवञ्च = एवम्+च (अनुस्वारपरसवर्णः)। एकैकम् = एक+एकम् (वृद्धिः)। चोक्तम् = च+उक्तम् (गुणः)। पद्मसरो नाम = पद्मसरः+नाम (उत्वसन्धिः)।

कारणेनाऽस्माभि: = कारणेन + अस्माभि: (दीर्घ:)।

**प्रकृति-प्रत्ययौ**-अधिष्ठाने = अधि+स्था+ल्युट् (ङि)। सुरक्ष्यमाणम् = सु+रक्ष्+यक्+शानच्। जाम्बूनदमया: = जाम्बूनद+मयट् (जस्)। सौवर्ण: = सुवर्ण+अण्।। वस्तव्यम् = वस्+तव्यत्। समायात: = सम्+आ+या+क्त। उक्त: = वच्+क्त। अभिहितम् = अभि+धा+क्त। उत्पन्नम् = उद्+पद्+क्त। शरणम् = शृ+ल्युट्। द्वैधम् = द्विधा+अण्। प्रमाणम् = प्र+मा+ल्युट्।

**ततो राजा भृत्यानब्रवीत्-'भो भो! गच्छत। सर्वान् पक्षिणः गतासून् कृत्वा शीघ्रमानयत।' राजादेशानन्तरमेव प्रचेलुस्ते।**

**अथ लगुडहस्तान्राजपुरुषान् दृष्ट्वा तत्र एकेन पक्षिणा वृद्धेनोक्तम्-'भोः स्वजनाः। न शोभनमापतितम्। ततः सर्वैः एकमतीभूय शीघ्रमुत्पतितव्यम्। तैश्च तथाऽनुष्ठितम्।**

**व्याख्या**-तत: = तदनन्तरम्। राजा = नृपति:। भृत्यान् = सेवकान्। अब्रवीत् = उक्तवान्। भो भो: = रे रे। गच्छत = व्रजत। सर्वान् = सकलान् पक्षिण: = खगान्, हंसान् इत्यर्थ:। गतासून् = प्राणरहितान्। कृत्वा = विधाय। शीघ्रम् = त्वरितम्। आनयत = आहरत। ते = भटा:। राजादेशानन्तरम् एव = नृपस्य आज्ञां प्राप्य। प्रचेलु: = प्रस्थिता:।

अथ = तदनन्तरम्। लगुडहस्तान् = दण्डकरान्, दण्ड: करे येषां ते दण्डकरा: तान् इति। पुरुषान् = सैनिकान्। दृष्ट्वा = विलोक्य। तत्र = तेषु। एकेन = एकसंख्यकेन। वृद्धेन = वार्धक्यसहितेन। पक्षिणा = खगेन, हंसेन वा इत्यर्थ:। उक्तम् = कथितम्। भो: स्वजना: = रे बान्धवा:। न शोभनम् = अशुभम्। आपतितम् = जातम्। तत: = वृद्धहंसस्य कथनानन्तरम्। सर्वै: = सकलै:। एकमतीभूय = एकमतमवलम्ब्य। शीघ्रम् = त्वरितम्। उत्पतितव्यम् = उड्डयनीयम्। तै: च = हंसैश्च। तथा = तेन प्रकारेण एकमतीभूय। अनुष्ठितम् = उत्पतितम्।

**समास:** - गतासून् = गता: असव: येषां ते गतासव: तान् (बहुव्रीहि:)। लगुडहस्तान् = लगुडं हस्ते येषां ते लगुडहस्ता: तान् (बहुव्रीहि:)। राजपुरुषान् = राज्ञ: पुरुषान् (षष्ठी-तत्पुरुष:)। स्वजना: = स्वस्य जना: (षष्ठी-तत्पुरुष:)।

**सन्धि-विच्छेद:** - प्रचेलुस्ते = प्रचेलु:+ते (सत्वसंधि:)। राजादेशान्तरम् = राज+आदेश+अनन्तरम् (दीर्घ:)। वृद्धेनोक्तम् = वृद्धेन+उक्तम्(गुण:)। सर्वैरेकमतीभूय = सर्वै:+एकमतीभूय (रुत्वसन्धि:)। तैश्च = तै:+च (सत्वश्चुत्वे)। तथाऽनुष्ठितम् = तथा+अनुष्ठितम् (दीर्घ:)।

**प्रकृति-प्रत्ययौ**- कृत्वा = कृ+क्त्वा। दृष्ट्वा = दृश्+क्त्वा। उक्तम् = वच्+क्त। वृद्धेन = वृध्+ क्त(टा)। आपतितम् = आङ्+पत्+क्त। उत्पतितव्यम् = उद्+पत्+तव्यत्। तथा = तद्+थाल्। अनुष्ठितम् = अनु+स्था+क्त। **अत एव उच्यते-**

**भूतान् यो नाऽनुगृह्णाति ह्यात्मनः शरणागतान्।**
**भूताऽर्थास्तस्य नश्यन्ति, हंसाः पद्मवने यथा।**

**प्रसङ्गः** - 'सहसा विदधीत न क्रियाम्' इति समर्थयन् कथाकार: प्राह-आत्मन: शरणागता: प्राणिन: रक्षणीया:।

**पदच्छेदः** - भूतान् य: न अनुगृह्णाति, हि आत्मन: शरणागतान्। भूता+अर्था: तस्य नश्यन्ति, हंसा: पद्मवने यथा।

**अन्वय:** - य: आत्मन: शरणागतान् भूतान् न अनुगृह्णाति, तस्य भूताऽर्था: पद्मवने हंसा यथा नश्यन्ति हि।

**व्याख्या**- य: = जन:। आत्मन: = स्वस्य। शरणागतान् = आश्रयप्राप्तान्। भूतान् = प्राणिन:। न अनुगृह्णाति = न दयते। तस्य = पूर्वोक्तस्य जनस्य। भूताऽर्था: = निश्चितार्था:। पद्मवने = पद्मसरोवरे हंसा यथा = मराला इव। नश्यन्ति हि = नाशं प्राप्नुवन्त्येव।

**व्याकरणम्**- शरणागतान् = शरणम् आगतान् (द्वितीया-तत्पुरुष:)। भूताऽर्था: = भूताश्च ते अर्था: (कर्मधारय:)। पद्मवने = पद्मानां वने (षष्ठी-तत्पुरुष:)। नानुगृह्णाति = न+अनुगृह्णाति (दीर्घ:)। ह्यात्मन:=हि+आत्मन: (यण्-संधि:)। अर्थास्तस्य = अर्था: + तस्य (विसर्ग -सत्वसंधि:)। शरणागतान् = शरण+आगतान् (दीर्घ:)। भूतान् = भू+क्त (शस्)। शरणम् = शृ+ल्युट्। आगतान् = आ+गम्+क्त(शस्)।

**सरलार्थ:** - यो: जन: स्वस्य शरणागतान् प्राणिन: न दयते, तस्य सिद्धानि अपि कार्याणि विनाशं प्राप्नुवन्ति

यथा नृपः स्वर्णहंसान् न रक्षितवान्। तेन हंसाः पद्मसरः परित्यज्य अन्यत्र गताः, सुवर्णपक्षस्य यत्प्रापणं भवति स्म, तदपि विनष्टम्।

**छन्दः** – अनुष्टुप्–वृत्तम्।

## अभ्यास–प्रश्नाः

### बहुविकल्पात्मकप्रश्नाः

१. 'स्वर्णहंसकथा' पञ्चतन्त्रस्य कस्मात् तन्त्रतः उद्धृता–

(अ) मित्रभेदतः (ब) अपरीक्षितकारकात्

(स) काकोलूकीयात् (द) लब्धप्रणाशतः

२. राज्ञः नाम आसीत्–

(अ) चित्ररथः (ब) स्वर्णहंसः

(स) देवव्रतः (द) देवदत्तः

३. पद्मसरो नाम आसीत्–

(अ) नृपस्य (ब) हंसस्य

(स) तडागस्य (द) नगरस्य

४. स्वर्णहंसाः पिच्छमेकैकं परित्यजन्ति स्म–

(अ) षण्मासे (ब) पञ्चमासे

(स) सप्तमासे (द) अष्टमासे

५. 'एकैकम्' इत्यत्र सन्धिरस्ति–

(अ) गुणः (ब) यण्

(स) अयादिः (द) वृद्धिः

६. राजादेशानन्तरमेव प्रचेलुः –

(अ) स्वर्णहंसाः (ब) सैनिकाः

(स) वृहत्पक्षी (द) पौराः

७. 'शरणम्' इत्यत्र प्रत्ययः अस्ति –

(अ) क्त (ब) तृच्

(स) ल्युट् (द) अनीयर्

८. 'भो भो ! गच्छत।' केन उक्तम् –

(अ) नृपेण (ब) वृहत्पक्षिणा

(स) स्वर्णहंसैः (द) ईश्वरेण

### अतिलघूत्तरात्मकप्रश्नाः

१. लगुडहस्ताः के आसन्?

२. 'एवं स्थिते देवः प्रमाणम्' इति केन उक्तम्?

३. वृहत्पक्षी कीदृश आसीत्?

४. केषां मध्ये द्वैधम् उत्पन्नम्?

५. 'जाम्बूनदमया:' इत्यस्य कोऽर्थ:?
६. वृद्धेन पक्षिणा किम् उक्तम्?
७. कस्य भूतार्था: नश्यन्ति?
८. 'चोक्तम्' इत्यस्य क: सन्धिविच्छेद:?

**लघूत्तरात्मकप्रश्ना:**

१. पद्मसर: कीदृशम् आसीत्?
२. स्वर्णहंसा: वृहत्पक्षिणं किम् उक्तवन्त:?
३. वृहत्पक्षी राज्ञ: शरणं गत्वा किम् अब्रवीत्?
४. राजपुरुषान् दृष्ट्वा वृद्धपक्षिणा किम् उक्तम्?
५. राजा भृत्यान् किम् अब्रवीत्?

**निबन्धात्मक-प्रश्न:**

१. 'स्वर्णहंसकथा' सरलसंस्कृतगिरा लेख्या।

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

| | | | |
|---|---|---|---|
| १.स | २.अ | ३.स | ४.अ |
| ५.द | ६.ब | ७.स | ८.अ |

# द्वादशः पाठः

## सिंहशिशुश्रृगालपुत्रकथा

(पञ्चतन्त्रस्य लब्धप्रणाशतः)

**पाठ-परिचयः** अयं पाठः पं. विष्णुशर्मविरचितस्य पञ्च तन्त्रस्य लब्धप्रणाशतन्त्राद् उद्धृतोऽस्ति। अस्मिन् तन्त्रे एका मुख्या कथा एकादश उपकथाश्च वर्णिताः सन्ति। अत्र सिंह्याः पुत्रद्वयस्य श्रृगालसुतस्य च कथा चित्रिताऽस्ति। कदाचित्एः क:कु लाल:क मपिन ृपं: वपराक्रममअ वदत् ।न ृप:क थयति-त वंस र्वगुणसम्पन्न:त थापिग म्यताम्। अस्मिन्नवसरे नृपः तस्मै कुलालाय इमां सिंहशिशु-श्रृगालशिशुकथां श्रावितवान्।

**कस्मिंचिदुद्देशे सिंहदम्पती प्रतिवसतः स्म। अथ सिंही पुत्रद्वयम् अजीजनत्। सिंहो नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति। अथाऽन्यस्मिन्नहनि तेन किमपि नासादितम्। वने भ्रमतोऽपि रविरस्तं गतः। अथ तेन स्वगृहमागच्छता श्रृगालशिशुः प्राप्तः। सिंहश्च 'बालकोऽयम्' इति अवधार्य दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमेव समर्पितवान्। ततः सिंह्या अभिहितम्-'भोः कान्त! त्वया आनीतं किञ्चित् अस्माकं भोजनम्। सिंह आह-'प्रिये! मया अद्य एनं श्रृगालशिशुं परित्यज्य न किञ्चित् सत्त्वम् आसादितम्। स च बालोऽयमिति मत्वा न व्यापादितः, विशेषात् स्वजातीयश्च।**

**व्याख्या**-क स्मिंचित्=एकस्मिन् !उ द्देशे = वनप्रदेशे ।ि संहदम्पती =म ृगेन्द्रमिथुनम् ।प्रतिवसत:स् म = न्यवसताम्। अथ = एकदा इत्यर्थे प्रयुक्तम्। सिंही = केसरिणी। पुत्रद्वयम् = द्वौ वत्सौ। अजीजनत् = जनयामास। सिंहः = केसरी। नित्यमेव = प्रतिदिनमेव। मृगान् = हरिणान्। व्यापाद्य = हत्वा। सिंह्यै = केसरिण्यै। ददाति = यच्छति। अथान्यस्मिन्नहनि = एकस्मिन् दिने। तेन = सिंहेन। किमपि = किञ्चिदपि। नासादितम् = न प्राप्तम्। वने = अरण्ये। भ्रमतोऽपि विचरतोपि। तस्य = सिंहस्य। रविः = सूर्यः। अस्तंगतः = अस्तं जातः। अथ = तदनन्तरम्। तेन = सिंहेन। स्वगृहम् = निजगुहाम्। आगच्छता = आगमनं कुर्वता। श्रृगालशिशुः = गोमायुशावकः। प्राप्तः = आसादितः। सिंहश्च = मृगेन्द्रः। 'बालकोयम् = एषः शिशुः। इति = इदम्। अवधार्य = विचार्य। यत्नेन = प्रयत्नपूर्वकम्। दंष्ट्रामध्यगतम् = दीर्घदन्तमध्ये स्थापितम्। कृत्वा = विधाय। सिंह्यै = केसरिण्यै। जीवन्तमेव = जीवितमेव। समर्पितवान् = प्रदत्तवान्। ततः = तदनन्तरम्। सिंह्या = केसरिण्या। अभिहितम् = कथितम्। भोः कान्त! = हे स्वामिन्। त्वया = भवता। किञ्चित् = किमपि। अस्माकम् = मम, सिंह्याः = कृते इत्यर्थः। भोजनम् = आहारः। आनीतम् = गृहीतम्। सिंहः = मृगेन्द्रः। आह = उवाच। प्रिये = मनोज्ञे। मया = सिंहेन। अथ = अस्मिन् दिने। एनम् = इमम्। श्रृगालशिशुम् = गोमायुशावकम्। परित्यज्य = त्यक्त्वा। न किञ्चित्सत्त्वम् = न किमपि। आसादितम् = प्राप्तम्। स च = असौ च। मया = सिंहेन। बालोऽयम् = एषः शिशुः। इति मत्वा = इदं ज्ञात्वा। न = नहि। व्यापादितः = हतः। विशेषात् = पुनश्च। स्वजातीयः च = मांसभक्षकः।

**समासः** - सिंहदम्पती = सिंही च सिंहः च सिंहौ, सिंहौ एव दम्पती सिंहदम्पती (एकशेषगर्भकर्मधारयः)। दम्पती = जाया च पतिः च दम्पती जायाशब्दस्य दमादेशात् (इतरेतरद्वन्द्वः)। पुत्रद्वयम् = पुत्रस्य, द्वयम् (षष्ठीतत्पुरुषः)। स्वगृहम् = स्वस्य गृहम् (षष्ठी-तत्पुरुषः)। श्रृगालशिशुः = श्रृगालस्य शिशुः (षष्ठी-तत्पुरुषः)।

**सन्धि-विच्छेदः**- सिंहोऽपि = सिंहः+अपि (उत्वपूर्वरूपे)। नाऽऽसादितम् = न+आसादितम् (दीर्घसन्धिः)। रविरस्तम् = रविः+अस्तम् (विसर्ग-रुत्वसन्धिः)। किञ्चिदस्माकम् = किञ्चित्+अस्माकम् (जश्त्वम्)। स्वजातीयश्च=स्वजातीयः+च (सत्वश्चुत्वे।)।

**प्रकृति-प्रत्ययौ**- व्यापाद्य = वि+आ+पद्+णिच्+क्त्वा(ल्यप्)। आसादितम् = आ+सद्+णिच्+क्त। भ्रमतः = भ्रम्+शतृ(ङस्)। गतः = गम्+क्त। आगच्छता = आ+गम्+शतृ(टा)। अवधार्य = अव+धृ+ णिच्+क्त्वा(ल्यप्)।

यत्नेन = यत्+नङ्(टा)। जीवन्तम् = जीव्+शतृ+(अम्)। अभिहितम् = अभि+धा+क्त। आनीतम् = आ+नी+क्त। भोजनम् = भुज्+ल्युट्। परित्यज्य = परि+त्यज्+क्त्वा (ल्यप्)।

**इदानीं त्वमेनं भक्षयित्वा पथ्यं कुरु। प्रभाते अन्यत्किञ्चिदुपार्जयिष्यामि। सा प्राह-' भोः कान्त! त्वया' बालकोऽयमिति विचिन्त्य न हतः, तत्कथमेनमहं स्वोदरार्थे विनाशयामि?।**

**व्याख्या**- इदानीम् = अस्मिन् समये। त्वम् = भवती, सिंही इत्यर्थः। एतम् = शृगालशिशुम्। भक्षयित्वा = खादित्वा। पथ्यम् = भोजनम्। कुरु = विधेहि। प्रभाते = प्रातः। अन्यत् = अपरम्! किञ्चित् = किमपि पथ्यम्। उपार्जयिष्यामि = आनेष्यामि। सा = असौ, सिंही। प्राह = उवाच।-' भोः कान्त! = हे प्रिय! त्वया = भवता। बालकोऽयम् = एषः शिशुः। इति = इदम्। विचिन्त्य = विचार्य। न हतः = न मारितः। तत् = तर्हि। कथम् = केन प्रकारेण। एनम् = इमम्। अहम् = सिंही। स्वोदरार्थे = उदरपूर्त्यर्थम्। विनाशयामि = हनिष्यामि।

**समासः** - स्वोदरार्थे = उदराय इदम् उदरार्थम् स्वस्य उदरार्थम् = स्वोदरार्थम् तस्मिन् (चतुर्थी-षष्ठी तत्पुरुषौ)।

**सन्धि-विच्छेदः** - किञ्चिदुपार्जयिष्यामि = किञ्चित्+उपार्जयिष्यामि(जश्त्वम्)। प्राह = प्र+आह (दीर्घः)। स्वोदरार्थे = स्व+उदर+अर्थे (गुणदीर्घौ)।

**प्रकृति-प्रत्ययौ**- भक्षयित्वा = भक्ष्+क्त्वा। विचिन्त्य = वि+चिन्त्+क्त्वा (ल्यप्)। हतः = हन्+क्त।

**यथोक्तम्**-

**अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽप्युपस्थिते।**
**न च कृत्यं परित्याज्यमेष धर्मः सनातनः।।**

**प्रसङ्गः** - पद्येऽस्मिन् कथाकारेण सनातनधर्मस्य वैशिष्ट्यं निरूपितम्।

**पदच्छेदः** - अकृत्यम् न एव कर्त्तव्यम् प्राणत्यागे अपि उपस्थिते। न च कृत्यम् परित्याज्यम् एषः धर्मः सनातनः।

**अन्वयः** - प्राणत्यागे उपस्थिते अपि अकृत्यं नैव कर्त्तव्यं कृत्यं च न परित्याज्यम्। एषः सनातनः धर्मः (अस्ति)।

**व्याख्या**- प्राणत्यागे = प्राणसंशये इत्यर्थः। उपस्थिते अपि सञ्जातेऽपि। अकृत्यम् = अकरणीयम्। नैव = न। कर्त्तव्यम् = विधातव्यम्। कृत्यम् = करणीयम्। च। न परित्याज्यम् = न हातव्यम्। एषः = अयम्। सनातनः = नित्यः। धर्मः = सुविचारः, पुण्यं वा इत्यर्थः।

**व्याकरणम्**- अकृत्यम् = न कृत्यम् (नञ्-तत्पुरुषः)। प्राणत्यागे = प्राणानां त्यागः तस्मिन् (षष्ठी तत्पुरुषः)। नैव = न+एव (वृद्धिः)। प्राणत्यागेऽप्युपस्थिते = प्राणत्यागे+अपि+उपस्थिते (पूर्वरूपं यण् च)। कर्त्तव्यम् = कृ+तव्यत्। त्यागः = त्यज्+घञ्। उपस्थिते = उप+स्था+क्त(ङि)। कृत्यम् = कृ+क्यप् (तुगागमश्च)। परित्याज्यम् = परि+त्यज्+ण्यत्।

**सरलार्थः** - अनुचितं कर्म कदापि न करणीयम्। यदुचितं कर्म स्यात् तत् प्राणसंशये सञ्जातेऽपि न त्याज्यम् अर्थात् करणीयमेव। एतत् सनातनधर्मस्य वैशिष्ट्यम्।

**छन्दः** - अनुष्टुप्।

**तस्मान्ममाऽयं तृतीयः पुत्रो भविष्यति।'- इत्येवमुक्त्वा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत्। एवं ते त्रयोऽपि शिशवः परस्परमजातजातिविशेषा एकाचारविचारा बाल्यसमयं निर्वाहयन्ति स्म।**

**अथ कदाचित् तत्र वने भ्रमन्नरण्यगजः समायातः। तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत्तेन शृगालपुत्रेणात्राभिहितम्-' अहो गजोऽयं युष्मत्कुलशत्रुः। तन्न गन्तव्यमेतस्याऽभिमुखम्।' एवमुक्त्वा असौ गृहं प्रधावितः। तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ।**

**व्याख्या**– तस्मात् = तस्मात् कारणात्। अयम् = एषः। मम = मे। तृतीयःपुत्रः = तृतीयसंख्याकः सुतः। भविष्यति = वर्तिष्यते। इत्येवम् = इत्थम्। उक्त्वा = कथयित्वा। तमपि = शृगालशिशुमपि। स्वस्तनक्षीरेण = निजस्तनदुग्धेन। पराम् = महतीम्। पुष्टिम् = पोषणताम्। अनयत् = प्रापितम्। एवम् = इत्थम्। ते त्रयोऽपि = एते त्रिसंख्याकाः। शिशवः = वत्साः। परस्परम् = मिथः।' अज्ञातजातिविशेषाः = अविदितस्वगात्रपरिचयाः। एकाचारविहाराः = समानाचरणशीलाः। बालसमयम् = बाल्यकालम्। निर्वाहयन्ति स्म = यापयन्ति स्म।

अथ = अनन्तरम्। कदाचित् = कस्मिंश्चित्काले। तत्र = तस्मिन्। वने = अरण्ये। भ्रमन् = अटन्। अरण्यगजः = वनहस्ती। समायातः = आगतः। तम् = गजम्। दृष्ट्वा = अवलोक्य। तौ = अमू। सिंहसुतौ = केसरिपुत्रौ। द्वावपि = उभावपि। कुपिताननौ = क्रुद्धमुखौ। तं प्रति = गजं प्रति। प्रचलितौ यावत् = गन्तुम् तत्परौ अभूताम्। तावत् = तस्मिन्नेव काले। तेन = अमुना। शृगालसुतेन = गोमायुशिशुना। अभिहितम् = कथितम्। अहो = अरे। अयम् = एषः। गजः = हस्ती। युष्मत्कुलशत्रुः = भवतोः कुलस्य अरिः। तत् = अतः। एतस्य = गजस्य। अभिमुखम् = सम्मुखम्। न गन्तव्यम् = न चलितव्यम्। एवम् = इत्थम्। उक्त्वा = कथयित्वा। असौ = सः। गृहम् = आवासम्। प्रधावितः = तीव्रं चलितः। तावपि = सिंहसुतौ अपि। ज्येष्ठबान्धवभङ्गात् = शृगालसुतस्य पलायनात्। निरुत्साहताम् = भग्नोत्साहत्वम्। गतौ = प्राप्तौ।

**समासः** – स्वस्तनक्षीरेण = स्तनस्य क्षीरं स्तनक्षीरं स्वस्य स्तनक्षीरं तेन (षष्ठीतत्पुरुषः)। एकाचारविहाराः = एक एव आचारो विहारश्च येषां ते (बहुव्रीहिः)। अरण्यगजः = अरण्यस्य गजः (षष्ठीतत्पुरुषः)। सिंहसुतौ = सिंहस्य सुतौ (षष्ठीतत्पुरुषः) कुपिताननौ = कुपितम् आननं यस्य स कुपिताननः तौ (बहुव्रीहिः)। ज्येष्ठबान्धवभङ्गात् = ज्येष्ठः चाऽसौ बान्धवः ज्येष्ठबान्धवः तस्य भङ्गात् (कर्मधारयगर्भषष्ठीतत्पुरुषः)।

**सन्धिविच्छेदः** – तस्मान्ममाऽयम् = तस्मात्+मम+अयम् (अनुनासिकदीर्घौ)। इत्थमेव = इति+एवम् (यण्)। त्रयोऽपि = त्रयः +अपि (उत्वपूर्वरूपे)। भ्रमन्नरण्यगजः = भ्रमन्+अरण्यगजः (ङमुडागमः)। द्वावपि = द्वौ+अपि (अयादिसन्धिः)। तन्न = तद्+न (अनुनासिकम्)। भङ्गन्निरुत्साहताम् = भङ्गात्+निरुत्साहताम् (अनुनासिकः)।

**प्रकृतिप्रत्ययौ**– उक्त्वा = वच्+क्त्वा। पुष्टिम् = पुष्+क्तिन् (अम्)। भ्रमन् = भ्रम्+शतृ। दृष्ट्वा = दृश्+क्त्वा। प्रचलितौ = प्र+चल्+क्त (औ)। अभिहितम् = अभि+धा+क्त। गन्तव्यः = गम्+तव्यत्। प्रधावितः = प्र+धाव्+क्त।

यथोक्तम्–

**एकेनापि सुधीरेण सोत्साहेन रणं प्रति।**
**सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात्।।**

**प्रसङ्गः** – उत्साहिनो वीरस्य महत्त्वमत्र प्रतिपादितम्।

**पदच्छेदः** – एकेन अपि सुधीरेण सोत्साहेन रणम् प्रति। सोत्साहम् जायते सैन्यम् भङ्गे भङ्गम् अवाप्नुयात्।

**अन्वयः** – एकेनापि सुधीरेण सोत्साहेन सैन्यं रणं प्रति सोत्साहं जायते। भङ्गे भङ्गम् अवाप्नुयात्।

**व्याख्या**– एकेनापि = एकसंख्यकेनापि। सुधीरेण = धैर्यशालिना। सोत्साहेन = उत्साहयुक्तेन। सैन्यम् = सेनासमूहः। रणं प्रति = युद्धं प्रति। सोत्साहम् = उत्साहान्वितम्। जायते = भवति। भग्ने = हतोत्साहे। भङ्गम् = निरुत्साहत्वम्। अवाप्नुयात् = प्राप्नुयात्।

**व्याकरणम्**– सोत्साहेन = उत्साहेन सह सोत्साहः तेन (बहुव्रीहिः)। एकेनापि = एकेन+अपि (दीर्घः)। सोत्साहम् = स+उत्साहम् (गुणः)। उत्साहः = उद्+सह+घञ्। सैन्यम् = सेना+ष्यञ्। भग्नः = भञ्ज्+क्त।

**सरलार्थः** – युद्धस्थले यदि एकोऽपि धैर्यशाली सोत्साहः सेनानायकः स्यात् तर्हि सेनायामुत्साहः वर्धते। हतोत्साहेन एकेन सेनानायकेन सेनाऽपि निरुत्साहत्वं प्राप्नोति।

**छन्दः** – अनुष्टुप्।

**अथ तौ द्वावपि भ्रातरौ गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुः यथा–'गजं दृष्ट्वा**

**दूरतोऽपि प्रनष्टः।' सोऽपि तदाकर्ण्य कोपाविष्टमनाः प्रस्फुटिताऽधरपल्लवस्ताम्रलोचनः त्रिशिखां भृकुटिं कृत्वा तौ निर्भर्त्सयन् परुषतरवचनान्युवाच।**

**ततः सिंह्या एकान्ते नीत्वा प्रबोधितोऽसौ-वत्स मैव कदाचित् जल्प। भवदीयलघुभ्रातरावेतौ इति। अथाऽसौ प्रभूतकोपाविष्टः तामुवाच-किमहम् एताभ्यां शौर्येण, रूपेण; विद्याभ्यासेन, कौशलेन वा हीनः, येन माम् उपहसतः? तन्मयाऽवश्यमेतौ व्यापादनीयौ।' तदाकर्ण्य सिंही अन्तर्विहस्य प्राह-सम्यक् शृणु, वत्स! 'त्वं शृगालीसुतः। कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः। तद्यावदेतौ मत्पुत्रौ शिशुत्वात्, त्वां शृगालं न जानीतः, तावद् द्रुततरं गत्वा स्वजातीयानां मध्ये मिलितो भव। नो चेत् आभ्यां हतो मृत्युपथं समेष्यसि।' सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः।**

**व्याख्या**– अथ = तदनन्तरम्। तौ = अमू। द्वावपि = उभावपि। भ्रातरौ = सिंहशिशू। गृहम् = गेहम्। प्राप्य = गत्वा। पित्रोः = जननीजनकयोः। अग्रतः = सम्मुखम्। विहसन्तौ = उपहासं कुर्वन्तौ। ज्येष्ठभ्रातृचेष्टितम् = शृगालसुतस्य कातरतावृतान्तम्। ऊचतुः = आहतुः। यथा–गजम् = द्विपम्। दृष्ट्वा = विलोक्य। दूरतोऽपि = दूरे। प्रनष्टः = प्रधावितः।' सोऽपि = शृगालसुतोऽपि। कोपाविष्टमनाः = क्रोधाभिभूतचेताः। प्रस्फुरिताधरपल्लवः = कोपप्रकम्पिताधरोष्ठः। ताम्रलोचनः = रक्तनयनः। त्रिशिखाम् = त्रिवक्राम्। भ्रुकुटिं कृत्वा = भ्रूभङ्गीं विधाय। तौ = उभौ। निर्भर्त्सयन् = निन्दनं कुर्वन्। परुषतरवचनानि = कठोरवचनानि। उवाच = जगाद।

ततः = तदनन्तरम्। सिंह्या = केसरिण्या। एकान्ते नीत्वा = शून्ये गृहीत्वा। असौ = सः, शृगालसुतः। प्रबोधितः = ज्ञापितः। वत्स = पुत्र कदाचित् = कदापि। एव = अनेन प्रकारेण। मा जल्प = न कथय। एतौ = इमौ। भवदीयलघुभ्रातरौ = त्वदीयकनिष्ठभ्रातरौ।इ ति।अ थ = सिंह्याःक थनंश्रु त्वा।अ सौ = शृगालसुतः।प्र भूतकोपाविष्टः = अतिशयेन क्रोधाभिभूतः। ताम् = सिंहीम्। उवाच = जगाद। किम् = प्रश्ने। अहम् = शृगालसुतः। एताभ्याम् = आभ्याम्। शौर्येण = पराक्रमेण। रूपेण = सौन्दर्येण। विद्याभ्यासेन = विद्वत्तया। कौशलेन = चातुर्येण। वा = अथवा। हीनः = न्यूनोऽस्मि। येन = येन कारणेन। माम् = शृगालसुतम्। उपहसतः = उपहासं कुरुतः। तत् = अतः। मया = शृगालसुतेन। एतौ = इमौ। अवश्यम् = निश्चयेन। व्यापादनीयौ = हन्तव्यौ।' तदाकर्ण्य = तच्छ्रुत्वा। सिंही = केसरिणी। अन्तर्विहस्य = मनसि हसित्वा। प्राह = उवाच। सम्यक् = सुष्ठुप्रकारेण। शृणु = श्रवणं कुरु। वत्स = पुत्र। त्वम् = भवान्। शृगालीसुतः = क्रोष्टीपुत्रः। कृपया = दयया। मया = सिंह्या। स्वस्तनक्षीरेण = निजस्तनदुग्धेन। पुष्टिं नीतः = पोषणतां प्राप्तः। तद्यावत् = यावत्कालपर्यन्तम्। एतौ = इमौ। मत्पुत्रौ = मम शावकौ। शिशुत्वात् = बाल्यात्। त्वाम् = भवन्तम्। शृगालम् = गोमायुम्। न = नहि। जानीतः = बोधतः। तावद् = तावत्कालम्। द्रुततरम् = शीघ्रतरम्। गत्वा = यात्वा। स्वजातीयानाम् = स्वकुलसदस्यानाम्। मध्ये = अन्तः। मिलितो भव = गच्छ। नो चेत् = अन्यथा। आभ्याम् = सिंहसुताभ्याम्। हतः = मारितः। मृत्युपथम् = मरणमार्गम्। समेष्यसि =प्र ाप्स्यसि।स ोऽपि =श ृगालसुतोऽपि।त द्वचनंश्रु त्वा =सिं ह्याःव चनमाकर्ण्य।भ यव्याकुलमनाः = भयाभिभूतचेताः। शनैःशनैः = मन्दं मन्दम्। उपसृत्य = चलित्वा। स्वजात्या = निजकुलेन। मिलितः = सङ्गतः।

**समासः** – ज्येष्ठभ्रातृचेष्टितम् = ज्येष्ठः चाऽसौ भ्राता ज्येष्ठभ्राता तेन चेष्टितम् (कर्मधारयगर्भतृतीयातत्पुरुषः)। कोपाविष्टमनाः=कोपेन आविष्टं कोपाविष्टं, कोपाविष्टं मनः यस्य सः (बहुव्रीहिः)। प्रस्फुटिताधरपल्लवः = प्रस्फुटितौ अधरपल्लवौ यस्य सः (बहुव्रीहिः)। ताम्रलोचनः = ताम्रे इव लोचने यस्य सः (बहुव्रीहिः)। मृत्युपथम् = मृत्योः पथम् (षष्ठीतत्पुरुषः)। शृगालीसुतः = शृगाल्याः सुतः (षष्ठीतत्पुरुषः)।

**सन्धिविच्छेदः** – तदाकर्ण्य = तत्+आकर्ण्य (जश्त्वम्) मैवम् = मा+एवम् (वृद्धिः)। कोपाविष्टमनाः = कोप+आविष्टमनाः (दीर्घः)। अथासौ = अथ+असौ (दीर्घः)। तन्मयावश्यम् = तत्+मया+अवश्यम् = (अनुनासिकदीर्घौ)। तद्यावदेतौ = तत्+यावत्+एतौ (जश्त्वम्)।। शनैरुपसृत्य = शनैः+उपसृत्य (रुत्वम्)।

**प्रकृतिप्रत्ययौ**– प्राप्य = प्र+आप्+क्त्वा(ल्यप्)। विहसन्तौ = वि+हस्+शतृ(औ)। प्रनष्टः = प्र+नश्+क्त।

आकर्ण्य = आ+कर्ण+क्त्वा(ल्यप्)। प्रबोधित: = प्र+बुध्+णिच्+क्त। विहस्य = वि+हस्+क्त्वा (ल्यप्)। शौर्येण = शूर+ष्यञ्(टा)। हीन: = हा+क्त। उपसृत्य = उप+सृ+क्त्वा (ल्यप्)। वचनम् = वच्+ल्युट्। श्रुत्वा = श्रु+क्त्वा। नीत: = नी+क्त। चेष्टितम् = चेष्ट्+क्त।

# अभ्यास-प्रश्ना:

## बहुविकल्पात्मका: प्रश्ना:

१. का पुत्रद्वयम् अजीजनत्?
   (अ) शृगाली (ब) सिंही
   (स) मूषिका (द) हस्तिनी।

२. सिंहेन स्वगृहमागच्छता क: प्राप्त:?
   (अ) सिंहशिशु: (ब) गजसुत:
   (स) शृगालसुत: (द) मूषक:।

३. 'ममायं तृतीय: पुत्रो भविष्यति।' इति केन कथितम्?
   (अ) सिंहेन (ब) गजेन
   (स) शृगाल्या (द) सिंह्या

४. कं दृष्ट्वा सिंहसुतौ कुपिताननौ अभूताम्?
   (अ) शृगालम् (ब) गजम्
   (स) मूषकं (द) सिंहम्।

५. 'द्वावपि' इत्यस्य सन्धिविच्छेद: अस्ति-
   (अ) द्वा+अपि (ब) द्वे+अपि
   (स) द्वौ+अपि (द) द्वो+अपि।

६. कोपाविष्टमना: को जात:-
   (अ) शृगाल: (ब) शृगाली
   (स) सिंह: (द) गज:।

७. सिंह्या एकान्ते नीत्वा क: प्रबोधित:-
   (अ) सिंह: (ब) गज:
   (स) शृगाली (द) शृगाल:

८. 'प्राप्य' इत्यत्र प्रत्यय: वर्तते-
   (अ) क्यप् (ब) यत्
   (स) ल्यप् (द) तव्यत्

## अतिलघूत्तरात्मका: प्रश्ना:

१. वने भ्रमतोऽपि कस्य रविरस्तं गत:?

२. गजोऽयं युष्मत्कुलशत्रु:' इति केन कथितम्?

३. प्राणत्यागेऽपि उपस्थिते किं नैव कर्त्तव्यम्?

४. गृहं प्रति क: प्रधावित:?

५. 'आकर्ण्य' इत्यत्र प्रकृतिप्रत्ययौ प्रदर्शनीयौ?
६. सुधीरेण सोत्साहेन सैन्यं किं जायते?
७. परुषतरवचनानि क उवाच?
८. को भयव्याकुलमना: स्वजात्या मिलित:?

**लघूत्तरात्मका: प्रश्ना:**

१. सनातन: धर्म: क?
२. सैन्यं सोत्साहं भङ्गं च कथं जायते?
३. सिंह्या शृगालसुत: कथं प्रबोधित:?
४. सिंही शृगालसुतं कथं न खादितवती?
५. 'एकेनापि.....' श्लोकस्य पूर्ति: करणीया?

**निबन्धात्मक: प्रश्न:**

१. सिंहशिशु–शृगालपुत्रकथा लेख्या।

## बहुविकल्पात्मकप्रश्नानाम् उत्तरमाला

| | | | |
|---|---|---|---|
| १.ब | २.स | ३.द | ४.ब |
| ५.स | ६.अ | ७.द | ८.स |

# त्रयोदशः पाठः

# शतबुद्ध्यादिमत्स्यकथा

(पञ्चतन्त्रस्य अपरीक्षितकारकात्)

**पाठ-परिचयः** अयं पाठः पं. विष्णुशर्मविरचितस्य पञ्च तन्त्रस्य अपरीक्षितकारकतन्त्राद् उद्धृतोऽस्ति। अस्मिन् तन्त्रे एका मुख्या कथा चतुर्दश उपकथाश्च वर्णिताः सन्ति। अत्र शतबुद्धि-सहस्रबुद्धिनाम्नोः मत्स्ययोः एकबुद्धिनाम्नः मण्डूकस्य च कथा चित्रिताऽस्ति। शतबुद्धि-सहस्रबुद्धी चिन्तयतः यत् संसारे बुद्धिमतां बुद्धिप्रभावेण किमपि अगम्यं नास्ति। किन्तु एकबुद्धिः मण्डूकः कथयति- **न एकान्तेन बुद्धिरपि प्रमाणम्।**

**कस्मिंश्चित्ज लाशयेश ातबुद्धिःस हस्त्रबुद्धिश्चद्व ौम त्स्यौ नवसतःस् म ।अ थत योरेकबुद्धिर्नाम मण्डूको मित्रतां गतः। एवं ते त्रयोऽपि वेलायां कञ्चित्कालं सुभाषितगोष्ठीसुखमनुभूय, भूयोऽपि सलिलं प्रविशन्ति। प्रभूतैर्मत्स्यैः व्यापादितैर्मस्तके विधृतैरस्तमनवेलायां तस्मिञ्जलाशये समायाताः। ततः सलिलाशयं दृष्ट्वा मिथः प्रोचुः-'बहुमत्स्योऽयं ह्रदो दृश्यते, स्वल्पसलिलश्च। तत्र प्रभातेऽत्रागमिष्यामः।' एवमुक्त्वा स्वगृहं गताः। मत्स्याश्च विषण्णवदना मिथो मन्त्रं चक्रुः। ततो मण्डूक आह-'भो! शतबुद्धे! श्रुतं धीवरोक्तं भवता। तत्किमत्र युज्यते कर्तुम्। पलायनमवष्टम्भो वा। यत्कर्तुं युक्तं भवति तदादिश्यतामद्य।' तच्छ्रुत्वा सहस्रबुद्धिः। प्रहस्य प्राह-' भो मित्र। मा भैषीः। यतो वचनश्रवणमात्रादेव भयं न कार्यम्।**

**व्याख्या-** कस्मिंश्चित् = एकस्मिन्। जलाशये = तडागे। शतबुद्धिः = एतन्नामकः सहस्रबुद्धिश्च = एतन्नामकश्च। द्वौ = उभौ। मत्स्यौ = जलचरौ, मीनौ। निवसतः स्म = अवसताम्। अथ = वाक्यालंकारे। तयोः = मत्स्ययोः। एकबुद्धिर्नाम = 'एकबुद्धि' इति नामकः। मण्डकः = दर्दुरः। मित्रतां गतः = मैत्रीं प्राप्तः। एवम् = इत्थम्। ते = अमी। त्रयोऽपि = मत्स्यमण्डूकाः। वेलायाम् = जलाशयतीरे। कञ्चित्कालम् = ईषत्कालम्। सुभाषितगोष्ठीसुखम् = काव्यालापानन्दम्। अनुभूय = प्राप्य। भूयोऽपि = पुनरपि। सलिलम् = जलम्। प्रविशन्ति = गच्छन्ति। अथ = अनन्तरम्, कदाचित् = एकदा। तेषां = मत्स्यमण्डूकानाम्। गोष्ठीमतानाम् = काव्यालापरतानाम्। जालहस्ताः = जालपाणयः। धीवराः = मत्स्यग्रहीतारः। प्रभूतैः = बहुभिः। मत्स्यैः = मीनैः। व्यापादितैः = मारितैः। मस्तके = शिरसि। विधृतैः = स्थापितैः। अस्तमनवेलायाम् = सूर्यास्तसमये। तस्मिन् = पूर्वोक्ते। जलाशये = तडागे समायाताः = आगताः। ततः = तदनन्तरम्। सलिलाशयम् = जलाशयम्। दृष्ट्वा = विलोक्य। मिथः = परस्परम्। प्रोचुः = जगदुः। बहुमत्स्यः = नैकमत्स्यः। अयम् = एषः। ह्रदः = जलाशयः। दृश्यते = अवलोक्यते। स्वल्पसलिलश्च = पुनश्च जलमपि न्यूनम्। तत् = अतः। प्रभाते = प्रातः। अत्र = इह। आगमिष्यामः = आयास्यामः। एवम् = इत्थम्। उक्त्वा = कथयित्वा। स्वगृहं गताः = निजावासं प्राप्ताः। मत्स्याश्च = एतन्नामकाः जलचराः। विषण्णवदनाः = दुःखिनः। मिथः = परस्परम्। मन्त्रम् = विचारम्। चक्रुः = चक्रिरे। ततः = अनन्तरम्। मण्डूकः = एकबुद्धिः। प्राह = उवाच। भोः शतबुद्धे! = हे शतबुद्धे। भवता = त्वया। धीवरोक्तम् = धीवराणां कथनम्। श्रुतम् = आकर्णितम्। तत् = तर्हि। अत्र = अस्मिन् विषये। किं कर्तुम् = किं विधातुम्। युज्यते = उचितं भवति। पलायनम् = इतः अन्यत्र गमनम्। अवष्टम्भः = अत्रैव स्थातव्यम्। वा। यत्कर्तुं -यद् विधातुम्। युक्तम् = यदुचितम्। भवति = अस्ति। तदादिश्यताम् = तदाज्ञां देहि। अद्य = अस्मिन् दिने। तच्छ्रुत्वा = तदाकर्ण्य। सहस्रबुद्धिः = तन्नामकः मत्स्यः। प्रहस्य = हसित्वा। आह = उवाच। भो मित्र = हे सुहृत्। मा भैषीः = भयं मा कुरु। यतः = यतोहि। वचनश्रवणमात्रादेव = केवलं वार्तया एव। भयम् = भीतिः। न = न हि। कार्यम् = करणीयम्।

**समासः** - जालहस्ताः = जालं हस्ते यस्य स जालहस्तः ते (बहुव्रीहिः)। बहुमत्स्यः = बहवः मत्स्याः अस्मिन् स बहुमत्स्यः (बहुव्रीहिः)। स्वल्पसलिलः = स्वल्पं सलिलं यस्मिन् स स्वल्पसलिलः (बहुव्रीहिः)। विषण्णवदनाः = विषण्णं वदनं यस्य स विषण्णवदनः ते (बहुव्रीहिः) वचनश्रवणमात्रम् = वचनस्य श्रवणं वचनश्रवणं तदेव वचनश्रवणमात्रम् (षष्ठीतत्पुरुषगर्भकर्मधारयः)।

**सन्धि-विच्छेदः** – भूयोऽपि = भूयः+अपि (विसर्गसन्धिः–उत्वपूर्वरूपे)। तयोरेकबुद्धिः = तयोः+एकबुद्धिः (रुत्वम्)। तस्मिञ्जलाशये = तस्मिन्+जलाशये (श्चुत्वम्)। सलिलाशयम् = सलिल+आशयम् (दीर्घः)। प्रभातेऽत्रागमिष्यामः = प्रभाते+अत्र+आगमिष्यामः = (पूर्वरूपं दीर्घश्च)। अवष्टम्भः = अव+स्तम्भः (षत्वष्टुत्वे)। तच्छ्रुत्वा = तद्+श्रुत्वा (छत्वं, श्चुत्वं चर्त्वं च)।

**प्रकृतिप्रत्ययौ**– मित्रताम्= मित्र+तल्+टाप् (आ)अम्। गतः= गम्+क्त। अनुभूय= अनु+भू+क्त्वा (ल्यप्)। प्रभूतैः = प्र+भू+क्त(भिस्)। व्यापादितैः = वि+आ+पद्+णिच्+क्त(भिस्)। उक्तम् = वच्+क्त। भयम् = भी+अच्। प्रहस्य = प्र+हस्+क्त्वा(ल्यप्)। कर्तुम् = कृ+तुमुन्। श्रुत्वा = श्रु+क्त्वा। विधृतैः = वि+धृ+क्त(भिस्)।

**तत्तावत्तेषामागमनमपि न सम्पत्स्यते। भविष्यति वा, तर्हि त्वां बुद्धिप्रभावेण आत्मसहितं रक्षयिष्यामि। यतोऽनेकां सलिलगतिचर्यामहं जानामि। तदाकर्ण्य शतबुद्धिराह–'भो युक्तमुक्तं भवता। सहस्रबुद्धिरेव भवान्।'**

**व्याख्या**– तत्तावत् = प्रथमं तु। तेषाम् = धीवराणाम्। आगमनमपि = उपस्थितिरपि। न सम्पत्स्यते = न भविष्यति। भविष्यति वा= अथवा आगमिष्यति। तर्हि= चेत्। त्वां= भवन्तम्। बुद्धिप्रभावेण= बुद्धिबलेन। आत्मसहितम् = आत्मना सह। रक्षयिष्यामि = रक्षां करिष्यामि। यतः = यतोहि। अनेकाम् = बहुसंख्यकाम्। सलिलगतिचर्याम् = जलचलनचातुर्यम्। अहम् = सहस्रबुद्धिः। जानामि = वेद्मि। तदाकर्ण्य = तच्छ्रुत्वा। शतबुद्धिः = तन्नामको मत्स्यः। आह = उवाच। भोः = हे। भवता = त्वया। युक्तम् = उचितम्। उक्तम् = कथितम्। भवान् = त्वम्। सहस्रबुद्धिः = अन्वर्थसंज्ञा। एव = निश्चयेन।

**समासः** – बुद्धिप्रभावेण = बुद्धेः प्रभावः बुद्धिप्रभावः तेन(षष्ठीतत्पुरुषः)। आत्मसहितम् = आत्मना सहितम् (तृतीयातत्पुरुषः)। सलिलगतिचर्याम् = सलिले गतिः सलिलगतिः तस्यां चर्या सलिलगतिचर्या ताम् (सप्तमी-तत्पुरुषः)।

**सन्धि-विच्छेदः**– तत्तावत्तेषाम् = तद्+तावद्+तेषाम् (चर्त्वम्)। तदाकर्ण्य = तत्+आकर्ण्य (जश्त्वम्)। सहस्रबुद्धिरेव = सहस्रबुद्धिः+एव (रुत्वम्)। यतोऽनेकाम् = यतः+अनेकाम् (विसर्गसन्धिः–उत्वपूर्वरूपे)।

**प्रकृति-प्रत्ययौ**– आगमनम् = आ+गम्+ल्युट्। बुद्धिः = बुध्+क्तिन्। प्रभावेण = प्र+भू+घञ्(टा)। गतिः = गम्+क्तिन्। युक्तम् = युज्+क्त। उक्तम् = वच्+क्त।

साध्विदमुच्यते–

**बुद्धेर्बुद्धिमतां लोके नाऽस्त्यगम्यं हि किञ्चन।**
**बुद्ध्या यतो हता नन्दाश्चाणक्येनासिपाणयः।।**

**प्रसङ्गः** – 'बुद्धिर्यस्य बलं तस्य' इति सूक्तेर्भावः अत्र निरूपितः।

**पदच्छेदः** – बुद्धेः बुद्धिमताम् लोके न+अस्तिःअगम्यम् हि किञ्चन। बुद्ध्या यतः हताः नन्दाः चाणक्येन असिपाणयः।

**अन्वयः** – लोके बुद्धिमतां बुद्धेः अगम्यं किञ्चन नास्ति हि। यतः चाणक्येन बुद्ध्या असिपाणयः नन्दाः हताः।

**व्याख्या**– लोके = अस्मिन् संसारे। बुद्धिमताम् = बुद्धिशालिनाम्। बुद्धेः = विवेकात्। अगम्यम् = अप्राप्यम्। किञ्चन = किमपि। नास्ति= न विद्यते, हि = निश्चयेन। यतः = यतोहि। चाणक्येन = निरस्त्रेणापि कौटिल्येन। बुद्ध्या = बुद्धिप्रभावेण। असिपाणयः = खड्गधारिणः। नन्दाः = नन्दवंशीयाः राजानः। हताः = विनष्टाः।

**व्याकरणम्**– अगम्यम् = न गम्यम् अगम्यम् (नञ्-तत्पुरुषः)। असिपाणयः = असिः पाणौ यस्य सः असिपाणिः ते (बहुव्रीहिः)। नाऽस्त्यगम्यम् = न+अस्ति+अगम्यम्(दीर्घः यण् च)। नन्दाश्चाणक्येन = नन्दाः+चाणक्येन (सत्वं श्चुत्वं च)। बुद्धेर्बुद्धिमताम् = बुद्धेः+बुद्धिमताम् (रुत्वम्)। बुद्धिमताम् = बुद्धि+मतुप्

(आम्) । अगम्यम् = न+गम्+यत् । हताः = हन्+क्त (जस्) । बुद्धेः = बुध्+क्तिन् (ङसि) ।

**सरलार्थः** – यदा सहस्रबुद्धिः शतबुद्धिं प्राह–'बुद्धिप्रभावेण आत्मसहितं रक्षयिष्यामि।' इत्यस्य समर्थनेन श्लोकोऽयमुल्लिखितः। अस्य अयं भावः – संसारे सर्वाणि कार्याणि बुद्धिमतां बुद्धिप्रभावेण एव सिद्ध्यन्ति। निरस्त्रेण चाणक्येन नन्दवंशीयाः नृपाः बुद्धिबलेन एव हताः, नन्दास्तु बलशालिन आसन्।

**छन्दः** – अनुष्टुप्।

**ततो वचनश्रवणमात्रादपि पितृपर्यायाऽऽगतं जन्मस्थानं त्यक्तुं न शक्यते। तन्न कदाचिदपि गन्तव्यम्। अहं त्वां स्वबुद्धिप्रभावेण रक्षयिष्यामि।**

**मण्डूक आह–' भद्रौ! मम तावदेकैव बुद्धिः पलायनपरा। तदहमन्यं जलाशयमद्यैव सभार्यो यास्यामि।'**

**एवमुक्त्वा स मण्डूको रात्रावेवान्यजलाशयं गतः। धीवरैरपि प्रभाते आगत्य जघन्यमध्यमोत्तमजलचरा, मत्स्य-कूर्म-मण्डूक-कर्कटादयो गृहीताः। तावपि शतबुद्धि-सहस्रबुद्धी सभार्यौ पलायमानौ, चिरमात्मानं गतिविशेषविज्ञानैः कुटिलचारेण रक्षन्तौ, जाले पतितौ व्यापादितौ च।**

**अथाऽपराह्णसमये प्रहृष्टास्ते धीवराः स्वगृहं प्रति प्रस्थिताः। गुरुत्वाच्चैकेन शतबुद्धिः स्कन्धे कृतः। सहस्रबुद्धिः प्रलम्बमानो नीयते। ततश्च वापीकण्ठोपगतेन मण्डूकेन तौ तथा नीयमानौ दृष्ट्वाऽभिहिता स्वपत्नी–'प्रिये! पश्य-पश्य–**

**शतबुद्धिः शिरस्थोऽयं, लम्बते च सहस्रधीः।**
**एकबुद्धिरहं भद्रे! क्रीडामि विमले जले।।**

**तत्रेयं मे मतिर्यत् – न एकान्तेन बुद्धिरपि प्रमाणम्।**

**व्याख्या**– ततः = बुद्ध्या कार्यसिद्धिसम्भवे। वचनश्रवणमात्रादपि = धीवरोक्तवचनाकर्णनमात्रादपि। पितृपर्यायागतम् = वंशक्रमागतम्। जन्मस्थानम् = जन्मभूमिः। त्यक्तुं न शक्यते = न त्याज्या। तत् = अतः। कदाचिदपि = कदापि। न गन्तव्यम् = त्वया इतः न गमनीयम्। अहम् = सहस्रबुद्धिः। त्वाम् = भवन्तम्। स्वबुद्धिप्रभावेण रक्षयिष्यामि = निजबुद्धिबलेन रक्षां करिष्ये।

मण्डूकः =द दुरः।अ ाह =उ वाच।' भद्रौ =म हाशयौ।म म =ए कबुद्धेः।त ावत् =के वलम्।ए कैव = एकसंख्यका एव। बुद्धिः = विवेकः। पलायनपरा = पलायनप्रधाना, अन्यत्रगमनप्रधाना इत्यर्थः। तत् = एतस्मात् कारणात्। अहम् = एकबुद्धिः। अन्यं जलाशयम् = अपरं सरोवरम्। अद्यैव = इदानीमेव। सभार्यः = भार्यया सह। यास्यामि =ग मिष्यामि।ए वम् =इ त्थम्।उ क्त्वा =क थयित्वा।स : =अ सौ।म ण्डूकः =द दुरः।र ात्रौए व =ि नशायामेव। अन्यजलाशयम् = अपरं सरोवरम्। गतः = यातः। धीवरैरपि = मत्स्यजीविभिरपि। प्रभाते = प्रातः। आगत्य = उपस्थाय। जघन्यमध्यमोत्तमजलचराः = कनिष्ठयुववृद्धसलिलवास्तव्याः। मत्स्य-कूर्म-मण्डूक-कर्कटादयः = मीन-कच्छप-दर्दुर-कर्कटप्रभृतयः। गृहीताः = जाले निबद्धाः। तौ अपि = उभौ अपि। शतबुद्धिसहस्रबुद्धी = एतन्नामकौ मत्स्यौ। सभार्यौ = भार्यासहितौ। पलायमानौ = इतस्ततः धावन्तौ। चिरम् = बहुकालम्। आत्मानम् = स्वयम्। गतिविशेषविज्ञानैः = नानाविधजलतरणविज्ञानैः। कुटिलचारेण = वक्रगमनेन। रक्षन्तौ = रक्षां कुर्वन्तौ। जाले पतितौ = जाले बद्धौ। व्यापादितौ च = मारितौ च।

अथ = अनन्तरम्। अपराह्णसमये = सायंकाले। प्रहृष्टाः = प्रसन्नाः। ते = अमी। धीवराः = मत्स्यग्रहीतारः। स्वगृहं प्रति = निजावासं प्रति। प्रस्थिताः = गताः। गुरुत्वात् = भारवत्त्वात्। च। एकेन = एकेन धीवरेण। शतबुद्धिः = एतन्नामकः मत्स्यः। स्कन्धे = अंसे। कृतः = धृतः। सहस्रबुद्धिः = एतन्नामकः मत्स्यः। प्रलम्बमाना = अधोलम्बमानाः। नीयते = कृष्यते। ततश्च = तदनन्तरम्। वापीकण्ठोपगतेन = दीर्घिकातटोपविष्टेन। मण्डूकेन = एकबुद्धिना। तौ = शतबुद्धिसहस्रबुद्धी। तथा = तेन प्रकारेण। नीयमानौ = कृष्यमाणौ। दृष्ट्वा = विलोक्य। स्वपत्नी = स्वभार्या। अभिहिता =

कथिता। प्रिये = कान्ते ! पश्य-पश्य = अवलोकय-अवलोकय।

हे भद्रे = महाशये ! अयम् = एष:। शतबुद्धि: = तदभिधानो मत्स्य:। शिरस्थ: = शिरसि धारित:। सहस्रधी: च = एतन्नामक: मत्स्य: च। लम्बते = लम्बमानो नीयते। अहम् = मण्डूक:। एकबुद्धि: = एतन्नामक: मण्डूक:। विमले जले = निर्मले तोये। क्रीडामि = विहारं करोमि।

तत्र = तस्मिन् विषये। मे = मम, मण्डूकस्य इत्यर्थ:। इयम् = एषा। मति: = बुद्धि: मतं वा इत्यर्थ:। यत् = योजकशब्द:। एकान्तेन = एकान्तत: अर्थात् केवलम्। बुद्धिरपि = विवेकोऽपि। न प्रमाणम् = प्रमाणरूपे = प्रमाणरूपे न गण्यते, दैवोऽपि प्रमाणं भवति।

**समास:** - वचनश्रवणमात्राद् = वचनस्य श्रवणं वचनश्रवणं तदेव वचनश्रवणमात्रं तस्मात् (षष्ठीतत्पुरुष:)। पितृपर्यायागतम् = पितु: पर्याय: पितृपर्याय: तस्माद् आगतम् पितृपर्यायागतम् (षष्ठीपञ्चमीतत्पुरुषौ)। जन्मस्थानम् = जन्मन: स्थानम् (षष्ठी-तत्पुरुष:)। सभार्य: = भार्यया सह (बहुव्रीहि:)। जघन्य-मध्यमोत्तमजलचरा: = जले चरन्ति इति जलचरा: (उपपदसमास:), जघन्याश्च मध्यमाश्च उत्तमाश्च जघन्यमध्यमोत्तमाश्च ते जलचरा: (द्वन्द्वकर्मधारयौ)। वापीकण्ठोपगतेन = वाप्या: कण्ठ: वापीकण्ठ:, तम् उपगत: वापीकण्ठोपगत: तेन (षष्ठीद्वितीयातत्पुरुषौ)। शिरस्थ: = शिरसि तिष्ठति (उपपदसमास:)।

**सन्धि-विच्छेद:**- तन्न = तद्+न (अनुनासिक:)। तावदेकैव = तावत्+एका+एव (जश्त्व-वृद्धी)। अद्यैव = अद्य+एव (वृद्धि:)। रात्रावेवान्यजलाशयम् = रात्रौ+एव+अन्यजलाशयम् (अयादि-दीर्घौ)। तावपि = तौ+अपि (अयादि:)। प्रहृष्टास्ते = प्रहृष्टा:+ते (सत्व-ष्टुत्वौ)। गुरुत्वाच्चैकेन = गुरुत्वात्+च+ एकेन(श्चुत्ववृद्धी)। शिरस्थोऽयम् = शिरस्थ:+अयम् (सत्वं, रुत्वम् , उत्वं-पूर्वरूपम्)। बुद्धिरपि = बुद्धि:+अपि (रुत्वम्)।

**प्रकृति-प्रत्ययौ**- आगतम् = आ+गम्+क्त। त्यक्तुम् = त्यज्+तुमुन्। गन्तव्यम् = गम्+तव्यत्। बुद्धि: = बुध्+क्तिन्। उक्त्वा = वच्+क्त्वा। गत: = गम्+क्त। आगत्य = आ+गम्+क्त्वा (ल्यप्)। गृहीता: = गृह्+ क्त। रक्षन्तौ = रक्ष्+शतृ (औ)। प्रहृष्टा: = प्र+हृष्+क्त। प्रस्थिता: = प्र+स्था+क्त। प्रलम्बमाना: = प्र+लम्ब्+ शानच्+जस्। नीयमानै: = नी+यक्+शानच् (भिस्)। मति: = मन्+क्तिन्। प्रमाणम् = प्र+मा+ल्युट्।

## अभ्यास-प्रश्ना:

**बहुविकल्पात्मका: प्रश्ना:**

१. मण्डूकस्य नाम आसीत्-

(अ) शतबुद्धि: (ब) सहस्रबुद्धि:

(स) एकबुद्धि: (द) सुबुद्धि:।

२. जालहस्ता: के आसन्?

(अ) मत्स्या: (ब) धीवरा:

(स) मण्डूका: (द) जलचरा:

३. 'भो मित्र ! मा भैषी: !' इति क: प्राह?

(अ) शतबुद्धि: (ब) सहस्रबुद्धि:

(स) एकबुद्धि: (द) धीवरा:

४. असिपाणय: नन्दा: केन हता:?

(अ) चाणक्येन (ब) मण्डूकेन

(स) मत्स्येन (द) जलचरैः।

५. 'प्रहस्य' इत्यत्र कः प्रत्ययः?

(अ) यत् (ब) ण्यत्

(स) क्यप् (द) ल्यप्।

६. सभार्यः कः अन्यजलाशयं गतः?

(अ) शतबुद्धिः (ब) एकबुद्धिः

(स) सहस्रबुद्धिः (द) धीवरः।

७. शतबुद्धिः कुत्र स्थितः?

(अ) शिरसि (ब) हृदये

(स) पादयोः (द) हस्तयोः।

८. प्रलम्बमानः को नीयते?

(अ) सहस्रबुद्धिः (ब) शतबुद्धिः

(स) एकबुद्धिः (द) धीवरः।

**अतिलघूत्तरात्मकाः प्रश्नाः**

१. द्वौ मत्स्यौ कुत्र निवसतः स्म?

२. मत्स्ययोः मैत्री केन सह अभवत्?

३. 'ह्रदः' इत्यस्य पर्यायशब्दः कः?

४. 'भो! युक्तमुक्तं भवता' इति केन कथितम्?

५. पितृपर्यायागतं किं त्यक्तुं न शक्यते?

६. 'न एकान्तेन बुद्धिरपि प्रमाणम्' इति कस्य मतम्?

७. विमले जले कः क्रीडति?

८. 'सभार्यः' अत्र कः समासः?

**लघूत्तरात्मकाः प्रश्नाः**

१. मत्स्याः विषण्णवदनाः कथं सञ्जाताः?

२. सहस्रबुद्धिः प्रहस्य किमाह?

३. 'बुद्धेर्बुद्धिमतां...........' श्लोकार्थो लेख्यः।

४. व्यापादितौ शतबुद्धिसहस्रबुद्धी दृष्ट्वा मण्डूकेन किमभिहितम्?

**निबन्धात्मकः प्रश्नः**

१. शतबुद्ध्यादिमत्स्यकथा सरलसंस्कृतेन लेख्या।

## बहुविकल्पात्मकानां प्रश्नानाम् उत्तरमाला

| | | | |
|---|---|---|---|
| १.स | २.ब | ३.ब | ४.अ |
| ५.द | ६.ब | ७.अ | ८.अ |

# रचना-भागः

## चतुर्दशः पाठः
## निबन्ध-पत्र-लेखनम्

### निबन्ध-लेखनम्

निबन्धलेखनेन भाषाविकासेन सहैव विचाराभिव्यक्तिकौशलमपि प्रवर्धते। समसामयिकविषयाधारितं निबन्धलेखनं भाषाशिक्षणपाठ्यक्रमेऽनिवार्यतया निर्धारितं भवति। निबन्धस्य प्रमुखानि अङ्गानि निम्नलिखितानि सन्ति –

१. प्रस्तावना

२. प्रतिपाद्यविषयः

३. उपसंहारः

अतः निबन्धलेखनसमये सर्वप्रथमं शीर्षकस्य व्युत्पत्तिपूर्वकं प्रतिपाद्यविषयस्य प्रस्तावना प्रस्तोतव्या। ततः प्रपिपाद्यविषयस्य विस्तरेण साङ्गं निरूपणं करणीयम्। अन्ते निबन्धस्य सारांशरूपेण उपसंहारः करणीयः। निबन्धस्य भाषा सरला शुद्धा प्रवाहयुक्ता स्तरानुकूला च भवेत्। निबन्धे प्रस्तुता विचाराः तथ्यपरकाः सार्थकाः, स्पष्टाः सकारात्मकाश्च भवेयुः। अत्र पाठ्यक्रमानुसारं केचन निबन्धाः प्रस्तुताः सन्ति –

### १. मम प्रियः कविः

मम प्रियः कविः दण्डी अस्ति। एषः कौशिकगोत्रजः ब्राह्मणः आसीत्। अस्य वास्तविकं नाम न ज्ञायते। स्वग्रन्थे दशकुमारचरिते मङ्गलाचरणे (ब्रह्माण्डच्छत्रदण्डः....) अष्टवारं दण्डशब्दस्य प्रयोगं कृतवान्, अतः एषः दण्डिनाम्ना प्रसिद्धः सञ्जातः। दाक्षिणात्यस्य दण्डिनः स्थितिकालः सप्तम्याः शताब्द्याः उत्तरार्धः अष्टमशताब्द्याश्च आदिभागः अनुमीयते। दण्डिनः रचनाविषये प्रसिद्धोऽयं श्लोकः अस्ति–

**त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः।**
**त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः।।**

इत्यनुसारेण महाकवेः दण्डिनः त्रयो ग्रन्थाः प्रसिद्धाः सन्ति। यथा-काव्यादर्शः, अवन्तिसुन्दरीकथा दशकुमारचरितञ्च। मह्यं दण्डिनः दशकुमारचरितनामकं काव्यम् अधिकं रोचते, दण्डिनो भाषायां प्रवाहो लालित्यं च वर्तते। संस्कृतसाहित्ये प्रसिद्धम् अस्ति यत्–

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

दशकुमारचरिते कथाप्रवाहेण सहैव प्रतिपदं पदलालित्यं प्राप्यते। दशकुमारचरितं पठित्वा अहमपि मुग्धो भवामि। पद्यरचनायां दण्डिनः पदलालित्यं यथा–

**ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहोनालदण्डः**....इत्यादि।

**गद्यलालित्यं यथा– घनदर्पकन्दर्पसौन्दर्यसौदर्यहृद्य**....इत्यादि।

संस्कृतसाहित्ये दण्डिनः प्रतिष्ठामवलोक्याहं तदनुरक्तोऽभवम्। दण्डी एव मम प्रियः कविरित्यहं सगौरवं वदामि।

## २. भारतीया संस्कृतिः

संस्कारैः संस्करणमेव संस्कृतिः। संस्कृतिः जीवनस्यान्तरङ्गं स्वरूपं प्रकाशयति। संस्कृतिः मानवजीवनस्य सुसंस्कृतं स्वरूपं वर्तते। संस्कृतिः सभ्यतायाः जननी भवति। संस्कृतिरेव कस्यापि राष्ट्रस्य गौरवं प्रमाणयति। भरतखण्डे भरतानां या आद्या संस्कृतिः आसीत् सैव भारतीया संस्कृतिः अस्ति। भारतीया संस्कृतिः सम्पूर्णमानवजीवनस्य कल्याणं वाछ ति। धर्मप्रधाना भारतीयसंस्कृतिः सर्वेभ्यः सदाचारपालनस्य उपदेशं ददाति। अस्या आध्यात्मिकविचाराः विश्वकल्याणविधायकाः सन्ति। भारतीयसंस्कृतौ पारलौकिकी भावना, वर्णाश्रमव्यवस्था, कर्मवादः, पुनर्जन्ममान्यता मोक्षविषयकधारणा च विशेषतया अन्तर्भूता वर्तते। **'धर्मेण हीनाः पशुभिः समानाः'** इति विश्वसन्तो भारतीयसंस्कृतिसमुपासकाः परोपकारार्थमिदं शरीरमिति लक्ष्यं निर्धार्य स्वजीवनं यापयन्ति। सत्यपरिपालनपूर्वकम् **'अहिंसा परमो धर्मः'** इति मन्त्रं स्मरन्तो जनाः सर्वजनहिताय सर्वजनसुखाय कर्मरताः भवन्ति। भारतीयसंस्कृतेः सन्देशो वर्तते यत्–

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।**

## ३. अहिंसा परमो धर्मः

हिंसनं हिंसा इति। त्रिविधा भवति हिंसा– मनसा वाचा कर्मणा च। प्राणिवध एव हिंसा न अपितु मनसा परापकृतिचिन्तनं वाचा कटुवाक्यप्रयोगोऽपि हिंसा एव परिगण्यते। सर्वविधहिंसापरित्याग एव अहिंसा भवति। अहिंसा एव जगति शान्तिसन्धात्री अभ्युदयसाधिनी, गुणोत्कर्षकारिणी सच्चारित्र्यमूला धर्माभिवृद्धिकर्त्री च वर्तते। अहिंसाया जीवनोपयोगित्वम् आलक्ष्य एव प्राचीनैः ऋषिभिः महर्षिभिः शास्त्रकारैश्च तस्योपादेयता प्रतिपादिता। न केवलं वेदादिषु अपितु जैन-बौद्धाद्यागमेष्वपि अहिंसाया जीवनेऽनिवार्यता उपदिष्टा अस्ति। प्रेमभावनयैव मानवहितं विश्वहितं च सम्पादयितुं शक्यते। श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन दैवीसम्पद्वर्णनावसरे अहिंसागुणः प्रथमतया स्मृतः। यथा–

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।**

**'अहिंसा-प्रतिष्ठायां तत्सन्निधौ वैरत्यागः'** इति कथयन् महर्षिः पतञ्जलिरपि अहिंसामाध्यमेन वैरत्यागं प्रतिपादयति। वस्तुतः अहिंसा एव एतादृशो गुणो वर्तते येन विश्वबन्धुत्वं सम्भाव्यते। अहिंसायाः परिपालनार्थमेव भगवान्ब ुद्धः,भ गवान्म हावीरः,म हर्षिदयानन्दः,म हात्मगांधिश्चस् वजीवनंस मर्पितवन्तः।अ हिंसयाए वज ीवने सद्भावाः समुत्पद्यन्ते। अहिंसा एव सर्वहितसाधिका धर्मोन्नतिकारिका च वर्तते। अत एव उच्यते–**अहिंसा परमो धर्मः।**

## ४. स्वस्थवृत्तम्।

**'धर्मार्थकाममोक्षाणाम् आरोग्यं मूलमुत्तमम्'** इति कथनानुसारं स्वास्थ्यस्य महत्त्वं स्पष्टीभवति, स्वस्थेन शरीरेण एव जनः स्वजीवने सर्वविधस्य सुखस्य अनुभवं कर्त्तुं शक्नोति। स्वास्थ्यमेव मनुष्यस्य परमं धनम् अस्ति। स्वस्थः जनः एव सर्वविधाभ्युदयस्य कृते प्रयत्नशीलः भवितुं शक्नोति। स्वास्थ्यं विना धर्माचरणं न सम्भवति। अर्थोपार्जने शक्तेः उत्साहस्य आरोग्यस्य च प्रतिपदम् आवश्यकता अनुभूयते। विविधानि भौतिकानि सुखानि अपि स्वस्थशरीरेण एव उपभोक्तुं शक्यन्ते। मोक्षप्राप्तये तपश्चरणं साधनादिकञ्चापि आरोग्यं विना न सिध्यति। अतः स्पष्टमेव यत् पुरुषार्थचतुष्टयसिद्धौ स्वास्थ्यमेव मूलम्। स्वस्थस्य जनस्य लक्षणम् आयुर्वेदशास्त्रे इत्थं प्रतिपादितम् अस्ति–

**समदोषः समाग्निश्च समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते।।**

रोगनिदानरूपेण आचार्याः षट् कारणानि प्रतिपादयन्ति–

**अत्यम्बुपानाद् विषमाशनाच्च दिवा शयाद् जागरणाच्च रात्रौ।**
**संरोधनाद् मूत्रपुरीषयोश्च, षड्भिः प्रकारैः प्रभवन्ति रोगाः।।**

एतानि सर्वाणि रोगकारणानि सावधानतया परित्याज्यानि। अस्माकं दिनचर्या सुव्यवस्थिता भवेत्।

प्रातःकाले शीघ्रं जागरणं, स्नानं, ध्यानं, व्यायामः, योग-प्राणायामः, अन्यच्च नियतं कर्म यथासमयं करणीयम्। सात्विकं पथ्यकरं च भोजनं करणीयम्। नित्यं स्वाध्यायः करणीयः। परोपकारः चिन्तनीयः। सदाचारपालनपूर्वकं जीवनं यापनीयम्। व्यर्थचिन्ता न करणीया। पूर्णनिद्रा प्राप्तव्या। वाण्यां मधुरता चित्ते च प्रसन्नता भवेत्। सर्वथा स्वास्थ्यरक्षणं कुर्यात्। स्वस्थवृत्तस्य सर्वदा पालनं करणीयम्।

## ५. संस्कृते विज्ञानम्

संस्कृतं ज्ञानस्य विज्ञानस्य च भाषा अस्ति। संस्कृतवाङ्मये प्रतिपदं तादृशानि उदाहरणानि प्राप्यन्ते यानि दृष्ट्वा भारतीयानां प्राचीनवैज्ञानिकज्ञानस्य निदर्शनं भवति। विज्ञानस्य प्रमुखशाखानां उत्कर्षस्य असङ्ख्यानि प्रमाणानि संस्कृतवाङ्मये प्राप्यन्ते।

गणितक्षेत्रे संस्कृतशास्त्रबलेन भारतस्य प्रभावः सम्पूर्णविश्वे आसीत्। भारतमेव अखिलं विश्वम् अङ्कनपद्धतिम् अशिक्षयत। शून्यस्य आविष्कारः भारते एव जातः। एवमेव दाशमिकपद्धतेः आविष्कारः अपि भारतीयशास्त्रेषु बहुपूर्वं जातः आसीत्। एतदाविष्कारद्वयेन गणितक्षेत्रे कीदृशी क्रान्तिः समागता इति सर्वविदितमस्ति। रेखागणिते त्रिभुजस्य विकर्णं ज्ञातुं प्रयुज्यमानः प्रमेयः सम्पूर्णविश्वे 'पाइथागोरस' नाम्ना प्रचलितः अस्ति, किन्तु संस्कृतवाङ्मयस्य बौधायनसूत्रे अस्य प्रतिपादनं बहुपूर्वमेव सञ्जातम् आसीत्।

चिकित्साक्षेत्रे भारतीय-आयुर्वेदचिकित्सापद्धतेः स्थानमनुपमं वर्तते। चरकसंहिता-सुश्रुतसंहिता-सदृशाः ग्रन्थाः अद्यापि प्रासङ्गिकाः सन्ति। सुश्रुतेन प्रतिपादितः शल्यक्रियाविधिः प्राचीनभारतीयविज्ञानस्य श्रेष्ठत्वं प्रमाणयति। एवमेव खगोलशास्त्रस्य विमानशास्त्रस्य, वनस्पतिशास्त्रस्य च समृद्धपरम्परा संस्कृते विज्ञानस्य विद्यमानतां प्रभावशीलतां च प्रतिपादयति। ज्योतिर्विज्ञानस्य प्रभावस्तु सर्वत्र दरीदृश्यते एव। ज्योतिषगणनानुसारं चन्द्रोदय-सूर्योदय-चन्द्रग्रहण-सूर्यग्रहणादीनां प्रामाणिकता तु स्वयंसिद्धाऽस्त्येव। यथोच्यते- **प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ।** सारांशतया वक्तुं शक्नुमो यत् संस्कृते विज्ञानस्य गौरवशालिनी परम्परा वर्तते। संस्कृतवाङ्मयस्य शोधात्मकपरिशीलनेन विज्ञानक्षेत्रे नवीना उद्भावनाः सम्भाव्यन्ते।

## ६. संस्कृतदिवसः

संस्कृतदिवसः प्रतिवर्षं श्रावणपूर्णिमायां समायोज्यते। श्रावणीपूर्णिमा संस्कृतदिवसेन सहैव रक्षाबन्धनस्य उपाकर्मणश्च कृतेऽपि प्रथिता अस्ति। अस्मिन् दिने सप्तर्षि-पूजनोत्सवो भवति। द्विजाः जलाशयान् गत्वा दशविधस्नानं कुर्वन्ति, नूतनानि यज्ञोपवीतानि धृत्वा सप्तर्षीन् सश्रद्धं, पूजयन्ति तेषां वंशश्रवणं च कुर्वन्ति। विद्यारम्भस्य कृते विशेषतया च वेदारम्भस्य कृते श्रावणपूर्णिमाया महत्त्वं विद्यते। अस्मिन् दिने शकुन-मण्डनम् क्रियते। जनाः गृहद्वारेषु स्वस्तिकं रचयन्ति। ब्राह्मणाः स्वयजमानहस्तेषु भगिन्यश्च स्वभ्रातृहस्तेषु रक्षासूत्रं बध्नन्ति। अनेन प्रकारेण पुण्यदिवसोऽयं संस्कृतसंस्कृतिपरिचायको वर्तते। संस्कृतेराश्रयभूता संस्कृतभाषा भारतस्य प्राणभूता वर्तते। संस्कृतस्य प्रचाराय एव भारतसर्वकारस्य निर्देशानुसारं सम्पूर्णदेशे संस्कृतदिवसस्यायोजनं प्रतिवर्षं भवति। राजस्थानसंस्कृतशिक्षाविभागस्य संस्थासु प्रतिवर्षं संस्कृतसप्ताहायोजनं क्रियते। संस्कृतनिदेशालयेन प्रतिवर्षं राज्यस्तरीयसंस्कृतदिवससमारोहे संस्कृतविद्वांसः स्वसंस्कृतसेवायै सादरं सम्मान्यन्ते। संस्कृतदिवसस्य सन्देशो वर्तते यत्-

**संस्कृते संस्कृतिः श्रेष्ठा, ज्येष्ठा ज्ञानपरम्परा।**
**शाश्वतं संस्कृतं तस्मात् श्रेयसे समुपास्यताम्।।**

## ७. महाकविः कालिदासः

महाकविकालिदासः संस्कृतसाहित्याकाशस्य दिव्यमणिरिव सर्वदा प्रकाशते। स भारतीयसंस्कृतेः समुज्ज्वलं स्वरूपं स्वकाव्येषु प्रस्तूय अमरतां दत्तवान्। कविः भारतस्यामूल्यो निधिर्वर्तते। जनश्रुत्यनुसारेण कविकुलगुरुः कालिदासो भूपतेः विक्रमादित्यस्य नवरत्नेषु अन्यतमः आसीत्। अनेन कालिदासस्य उज्जयिनीनिवासः प्रमाणीभवति, मेघदूतेऽनेन कृतं विशिष्टम् उज्जयिनीवर्णनमपि एतत् समर्थयति।

विद्वांसः कालिदासस्य स्थितिकालम् ईसापूर्व-प्रथम-शताब्द्यां निर्धारयन्ति। केषाञ्चन मते च महाकविरयं चतुर्थशताब्द्यां जातः इति।

महाकवेः कालिदासस्य रघुवंशं कुमारसम्भवञ्चेति द्वे महाकाव्ये स्तः। विक्रमोर्वशीयम् मालविकाग्निमित्रम् अभिज्ञानशाकुन्तलञ्चेति त्रीणि नाटकानि सन्ति। एवमेव मेघदूतमिति एकं खण्डकाव्यम् ऋतुसंहारश्चेति गीतिकाव्यं वर्तते।

महाकविकालिदासस्य रचनासु वैदर्भीरीतिर्माधुर्यगुणश्च सर्वत्र विराजते। अस्योपमा संस्कृतसाहित्ये प्रसिद्धा अस्ति। यथोक्तम्-

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।इति।**

निष्कर्षतया वक्तुं शक्यते यत् महाकविकालिदासः संस्कृतसाहित्यस्य श्रेष्ठो महाकविः वर्तते।

## ८. महाकविः माघः

राजस्थानस्य भीनमाल-नगरे जनिं लब्धवतो महाकविमाघस्य संस्कृतसाहित्ये महत्त्वपूर्णं स्थानं वर्तते। महाकवेः माघस्य कीर्तिप्रसारकम् एकमेव ग्रन्थरत्नं शिशुपालवधनामकं समुपलभ्यते। अस्मिन् विंशत्यां सर्गेषु भगवता कृष्णेन युधिष्ठिरस्य राजसूययज्ञावसरे कृतः शिशुपालवधो महता वैभवेन काव्यात्मकशैल्या वर्णितो विद्यते।

माघकाव्ये प्रतिपदं पदलालित्यं माधुर्यं च अनुभूय विद्वद्भिरुदाहृतम्- '**काव्येषु माघः**' इति।

महाकविर्माघः न केवलं काव्यशास्त्रस्य अपितु व्याकरण-दर्शन-धर्मशास्त्रादीनामपि पारङ्गतो विद्वानासीत्।

विद्वद्भिः महाकवेः कालिदासस्य कृतिषु उपमायाः प्राधान्यम्, भारवेः कृतौ किरातार्जुनीये अर्थगौरवस्य

वैशिष्ट्यम्,द ण्डिनःकृ तौद शकुमारचरितेप दलालित्यमुउ द्घोष्यते म ाघस्यकृ तौ शिशुपालवधेए तेषांत्र ायाणामपि गुणानां समन्वयं समीक्ष्य साह्लादं समुद्घोष्यते यत्–

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

## ९. वर्षप्रतिपदा ( नूतनवर्षम् )

अधुना प्रायः सम्पूर्णसंसारे जनवरीमासस्य प्रथमे दिनाङ्के नववर्षारम्भः स्वीक्रियते। भारतीयपरम्परायां विक्रमसंवत्सरस्य चैत्रशुक्लप्रतिपत्तिथौ नूतनस्य वर्षस्य प्रारम्भः प्राचीनकालादेव अङ्गीक्रियते। वस्तुतः कालस्तु अखण्डोऽविभक्तश्च भवति। कल्पान्ते सृष्टेर्विनाशेऽपि कालस्य नाशो न भवति, अत एव कालविभागक्रमकल्पना कृता वर्तते। कालगणनायां कल्पशब्देन ब्रह्मणो दिनमेव बोधविषयो भवति। एकस्मिन् कल्पे चतुर्दश मन्वन्तराणि भवन्ति। एकस्मिन् मन्वन्तरे एकसप्ततिः महायुगाः, एकस्मिन् महायुगे चत्वारो युगाः (सत्यत्रेताद्वापरकलिसञ्ज्ञकाः) भवन्ति। प्रतियुगं निर्धारितवर्षाणि भवन्ति। वर्षे द्वादश मासाः प्रतिमासञ्च त्रिंशत् दिनानि रात्र्यश्च भवन्ति। चतुर्विंशतिहोरात्मकमहोरात्रं भवतीति विदितमेव। कालक्रमोऽयं निरन्तरं प्रवर्तते। सृष्टेरुन्मेषः यस्मिन् काले जातः स एव वत्सरस्य प्रथमं दिनं जातम्। सृष्टिसमारम्भस्यानिर्णीतत्वात् स्वपरम्परानुसारं विश्वे नववर्षारम्भः स्वीक्रियते।

भारतीयपरम्परानुसारम् अधुना विक्रमादित्यस्य सिंहासनारोहणावधिमाधृत्य वर्षगणना प्रवर्तते। तदनुसारं भारतीयनववर्षस्य प्रारम्भः चैत्रशुक्ल–प्रतिपत्तिथौ क्रियते। अस्मिन् दिने नवरात्रस्थापनेन सहैव अन्यानि अपि बहूनि पर्वाणि आमन्यन्ते। वर्षप्रतिपदा नूतनवर्षेण सहैव प्रकृतिमाध्यमेन हृदयोल्लासमपि प्रकटयति।

## १०. महाराणाप्रतापः

वीरशिरोमणेः महाराणाप्रतापस्य जन्म १५४० ई. वर्षे मई–मासस्य नवमे दिनाङ्के कुम्भलगढ़े अभूत्। अस्य पिता महाराणा उदयसिंहः माता च जैवन्ताबाई सोनगरा आसीत्। महाराणा–उदयसिंहस्य निधनदिने एव १५७२ ई. वर्षे २८ फरवरी, दिनाङ्के गोगुन्दा–ग्रामे द्वात्रिंशद्वर्षदेशीयस्य महाराणाप्रतापस्य राज्यारोहणं सञ्जातम्। प्रतापस्य मुगलशासकेन अकबरेण सह सङ्घर्षस्तु सुविदितः एव। स्वतन्त्रताप्रेमी प्रतापः अकबर–बलेन कूटनीत्या वापि तदधीनतां न स्वीकृतवान्। सः कुम्भलगढं गोगुन्दां च केन्द्रं विधाय सम्पूर्णं मेवाडराज्यं स्वतन्त्रं कारयितुं प्रतिज्ञाबद्धः सञ्जातः। स जनमानसं स्वतन्त्रतायाः संस्कृतेश्च रक्षायै प्रेरयन् जनजातिवर्गं च सङ्घटितं विधाय तं स्वसेनायाः अङ्गत्वेन स्थापितवान्। अकबर–सेनापतिः मानसिंहः पञ्चसहस्रसैनिकैः साकं महाराणाप्रतापेन सह युद्धार्थं समागतः। १५७६ ई. वर्षे जूनमासस्य १८ तमे दिनाङ्के इतिहासप्रसिद्धः हल्दीघाटी–युद्धः प्रारब्धः सञ्जातः। अस्मिन् युद्धे मुगलसेना हतप्रभा अभूत्। मेवाडस्यानेन विजयेन महाराणाप्रतापः सर्वत्र वीरशिरोमणिरूपेण प्रतिष्ठितः अभूत्। अग्रेऽपि चावण्डं स्वराजधानी कृतवान् निरन्तरसङ्घर्षेण स्वयुद्धकौशलेन आक्रामकनीत्या च मुगलशासनस्य कृते प्रपीडकः सञ्जातः। स्वपितुः समये अकबरस्य अधीनतां गतानि सर्वाणि स्थानानि महाराणाप्रतापेन क्रमशः पुनः स्वाधीनानि कृतानि। १९ जनवरी, १५९७ ई. वर्षे सप्तपञ्चाशद्वर्षदेशीयो महाराणाप्रतापः चावण्ड–स्थाने स्वप्राणानत्यजत्। चावण्ड–निकटे बाडोलीग्रामे प्रतापस्य समाधिः निर्मिता अस्ति। महाराणा–प्रतापः श्रेष्ठो योद्धा वास्तविको जननायकश्चासीत्। सर्वधर्मानुयायिनः जनाः मातृभूमेः स्वाधीनतासङ्घर्षे तेन सह तत्परा आसन्। सर्वधर्मसमभावेन राष्ट्रप्रेमपुरस्सरं स्वाधीनतासमुपासको महाराणा–प्रतापो महान् देशभक्तः जनप्रेरकश्चासीत्। स सर्वैः सर्वदा वन्दनीयः। महाराणाप्रतापमहिमानं वर्णयन् कश्चित् कविः कथयति–

**मूर्तिमान् राष्ट्रमार्तण्डो मातृभूरक्षणव्रती।**
**महाराणाप्रतापोऽस्ति राजस्थानधरामणिः।।**

## ११. श्रीरामः

मर्यादापुरुषोत्तमरूपेण जगति विख्यातो भक्ताभीष्टप्रदायकः श्रीरामः सर्वजनविश्रामदायको वर्तते। अयोध्यानरेशस्य महाराजस्य दशरथस्य ज्येष्ठः पुत्रः कौसल्यानन्दनो रामो भगवतो विष्णोरवतारो मन्यते। सः स्वानुजैः भरत-लक्ष्मण-शत्रुघ्नैः सह रघुकुल-कुलगुरोः वशिष्ठात् विद्याध्ययनमकरोत्। महर्षेर्विश्वामित्रस्य यज्ञरक्षार्थं गतेन सलक्ष्मणेन श्रीरामेण ताडकावधः कृतः मारीचश्च स्वबाणेन सुदूरं क्षिप्तः। महर्षिणा विश्वामित्रेण शस्त्रविद्याप्रवीणः कृतः श्रीरामः, तेनैव सह धनुर्यज्ञदर्शनार्थं मिथिलां गतः। तत्र श्रीरामः शिवधनुर्भङ्गं विधाय जनकपुत्र्या सीतया सह विवाहमकरोत्। पुनरयोध्यां समायातः श्रीरामः पित्रा दशरथेन राज्याभिषेकाय चितः। भरतस्य माता कैकेयी पूर्वदत्तवररूपेण स्वपुत्राय भरताय अयोध्यायाः राज्यं रामाय च चतुर्दशवर्षाणां कृते वनवासं याचितवती। एतज्ज्ञात्वा रामः सहर्षं वनगमनतत्परः सन्नवदत्-

'**रामो द्विर्नाभिभाषते**' इति। स्वप्रतिज्ञानुसारं वनं गच्छता रामेण सह सीता लक्ष्मणश्चापि गतौ। तत्र सीताहरणं कृतवतो रावणस्य वधं विधाय तदनुजाय धर्मात्मने विभीषणाय एव लङ्कायाः राज्यं दत्त्वा अयोध्यां समागतः अनन्तरं लोकापवादकारणेन दुःखितेन मनसा सीतायाः त्यागं कृत्वापि श्रीरामो लोकाराधनमकरोत्। उत्तररामचरितानुसारं रामस्य कथनं यथा-

**स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।**

वाल्मीकिरामायणं श्रीरामचरितस्याद्भुतं निदर्शनं करोति। श्रीरामः लोके यां मर्यादां स्थापितवान् सा अद्यापि लोके सम्मान्यते। 'रामादिवद् वर्तितव्यं न रावणादिवत्' इत्यादि कथनं भगवतः श्रीरामस्यादर्शं लोकप्रियञ्च स्वरूपं प्रकटयति। गोस्वामी तुलसीदासः श्रीरामचरितमानसस्य जनभाषया रचनां विधाय प्रतिगृहं श्रीरामकथां प्रसारितवान्। मर्यादापुरुषोत्तमः श्रीरामो लोकमर्यादासंस्थापकः लोकप्रेरकश्चास्ति। बुधकौशिकमुनिविरचित-श्रीरामरक्षास्तोत्रानुसारं श्रीरामं नमस्कृत्य विरम्यते -

**रामाय रामभद्राय रामचन्द्राय वेधसे।**
**रघुनाथाय नाथाय सीतायाः पतये नमः।।**

## १२. श्रीकृष्णः

**वसुदेवसुतं देवं कंसचाणूरमर्दनम्।**
**देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम्।।**

देवकीनन्दनो वसुदेवसुतो भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायां स्वावतारसङ्कल्पनां समुद्घोषयति-

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय तदात्मानं सृजाम्यहम्।।**

स्वप्रतिज्ञां परिपालयन् देवकीगर्भाज्जन्म गृहीत्वा कंसभीतेन स्वपित्रा वसुदेवेन यशोदानन्दाभ्यां तद्रक्षायै पालनार्थं समर्पितः श्रीकृष्णः बाल्यकाले बहुविधबाललीलाः कुर्वन् गोकुलगोपजनानरञ्जयत्। स्वमातुलस्य कंसस्यात्याचारानवलोक्य तद्वधमकरोत्।।

महाराजः उग्रसेनः पुनर्मथुरायाः राजा अभूत्। सन्दीपनिमुनेराश्रमे विद्याध्ययनसमये सुदाम्ना सह सख्यं

सम्पादितवान्, श्रीकृष्णो द्वारिकाधीशः सन् तस्मिन् महदनुरागं प्रकटितवान्, तस्य दुःखानि च निवार्य मित्रतायाः अनुपमम् आदर्शमस्थापयत्। महाभारतयुद्धे अर्जुनस्य सारथिरूपेण श्रीकृष्णस्य निर्णायकभूमिका आसीत्। श्रीकृष्णेन मोहग्रस्तस्य अर्जुनस्य कृते यः प्रबोधात्मक उपदेशः प्रदत्तः सः श्रीमद्भगवद्गीतारूपेण सम्पूर्णविश्वस्य पथप्रदर्शनं करोति। **'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन'** इति सदुपदेशेन संसाराय कर्मोपदेशं कृतवान् श्रीकृष्णः पूर्णावतारत्वेन प्रतिष्ठितो वर्तते। **'कृष्णस्तु भगवान् स्वयम्'** इति कथयत् श्रीमद्भागवतमहापुराणं तु श्रीकृष्णस्य भगवत्तामङ्गीकरोति। श्रीमद्भगवद्गीतायाः श्लोकोऽयं सत्यमेवोद्घोषयति–

**यत्र योगेश्वरः कृष्णः यत्र पार्थो धनुर्धरः।**
**तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम।।**

## अभ्यास-प्रश्नाः

१. निम्नलिखितविषयेषु कमपि एकं विषयमवलम्ब्य निबन्धः लेखनीयः (शब्दसीमा–१००–१२० शब्दाः)

(क) मम प्रियः कविः (ख) संस्कृते विज्ञानम्

(ग) महाराणाप्रतापः

२. निम्नलिखित-विषयमवलम्ब्य एको निबन्धो लेखनीयः – (१००–१२० शब्दाः)

भारतीयसंस्कृतिः

अथवा

अहिंसा परमो धर्मः

अथवा

महाकविः माघः

३. अधोलिखितविषयेषु कमप्येकं विषयमवलम्ब्य निबन्धो लेखनीयः (शब्दसीमा–१००–१२० शब्दाः)

(क) संस्कृतदिवसः

(ख) श्रीकृष्णः

(ग) वर्षप्रतिपदा (नूतनवर्षम्)

४. कमप्येकं विषयमवलम्ब्य निबन्धो लेखनीयः (शब्दसीमा १००–१२० शब्दाः)

(क) स्वस्थवृत्तम्

(ख) श्रीरामः

(ग) महाकविः कालिदासः

# पत्रलेखनम्

पत्रलेखनमपि विशिष्टा कला वर्तते। एतदर्थं वाक्यनिर्माणकौशलेन सहैव भावाभिव्यक्तिवैशिष्ट्यमपि परमावश्यकं भवति। परिशुद्धया भाषया, समुचितसम्बोधनेन, सुस्पष्टविचारैः शिष्टाचारपरिपालनपूर्वकं समुचितपदप्रयोगेण च लिखितं सुव्यवस्थितं पत्रं पाठकस्य हृदयेऽनुकूलं प्रभावं जनयति। उपर्युक्तानुसारं लिखितं पत्रं स्वोद्देश्ये सफलं भवति। सामान्यतया पत्रलेखनसमये निम्नलिखितनियमानां पालनमवश्यं करणीयम् –

१. पत्रप्राप्तिकर्तुः पत्रप्रेषकस्य च पत्रसङ्केतः स्पष्टतया लिखितो भवेत्।
२. पत्रे समुचितं सम्बोधनं भवेत्।
३. पत्रस्य भाषा स्पष्टा सरला च भवेत्।
४. पत्रस्य अनावश्यको विस्तारो न भवेत्।
५. पत्रस्य उद्देश्यं स्पष्टं भवेत्।
६. पत्रलेखने शिष्टाचारस्य पालनं करणीयम्।
७. अप्रियं विपरीतप्रभावजनकं च कथनं पत्रे न लेखनीयम्।

प्रायश:प त्रस्यष ट्अ ङ्गानिभ वन्ति ।त त्रप त्रस्यप्र थममङ्गंप त्रस्यत ह्लेखकस्यच अ ंशिकपरिचयात्मकं, द्वितीयाङ्गं सम्बोधनात्मकं, तृतीयमङ्गम् अभिवादनात्मकं, चतुर्थमङ्गं प्रमुखं पत्रनिमित्तलेखनपरकं, पञ्चममङ्गं समापनात्मकं, षष्ठमङ्गञ्च पत्रप्राप्तकर्त्रा सह पत्रलेखकस्य सम्बन्धवाचकं लेखकपरिचयात्मकञ्च भवति। षष्ठमङ्गं वैयक्तिकपत्रेषु नावश्यकम्।

पत्राणि प्रमुखतया निम्नलिखितप्रकारकाणि भवन्ति –

१. पारिवारिकपत्राणि
२. वैयक्तिकपत्राणि
३. व्यावसायिकपत्राणि
४. शासकीयपत्राणि
५. विविधानि पत्राणि च

अत्र पाठ्यक्रमानुरोधेन कानिचन पत्राणि प्रस्तुतानि सन्ति –

## १. रुग्णताकारणेन अवकाशाय प्रार्थनापत्रम्

सेवायाम्

श्रीमान् प्राचार्यमहोदयः
राजकीय-वरिष्ठोपाध्याय-संस्कृत-विद्यालयः,
महापुरा, जयपुरम्

विषयः – रुग्णताकारणेन अवकाशप्राप्तिः।

**महोदय!**

विषयानुसारं निवेदनमस्ति यदहं ज्वरेण पीडितः अस्मि। चिकित्सकेन औषधसेवनेन सहैव त्रयाणां दिवसानां कृते विश्रामस्य परामर्शः प्रदत्तः अस्ति। अतः अहं दिनाङ्कः २८ नवम्बर,२०१७ तः दि. ३० नवम्बर, २०१७ पर्यन्तं विद्यालयम् आगन्तुं न शक्नोमि। कृपया उपर्युक्त-अवधेः अवकाशं स्वीकृत्य माम् अनुगृह्णातु।

सादरम्।

दिनाङ्कः २८ नवम्बर,२०१७ भवतः आज्ञाकारी शिष्यः

धनञ्जयः

कक्षा– कनिष्ठोपाध्यायः

पितुः/अभिभावकस्य हस्ताक्षराणि........ अनुक्रमाङ्कः – ९

## २. विवाहकारणेन अवकाशाय प्रार्थनापत्रम्

सेवायाम्

श्रीमान् प्रधानाध्यापकमहोदयः

राजकीय-प्रवेशिका-संस्कृत-विद्यालयः,

मोहनपुरा, साँगानेर, जयपुरम्

विषयः – विवाहाय अवकाशार्थं प्रार्थनापत्रम्।

महोदय!

विषयानुसारं निवेदनमस्ति यत् मम भगिन्याः विवाहः दिसम्बर-मासस्य तृतीये दिनाङ्के निश्चितः सञ्जातः अस्ति। विवाहस्य सज्जार्थं सप्ताहकालः अपेक्षितः अस्ति।

अतः अहं दिनाङ्कः २९.११.२०१७ तः दि. ०५.१२.२०१७ पर्यन्तं विद्यालये उपस्थितो भवितुं न शक्नोमि। कृपया उपर्युक्त-अवधेः अवकाशं स्वीकृत्य माम् अनुगृह्णातु।

दिनाङ्कः २९.११.२०१७ भवदाज्ञाकारी शिष्यः

हर्षवर्धनः

कक्षा– प्रवेशिका (X)

अनुक्रमाङ्कः – ३६

## ३. भ्रमणार्थम् अवकाशाय प्रार्थनापत्रम्

सेवायाम्

श्रीमान् प्रधानाध्यापक-महोदयः

राजकीय-उच्चप्राथमिक-संस्कृत-विद्यालयः,

बिहारीपुरा, दौसा

विषयः – भ्रमणार्थम् अवकाशप्राप्तिः।

महोदय!

विषयानुसारं निवेदनमस्ति यत् मम परिवारः अग्रिमसप्ताहे उदयपुर-भ्रमणार्थं गमिष्यति। एषः मम कृते प्रथमः भ्रमणावसरः अस्ति, अतः अहम् उत्साहिता अस्मि। कृपया दि. ०२.०९.१७ तः ०६.०९.२०१७ पर्यन्तम् अवकाशं स्वीकृत्य मां कृतार्थयतु।

दिनाङ्कः – ०२.०९.२०१७

भवत: आज्ञाकारिणी
वन्दना
कक्षा– पञ्चमी(V)
अनुक्रमाङ्कः – १८

## ४. ग्रामस्य विकासाय विधायकाय पत्रम्

सेवायाम्

माननीय: श्रीमान् विधायकमहोदय:
लालसोट-विधानसभा-क्षेत्रम्,
दौसा

विषय: – तलावगाँव-ग्रामस्य समुचित-विकास:।

महोदय!

हर्षस्य विषय: अस्ति यत् भवत: विधानसभाक्षेत्रे विकासकार्याणि तीव्रगत्या चलन्ति। किन्तु अस्माकं 'तलावगाँव'-ग्राम: इदानीमपि विकासात् वञ्चित: अस्ति। ग्रामे राजमार्गा: कर्दमसङ्कुला: सन्ति, प्रणाल्य: अवरुद्धा: सन्ति, नियमित-स्वच्छताया: व्यवस्था नास्ति, स्वच्छजलस्य समुचिता सुविधा नास्ति। सर्वे ग्रामीणा: सन्त्रस्ता: सन्ति। कृपया भवान् व्यक्तिगतरूपेण ध्यानं दत्त्वा ग्रामस्य विकासं कारयतु। ग्रामे एकस्य पशुचिकित्सालयस्य स्थापना अपि अपेक्षिता अस्ति। आशामहे यत् भवान् शीघ्रमेव समुचितं विधाय स्वक्षेत्रविकाससङ्कल्पं सार्थकं करिष्यति।

सादरम्।

दिनाङ्कः – १८.०९.२०१७

भवदीया:
सर्वे ग्रामवासिन:
तलावगाँव, लालसोट – विधानसभाक्षेत्रम्

## ५. नगरस्य विकासाय नगरपालिका-अध्यक्षाय पत्रम्।

सेवायाम्

श्रीमान् नगरपालिकाध्यक्ष-महोदया:
नगरपालिका,चाकसू, जयपुरम्।

विषय: – चाकसू-नगरस्य समुचित-विकास:

महोदय!

विषयानुसारं निवेदनमस्ति यत् चाकसू-नगरस्य तहसील-अनुरूप: विकास: सञ्जायमानो न दृश्यते। स्वच्छताया: समुचिता व्यवस्था नास्ति। शुद्धं पेयजलं समुपलब्धं नास्ति। नगरे एकमपि उद्यानं नास्ति। यूनां कृते क्रीडाङ्गणस्य अभाव: अस्ति। राजकीय-चिकित्सालये बालरोगविशेषज्ञ: चिकित्सक: नास्ति। नगरे मार्गा: सङ्कीर्णा: सन्ति। अतिक्रमणकारणेन आवागमनमपि दुष्करं सञ्जातमस्ति।

राजमार्गा: क्षत-विक्षता: सन्ति। नगरनियोजन-योजना विफला दृश्यते। अत: भवान् विशेषज्ञ-परामर्शानुसारं नगरस्य सुनियोजित-विकासयोजनां निर्माय शीघ्रमेव नगरविकासकार्यस्य प्रारम्भं करोतु इति प्रार्थना अस्ति। आशामहे यत् शीघ्रमेव चाकसू-नगरस्य समुचितो विकास: भविष्यति।

सादरम्।

दिनाङ्कः – ०१.०१.२०१७ भवदीयाः

सर्वे नगरवासिनः

चाकसू–नगरपालिका, जयपुरम्।

## अभ्यास–प्रश्नाः

१. आत्मानं राजकीय–वरिष्ठ–उपाध्याय–संस्कृत–विद्यालयः, उदयपुरस्य वरिष्ठोपाध्याय–कक्षायाः छात्रं वैभवं मत्वा रुग्णताकारणेन दिनत्रयस्य अवकाशार्थं प्रार्थनापत्रं लिखतु।

२. कल्पनां करोतु यत् भवान् राजकीय–प्रवेशिका–संस्कृत–विद्यालयः, मण्डावर, दौसा–संस्थायाः प्रवेशिका–कक्षायाः छात्रः दिनेशः अस्ति। भवतः भगिन्याः विवाहः अस्ति, विवाहनिमित्तं पञ्चानां दिनानाम् अवकाशार्थं प्रधानाध्यापकाय पत्रं लेखनीयम्।

३. भवती राजकीय–उच्च–प्राथमिक–संस्कृत–विद्यालयः, कोटा नगरस्य अष्टम–कक्षायाः छात्रा विद्या अस्ति, इति मत्वा सपरिवारभ्रमणार्थं दिनद्वयस्य अवकाशाय स्वसंस्थायाः प्रधानाध्यापकाय प्रार्थनापत्रं लिखतु।

४. भवान् शेरगढ़–निवासी महावीरः अस्ति, इति चिन्तयतु। भवतः ग्रामस्य समुचित–विकासार्थं ग्राम–पञ्चायत–सरपंच महोदयस्य कृते एकं पत्रं लिखतु।

# पञ्चदशः पाठः

# शब्दरूपाणि धातुरूपाणि च

**'अपदं न प्रयुञ्जीत'** इत्यनुसारं वाक्यप्रयोगात् पूर्वं शब्दानां धातूनां च पदसंस्कारः अपेक्षितः भवति। तत्र – **सुप्तिङन्तं पदम्** – अर्थात् सुबन्तं च तिङन्तं च पदसञ्ज्ञं भवति। अत्र सुप्-इत्यनेन निम्नलिखितानाम् एकविंशतिविभक्तिप्रत्ययानां ग्रहणं भवति –

| | | | | |
|---|---|---|---|---|
| (कर्ता) | सु | औ | जस् | प्रथमा |
| (कर्म) | अम् | औट् | शस् | द्वितीया |
| (करणम्) | टा | भ्याम् | भिस् | तृतीया |
| (सम्प्रदानम्) | ङे | भ्याम् | भ्यस् | चतुर्थी |
| (अपादानम्) | ङसि | भ्याम् | भ्यस् | पञ्चमी |
| (सम्बन्धः) | ङस् | ओस् | आम् | षष्ठी |
| (अधिकरणम्) | ङि | ओस् | सुप् | सप्तमी |

एतेषां सुप्–प्रत्ययानां योजनेन सर्वेषां शब्दानां सप्तसु विभक्तिषु त्रिषु वचनेषु च रूपाणि सिध्यन्ति। यथा–

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | राम+सु = रामः | राम+औ = रामौ | राम+जस् = रामाः |
| द्वितीया | राम+अम् = रामम् | राम+औट् = रामौ | राम+शस् = रामान् |
| तृतीया | राम+टा = रामेण | राम+भ्याम् = रामाभ्याम् | राम+भिस् = रामैः |
| चतुर्थी | राम+ङे = रामाय | राम+भ्याम् = रामाभ्याम् | राम+भ्यस् = रामेभ्यः |
| पञ्चमी | राम+ङसि = रामात् | राम+भ्याम् = रामाभ्याम् | राम+भ्यस् = रामेभ्यः |
| षष्ठी | राम+ङस् = रामस्य | राम+ओस् = रामयोः | राम+आम् = रामाणाम् |
| सप्तमी | राम+ङि = रामे | राम+ओस् = रामयोः | राम+सुप् = रामेषु |

एवमेव तिङ् – इत्यनेन निम्नलिखितानाम् अष्टादशानां प्रत्ययानां परस्मैपदधातुभिरात्मनेपदधातुभिश्च संयोजनेन त्रिषु पुरुषेषु त्रिषु वचनेषु च रूपाणि सिध्यन्ति। यथा–

**परस्मैपदिनः धातवः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | भू+तिप् = भवति | भू+तस् = भवतः | भू+झि = भवन्ति |
| मध्यमपुरुषः | भू+सिप् = भवसि | भू+थस् = भवथः | भू+थ= भवथ |
| उत्तमपुरुषः | भू+मिप् = भवामि | भू+वस् = भवावः | भू+मस् = भवामः |

**आत्मनेपदिनः धातवः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | लभ्+त = लभते | लभ्+आताम् = लभेते | लभ्+झ = लभन्ते |
| मध्यमपुरुषः | लभ्+थास् = लभसे | लभ्+आथाम् = लभेथे | लभ्+ध्वम् = लभध्वे |
| उत्तमपुरुषः | लभ्+इड् = लभे | लभ्+वहि = लभावहे | लभ्+महिङ् = लभामहे |

अनेन प्रकारेण सुबन्तानां तिङन्तानां च पदानां प्रयोगेण वाक्यनिर्माणं भवति। वाक्येनैव भाषाविस्तरो जायते। अत्र केषाञ्चन व्यवहारोपयोगिनां शब्दानां क्रियापदानां च रूपाणि प्रस्तुतानि सन्ति। एतेषां रूपाणि स्मृत्वा संस्कृतसम्भाषणे संस्कृतलेखने च सौकर्यं भविष्यति।

## शब्दरूपाणि

### अकारान्तपुल्लिङ्गः

### बालक-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| द्वितीया | बालकम् | बालकौ | बालकान् |
| तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| पञ्चमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| सप्तमी | बालके | बालकयोः | बालकेषु |
| सम्बोधनम् | हे बालक! | हे बालकौ! | हे बालकाः! |

### आकारान्त-स्त्रीलिङ्गः

### लता-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | लता | लते | लताः |
| द्वितीया | लताम् | लते | लताः |
| तृतीया | लतया | लताभ्याम् | लताभिः |
| चतुर्थी | लतायै | " | लताभ्यः |
| पञ्चमी | लतायाः | " | " |
| षष्ठी | लतायाः | लतयोः | लतानाम् |
| सप्तमी | लतायाम् | " | लतासु |
| सम्बोधनम् | हे लते! | हे लते! | हे लताः! |

### इकारान्तपुल्लिङ्गः

### पति-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पतिः | पती | पतयः |

| | | | |
|---|---|---|---|
| द्वितीया | पतिम् | " | पतीन् |
| तृतीया | पत्या | पतिभ्याम् | पतिभिः |
| चतुर्थी | पत्ये | " | पतिभ्यः |
| पञ्चमी | पत्युः | " | " |
| षष्ठी | पत्युः | पत्योः | पतीनाम् |
| सप्तमी | पत्यौ | " | पतिषु |
| सम्बोधनम् | हे पते ! | हे पती ! | हे पतयः ! |

**इकारान्त-पुल्लिङ्गः**

**सखि-शब्दः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सखा | सखायौ | सखायः |
| द्वितीया | सखायम् | " | सखीन् |
| तृतीया | सख्या | सखिभ्याम् | सखिभिः |
| चतुर्थी | सख्ये | " | सखिभ्यः |
| पञ्चमी | सख्युः | " | " |
| षष्ठी | सख्युः | सख्योः | सखीनाम् |
| सप्तमी | सख्यौ | " | सखिषु |
| सम्बोधनम् | हे सखे ! | हे सखायौ ! | हे सखायः ! |

**उकारान्त-नपुंसकलिङ्गः**

**मधु-शब्दः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | " | " | " |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | " | मधुभ्यः |
| पञ्च मी | मधुनः | " | " |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | " | मधुषु |
| सम्बोधनम् | हे मधु,मधो ! | हे मधुनी ! | हे मधूनि ! |

**ऊकारान्त-स्त्रीलिङ्गः**

**वधू-शब्दः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वधूः | वध्वौ | वध्वः |

| | | | |
|---|---|---|---|
| द्वितीया | वधूम् | " | वधूः |
| तृतीया | वध्वा | वधूभ्याम् | वधूभिः |
| चतुर्थी | वध्वै | " | वधूभ्यः |
| पञ्चमी | वध्वः | " | " |
| षष्ठी | " | वध्वोः | वधूनाम् |
| सप्तमी | वध्वाम् | " | वधूषु |
| सम्बोधनम् | हे वधु! | हे वध्वौ! | हे वध्वः! |

**ऋकारान्त-स्त्रीलिङ्गः**

**मातृ-शब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातरम् | मातरौ | मातॄः |
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी | मात्रे | " | मातृभ्यः |
| पञ्चमी | मातुः | " | " |
| षष्ठी | मातुः | मात्रोः | मातॄणाम् |
| सप्तमी | मातरि | " | मातृषु |
| सम्बोधनम् | हे मातः! | हे मातरौ! | हे मातरः! |

**तकारान्त-नपुंसकलिङ्गः**

**जगत्-शब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | जगत् | जगती | जगन्ति |
| द्वितीया | जगत् | जगती | जगन्ति |
| तृतीया | जगता | जगद्भ्याम् | जगद्भिः |
| चतुर्थी | जगते | जगद्भ्याम् | जगद्भ्यः |
| पञ्चमी | जगतः | जगद्भ्याम् | जगद्भ्यः |
| षष्ठी | जगतः | जगतोः | जगताम् |
| सप्तमी | जगति | जगतोः | जगत्सु |
| सम्बोधनम् | हे जगत्! | हे जगती! | जगन्ति! |

**भवत्-शब्दः (पुं.)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |

| | | | |
|---|---|---|---|
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | " | भवद्भ्यः |
| पञ्चमी | भवतः | " | " |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | " | भवत्सु |

**भवत् ( स्त्रीलिङ्गशब्दः )**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | भवती | भवत्यौ | भवत्यः |
| द्वितीया | भवतीम् | भवत्यौ | भवतीः |
| तृतीया | भवत्या | भवतीभ्याम् | भवतीभिः |
| चतुर्थी | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| पञ्चमी | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| षष्ठी | भवत्याः | भवत्योः | भवतीनाम् |
| सप्तमी | भवत्याम् | भवत्योः | भवतीषु |

**नकारान्त-पुल्लिङ्ग**

**करिन्-शब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | करी | करिणौ | करिणः |
| द्वितीया | करिणम् | करिणौ | करिणः |
| तृतीया | करिणा | करिभ्याम् | करिभिः |
| चतुर्थी | करिणे | करिभ्याम् | करिभ्यः |
| पञ्चमी | करिणः | करिभ्याम् | करिभ्यः |
| षष्ठी | करिणः | करिणोः | करीणाम् |
| सप्तमी | करिणि | करिणोः | करिषु |
| सम्बोधनम् | हे करिन् | हे करिणौ | हे करिणः |

**अस्मद् ( मैं ) सर्वनामशब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् (मा) | आवाम् (नौ) | अस्मान् (नः) |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम् (मे) | आवाभ्याम् (नौ) | अस्मभ्यम् (नः) |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |

| | | | |
|---|---|---|---|
| षष्ठी | मम (मे) | आवयोः (नौ) | अस्माकम् (नः) |
| सप्तमी | मयि | आवयोः | अस्मासु |

**युष्मद् = (तुम) सर्वनामशब्दः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् (त्वा) | युवाम् (वाम्) | युष्मान् (वः) |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम् (ते) | युवाभ्याम् (वाम्) | युष्मभ्यम् (वः) |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव (ते) | युवयोः (वाम्) | युष्माकम् (वः) |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

**तद् = वह (पुं.)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | " | तेभ्यः |
| पंचमी | तस्मात् | " | " |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | " | तेषु |

**तद् = वह (स्त्री.)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | " | ताभ्यः |
| पंचमी | तस्याः | " | " |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

**तद् = वह (नपुं.)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |

| | | | |
|---|---|---|---|
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## धातुरूपाणि

### अस् = वर्तमान रहना ( परस्मैपदी )

| | | | | |
|---|---|---|---|---|
| **लट्** | अस्ति | स्तः | सन्ति | प्र. पु. |
| | असि | स्थः | स्थ | म.पु. |
| | अस्मि | स्वः | स्मः | उ.पु. |
| **लृट्** | भविष्यति | भविष्यतः | भविष्यन्ति | प्र.पु. |
| | भविष्यसि | भविष्यथः | भविष्यथ | म.पु. |
| | भविष्यामि | भविष्यावः | भविष्यामः | उ.पु. |
| **लोट्** | अस्तु | स्ताम् | सन्तु | प्र.पु. |
| | एधि | स्तम् | स्त | म.पु. |
| | असानि | असाव | असाम | उ.पु. |
| **लङ्** | आसीत् | आस्ताम् | आसन् | प्र.पु. |
| | आसीः | आस्तम् | आस्त | म.पु. |
| | आसम् | आस्व | आस्म | उ.पु. |
| **विधिलिङ्** | स्यात् | स्याताम् | स्युः | प्र.पु. |
| | स्याः | स्यातम् | स्यात | म.पु. |
| | स्याम् | स्याव | स्याम | उ.पु. |

### कृ = करना

| | | | | |
|---|---|---|---|---|
| **लट्** | करोति | कुरुतः | कुर्वन्ति | प्र.पु. |
| | करोषि | कुरुथः | कुरुथ | म.पु. |
| | करोमि | कुर्वः | कुर्मः | उ.पु. |
| **लृट्** | करिष्यति | करिष्यतः | करिष्यन्ति | प्र.पु. |
| | करिष्यसि | करिष्यथः | करिष्यथ | म.पु. |
| | करिष्यामि | करिष्यावः | करिष्यामः | उ.पु. |

| | | | | |
|---|---|---|---|---|
| **लोट्** | करोतु | कुरुताम् | कुर्वन्तु | प्र.पु. |
| | कुरु | कुरुतम् | कुरुत | म.पु. |
| | करवाणि | करवाव | करवाम | उ.पु. |
| **लङ्** | अकरोत् | अकुरुताम् | अकुर्वन् | प्र.पु. |
| | अकरोः | अकुरुतम् | अकुरुत | म.पु. |
| | अकरवम् | अकरवाव | अकरवाम | उ.पु. |
| **विधिलिङ्** | कुर्यात् | कुर्याताम् | कुर्युः | प्र.पु. |
| | कुर्याः | कुर्यास्तम् | कुर्यास्त | म.पु. |
| | कुर्याम् | कुर्याव | कुर्याम | उ.पु. |

**चुर् = चोरी करना**

| | | | | |
|---|---|---|---|---|
| **लट्** | चोरयति | चोरयतः | चोरयन्ति | प्र.पु. |
| | चोरयसि | चोरयथः | चोरयथ | म.पु. |
| | चोरयामि | चोरयावः | चोरयामः | उ.पु. |
| **लृट्** | चोरयिष्यति | चोरयिष्यतः | चोरयिष्यन्ति | प्र.पु. |
| | चोरयिष्यसि | चोरयिष्यथः | चोरयिष्यथ | म.पु. |
| | चोरयिष्यामि | चोरयिष्यावः | चोरयिष्यामः | उ.पु. |
| **लोट्** | चोरयतु | चोरयताम् | चोरयन्तु | प्र.पु. |
| | चोरय | चोरयतम् | चोरयत | म.पु. |
| | चोरयाणि | चोरयाव | चोरयाम | उ.पु. |
| **लङ्** | अचोरयत् | अचोरयताम् | अचोरयन् | प्र.पु. |
| | अचोरयः | अचोरयतम् | अचोरयत | म.पु. |
| | अचोरयम् | अचोरयाव | अचोरयाम | उ.पु. |
| **विधिलिङ्** | चोरयेत् | चोरयेताम् | चोरयेयुः | प्र.पु. |
| | चोरयेः | चोरयेतम् | चोरयेत | म.पु. |
| | चोरयेयम् | चोरयेव | चोरयेम | उ.पु. |

**नृत् = नाचना ( परस्मैपदी )**

| | | | | |
|---|---|---|---|---|
| **लट्** | नृत्यति | नृत्यतः | नृत्यन्ति | प्र.पु. |
| | नृत्यसि | नृत्यथः | नृत्यथ | म.पु. |
| | नृत्यामि | नृत्यावः | नृत्यामः | उ.पु. |
| **लृट्** | नर्तिष्यति | नर्तिष्यतः | नर्तिष्यन्ति | प्र.पु. |
| | नर्तिष्यसि | नर्तिष्यथः | नर्तिष्यथ | म.पु. |

| | | | | |
|---|---|---|---|---|
| | नर्तिष्यामि | नर्तिष्याव: | नर्तिष्याम: | उ.पु. |
| **लोट्** | नृत्यतु | नृत्यताम् | नृत्यन्तु | प्र.पु. |
| | नृत्य | नृत्यतम् | नृत्यत | म.पु. |
| | नृत्यानि | नृत्याव | नृत्याम | उ.पु. |
| **लङ्** | अनृत्यत् | अनृत्यताम् | अनृत्यन् | प्र.पु. |
| | अनृत्य: | अनृत्यतम् | अनृत्यत | म.पु. |
| | अनृत्यम् | अनृत्याव | अनृत्याम | उ.पु. |
| **विधिलिङ्** | नृत्येत् | नृत्येताम् | नृत्येयु: | प्र.पु. |
| | नृत्ये: | नृत्येतम् | नृत्येत | म.पु. |
| | नृत्येयम् | नृत्येव | नृत्येम | उ.पु. |

**लभ् = पाना ( आत्मनेपदी )**

| | | | | |
|---|---|---|---|---|
| **लट्** | लभते | लभेते | लभन्ते | प्र.पु. |
| | लभसे | लभेथे | लभध्वे | म.पु. |
| | लभे | लभावहे | लभामहे | उ.पु. |
| **ऌट्** | लप्स्यते | लप्स्येते | लप्स्यन्ते | प्र.पु. |
| | लप्स्यसे | लप्स्येथे | लप्स्यध्वे | म.पु. |
| | लप्स्ये | लप्स्यावहे | लप्स्यामहे | उ.पु. |
| **लोट्** | लभताम् | लभेताम् | लभन्ताम् | प्र.पु. |
| | लभस्व | लभेथाम् | लभध्वम् | म.पु. |
| | लभै | लभावहै | लभामहै | उ.पु. |
| **लङ्** | अलभत | अलभेताम् | अलभन्त | प्र.पु. |
| | अलभ: | अलभेथाम् | अलभध्वम् | म.पु. |
| | अलभे | अलभावहि | अलभामहि | उ.पु. |
| **विधिलिङ्** | लभेत | लभेयाताम् | लभेरन् | प्र.पु. |
| | लभेथा: | लभेयाथाम् | लभेध्वम् | म.पु. |
| | लभेय | लभेवहि | लभेमहि | उ.पु. |

**क्रीड् = खेलना**

| | | | | |
|---|---|---|---|---|
| **लट्** | क्रीडति | क्रीडत: | क्रीडन्ति | प्र.पु. |
| | क्रीडसि | क्रीडथ: | क्रीडथ | म.पु. |
| | क्रीडामि | क्रीडाव: | क्रीडाम: | उ.पु. |
| **ऌट्** | क्रीडिष्यति | क्रीडिष्यत: | क्रीडिष्यन्ति | प्र.पु. |
| | क्रीडिष्यसि | क्रीडिष्यथ: | क्रीडिष्यथ | म.पु. |

| | | | | |
|---|---|---|---|---|
| | क्रीडिष्यामि | क्रीडिष्याव: | क्रीडिष्याम: | उ.पु. |
| **लोट्** | क्रीडतु | क्रीडताम् | क्रीडन्तु | प्र.पु. |
| | क्रीड | क्रीडतम् | क्रीडत | म.पु. |
| | क्रीडानि | क्रीडाव | क्रीडाम | उ.पु. |
| **लङ्** | अक्रीडत् | अक्रीडताम् | अक्रीडन् | प्र.पु. |
| | अक्रीड: | अक्रीडतम् | अक्रीडत | म.पु. |
| | अक्रीडम् | अक्रीडाव | अक्रीडाम | उ.पु. |
| **विधिलिङ्** | क्रीडेत् | क्रीडेताम् | क्रीडेयु: | प्र.पु. |
| | क्रीडे: | क्रीडेतम् | क्रीडेत | म.पु. |
| | क्रीडेयम् | क्रीडेव | क्रीडेम | उ.पु. |

### प्रच्छ् = पूछना

| | | | | |
|---|---|---|---|---|
| **लट्** | पृच्छति | पृच्छत: | पृच्छन्ति | प्र.पु. |
| | पृच्छसि | पृच्छथ: | पृच्छथ | म.पु. |
| | पृच्छामि | पृच्छाव: | पृच्छाम: | उ.पु. |
| **लृट्** | प्रक्ष्यति | प्रक्ष्यत: | प्रक्ष्यन्ति | प्र.पु. |
| | प्रक्ष्यसि | प्रक्ष्यथ: | प्रक्ष्यथ | म.पु. |
| | प्रक्ष्यामि | प्रक्ष्याव: | प्रक्ष्याम: | उ.पु. |
| **लोट्** | पृच्छतु | पृच्छताम् | पृच्छन्तु | प्र.पु. |
| | पृच्छ | पृच्छतम् | पृच्छत | म.पु. |
| | पृच्छानि | पृच्छाव | पृच्छाम | उ.पु. |
| **लङ्** | अपृच्छत् | अपृच्छताम् | अपृच्छन् | प्र.पु. |
| | अपृच्छ: | अपृच्छतम् | अपृच्छत | म.पु. |
| | अपृच्छम् | अपृच्छाव | अपृच्छाम | उ.पु. |
| **वि.धि.** | पृच्छेत् | पृच्छेताम् | पृच्छेयु: | प्र.पु. |
| | पृच्छे: | पृच्छेतम् | पृच्छेत | म.पु. |
| | पृच्छेयम् | पृच्छेव | पृच्छेम | उ.पु. |

### दा = देना

| | | | | |
|---|---|---|---|---|
| **लट्** | ददाति | दत्त: | ददति | प्र.पु. |
| | ददासि | दत्थ: | दत्थ | म.पु. |
| | ददामि | दद्व: | दद्म: | उ.पु. |
| **लृट्** | दास्यति | दास्यत: | दास्यन्ति | प्र.पु. |

| | | | | |
|---|---|---|---|---|
| | दास्यसि | दास्यथः | दास्यथ | म.पु. |
| | दास्यामि | दास्यावः | दास्यामः | उ.पु. |
| **लोट्** | ददातु | दत्ताम् | ददतु | प्र.पु. |
| | देहि | दत्तम् | दत्त | म.पु. |
| | ददानि | ददाव | ददाम | उ.पु. |
| **लङ्** | अददात् | अदत्ताम् | अददुः | प्र.पु. |
| | अददाः | अदत्तम् | अदत्त | म.पु. |
| | अददाम् | अदद्व | अदद्म | उ.पु. |
| **वि.धि.** | दद्यात् | दद्याताम् | दद्युः | प्र.पु. |
| | दद्याः | दद्यातम् | दद्यात | म.पु. |
| | दद्याम् | दद्याव | दद्याम | उ.पु. |

**जि = जीतना**

| | | | | |
|---|---|---|---|---|
| **लट्** | जयति | जयतः | जयन्ति | प्र.पु. |
| | जयसि | जयथः | जयथ | म.पु. |
| | जयामि | जयावः | जयामः | उ.पु. |
| **लृट्** | जेष्यति | जेष्यतः | जेष्यन्ति | प्र.पु. |
| | जेष्यसि | जेष्यथः | जेष्यथ | म.पु. |
| | जेष्यामि | जेष्यावः | जेष्यामः | उ.पु. |
| **लोट्** | जयतु | जयताम् | जयन्तु | प्र.पु. |
| | जय | जयतम् | जयत | म.पु. |
| | जयानि | जयाव | जयाम | उ.पु. |
| **लङ्** | अजयत् | अजयताम् | अजयन् | प्र.पु. |
| | अजयः | अजयतम् | अजयत | म.पु. |
| | अजयम् | अजयाव | अजयाम | उ.पु. |
| **विधिलिङ्** | जयेत् | जयेताम् | जयेयुः | प्र.पु. |
| | जयेः | जयेतम् | जयेत | म.पु. |
| | जयेयम् | जयेव | जयेम | उ.पु. |

**तुद् = दुःख देना**

| | | | | |
|---|---|---|---|---|
| **लट्** | तुदति | तुदतः | तुदन्ति | प्र.पु. |
| | तुदसि | तुदथः | तुदथ | म.पु. |
| | तुदामि | तुदावः | तुदामः | उ.पु. |
| **लृट्** | तोत्स्यति | तोत्स्यतः | तोत्स्यन्ति | प्र.पु. |
| | तोत्स्यसि | तोत्स्यथः | तोत्स्यथ | म.पु. |

| | | | | |
|---|---|---|---|---|
| | तोत्स्यामि | तोत्स्यावः | तोत्स्यामः | उ.पु. |
| **लोट्** | तुदतु | तुदताम् | तुदन्तु | प्र.पु. |
| | तुद | तुदतम् | तुदत | म.पु. |
| | तुदानि | तुदाव | तुदाम | उ.पु. |
| **लङ्** | अतुदत् | अतुदताम् | अतुदन् | प्र.पु. |
| | अतुदः | अतुदतम् | अतुदत | म.पु. |
| | अतुदम् | अतुदाव | अतुदाम | उ.पु. |
| **विधिलिङ्** | तुदेत् | तुदेताम् | तुदेयुः | प्र.पु. |
| | तुदेः | तुदेतम् | तुदेत | म.पु. |
| | तुदेयम् | तुदेव | तुदेम | उ.पु. |

**वद् = कहना ( परस्मैपदी )**

| | | | | |
|---|---|---|---|---|
| **लट्** | वदति | वदतः | वदन्ति | प्र.पु. |
| | वदसि | वदथः | वदथ | म.पु. |
| | वदामि | वदावः | वदामः | उ.पु. |
| **ऌट्** | वदिष्यति | वदिष्यतः | वदिष्यन्ति | प्र.पु. |
| | वदिष्यसि | वदिष्यथः | वदिष्यथ | म.पु. |
| | वदिष्यामि | वदिष्यावः | वदिष्यामः | उ.पु. |
| **लोट्** | वदतु | वदताम् | वदन्तु | प्र.पु. |
| | वद | वदतम् | वदत | म.पु. |
| | वदानि | वदाव | वदाम | उ.पु. |
| **लङ्** | अवदत् | अवदताम् | अवदन् | प्र.पु. |
| | अवदः | अवदतम् | अवदत | म.पु. |
| | अवदम् | अवदाव | अवदाम | उ.पु. |
| **विधिलिङ्** | वदेत् | वदेताम् | वदेयुः | प्र.पु. |
| | वदेः | वदेतम् | वदेत | म.पु. |
| | वदेयम् | वदेव | वदेम | उ.पु. |

## अभ्यास-प्रश्नाः

**( क ) बहुविकल्पात्मकाः प्रश्नाः –**

**अधोलिखितानां प्रश्नानाम् उत्तराणि सङ्केताक्षरमाध्यमेन कोष्ठके लेखनीयानि –**

१. 'बालक' शब्दः अस्ति –

(क) अकारान्त-पुल्लिङ्ग-शब्दः (ख) ककारान्त-पुल्लिङ्ग-शब्दः

(ग) अकारान्त-नपुंसकलिङ्ग-शब्दः (घ) ककारान्त-स्त्रीलिङ्ग-शब्दः ( )

२. लता-शब्दस्य द्वितीया-बहुवचने रूपं भवति-

| | | |
|---|---|---|
| (क) लतान् | (ख) लताः | |
| (ग) लताम् | (घ) लते | ( ) |

३. पति-शब्दस्य षष्ठी-एकवचने रूपं भवति-

| | | |
|---|---|---|
| (क) पतेः | (ख) पत्युः | |
| (ग) पत्योः | (घ) पत्यै | ( ) |

४. सखि-शब्दस्य प्रथमा-विभक्तौ एकवचने रूपं भवति-

| | | |
|---|---|---|
| (क) सखा | (ख) सखः | |
| (ग) सखी | (घ) सखायः | ( ) |

५. भानु-शब्दस्य पञ्च म्यां विभक्तौ बहुवचने रूपं भवति-

| | | |
|---|---|---|
| (क) भानोः | (ख) भानुभ्यः | |
| (ग) भानुभ्याम् | (घ) भानुभिः | ( ) |

६. मधु-शब्दस्य प्रथमायां विभक्तौ बहुवचने रूपं भवति-

| | | |
|---|---|---|
| (क) मधुनी | (ख) मधूनि | |
| (ग) मधुन् | (घ) मधवः | ( ) |

७. वधू-शब्दस्य प्रथमायां विभक्तौ एकवचने रूपं भवति-

| | | |
|---|---|---|
| (क) वधूः | (ख) वधुः | |
| (ग) वधु | (घ) वधू | ( ) |

८. मातृ-शब्दस्य चतुर्थ्यां विभक्तौ बहुवचने रूपं भवति-

| | | |
|---|---|---|
| (क) मातरेभ्यः | (ख) मातृभ्याम् | |
| (ग) मात्रे | (घ) मातृभ्यः | ( ) |

९. जगत्-शब्दस्य षष्ठ्यां विभक्तौ द्विवचने रूपं भवति-

| | | |
|---|---|---|
| (क) जगतोः | (ख) जगद्भ्याम् | |
| (ग) जगती | (घ) जगता | ( ) |

१०. भवत्-शब्दस्य स्त्रीलिङ्गे प्रथमायां विभक्तौ एकवचने रूपं भवति-

| | | |
|---|---|---|
| (क) भवति | (ख) भवन्ति | |
| (ग) भवती | (घ) भवत्यः | ( ) |

११. करिन्-शब्दस्य चतुर्थ्यां विभक्तौ बहुवचने रूपं भवति-

| | | |
|---|---|---|
| (क) करिभ्यः | (ख) करिणः | |
| (ग) करिभिः | (घ) करिणाम् | ( ) |

१२. अस्मद्-शब्दस्य सप्तम्यां विभक्तौ बहुवचने रूपं भवति-

| | | |
|---|---|---|
| (क) मयि | (ख) अस्मासु | |
| (ग) युष्मासु | (घ) अस्मिन् | ( ) |

१३. युष्मद्-शब्दस्य द्वितीयायां विभक्तौ एकवचने रूपं भवति-

| | | |
|---|---|---|
| (क) त्वम् | (ख) युष्मान् | |

(ग) त्वाम् (घ) युवाभ्याम् ( )

१४. तत्–शब्दस्य पुंलिङ्गे तृतीयां विभक्तौ बहुवचने रूपं भवति–

(क) तया (ख) ताभ्यः

(ग) ताभिः (घ) तैः ( )

१५. अस्–धातोः लट्–लकारे प्रथमपुरुषस्य एकवचने रूपं भवति–

(क) अस्ति (ख) स्तः

(ग) सन्ति (घ) असि ( )

१६. कृ–धातोः लोट्–लकारे मध्यमपुरुषस्य द्विवचने रूपं भवति–

(क) कुरु (ख) कुरुतम्

(ग) कुरुत (घ) कुरुताम् ( )

१७. चुर्–धातोः लृट्–लकारे उत्तमपुरुषस्य बहुवचने रूपं भवति–

(क) चोरयिष्यन्ति (ख) चोरयिष्यामः

(ग) चोरिष्यामः (घ) चोरयिष्यावः ( )

१८. नृत्–धातोः लङ्–लकारे प्रथमपुरुषस्य द्विवचने रूपं भवति–

(क) अनृत्यत् (ख) अनृत्यन्

(ग) अनृत्यताम् (घ) अनृत्यम् ( )

१९. निम्नलिखितेषु आत्मनेपदी धातुः अस्ति–

(क) तुद् (ख) लभ

(ग) दा (घ) कृ ( )

२०. लभ–धातोः लट्–लकारे प्रथमपुरुषस्य बहुवचने रूपं भवति–

(क) लभसे (ख) लभन्ते

(ग) लभते (घ) लभामहे ( )

२१. क्रीड्–धातोः विधिलिङ्–लकारे मध्यमपुरुषस्य एकवचने रूपं भवति–

(क) क्रीडेत् (ख) क्रीडेः

(ग) क्रीडेयम् (घ) क्रीडसि ( )

२२. दा–धातोः लट्–लकारे प्रथमपुरुषस्य बहुवचने रूपं भवति–

(क) ददाति (ख) ददन्ति

(ग) ददति (घ) दान्ति ( )

२३. वद्–धातोः लोट्–लकारे उत्तमपुरुषस्य बहुवचने रूपं भवति–

(क) वदानि (ख) वदाम

(ग) वदामिः (घ) वदत ( )

२४. प्रच्छ्–धातोः लृट्–लकारे प्रथमपुरुषस्य बहुवचने रूपं भवति–

(क) प्रक्ष्यति (ख) पृच्छन्ति

(ग) प्रक्ष्यन्ति (घ) प्रच्छिष्यति ( )

२५. दा–धातोः लोट्लकारे प्रथमपुरुषस्य वहुवचने रूपं भवति–

(क) ददातु (ख) ददतु
(ग) ददन्तु (घ) दान्तु ( )

## (ख) अतिलघूत्तरात्मकाः प्रश्नाः –

(१) अस्मद्-शब्दस्य षष्ठ्याः विभक्तेः एकवचनरूपं लिखन्तु।
(२) युष्मद्-शब्दस्य सप्तम्याः विभक्तेः द्विवचनरूपं लिखन्तु।
(३) तत्-शब्दस्य पुंलिङ्गे प्रथमायां विभक्तौ बहुवचनरूपं लिखन्तु।
(४) मातृ-शब्दस्य पञ्चम्यां विभक्तौ बहुवचने किं रूपं भवति?
(५) 'करी' इत्यत्र मूलशब्दः कः अस्ति?
(६) तुद्-धातोः लोट्-लकारे प्रथमपुरुषस्य बहुवचने किं रूपं भवति?
(७) दा-धातोः लृट्-लकारे मध्यमपुरुषस्य बहुवचने किं रूपं भवति?
(८) अस्-धातोः लट्-लकारे उत्तमपुरुषस्य बहुवचने किं रूपं भवति?
(९) कृ-धातो लङ्लकारे प्रथमपुरुषस्य एकवचने किं रूपं भवति?
(१०) लभ्-धातोः विधिलिङ्-लकारे प्रथमपुरुषस्य बहुवचने किं रूपं भवति?

## (ग) लघूत्तरात्मकाः प्रश्नाः –

(१) मधु-शब्दस्य द्वितीयायां विभक्तौ त्रिषु सर्वेषु वचनेषु रूपाणि लेखनीयानि।
(२) वधू-शब्दस्य प्रथमायां विभक्तौ त्रिषु सर्वेषु वचनेषु रूपाणि लिखन्तु।
(२) जगत्-शब्दस्य पञ्चम्यां विभक्तौ त्रिषु वचनेषु रूपाणि लिखन्तु।
(४) करिन्-शब्दस्य चतुर्थ्यां विभक्तौ त्रिषु वचनेषु रूपाणि लिखन्तु।
(५) सखि-शब्दस्य तृतीयायां विभक्तौ त्रिषु वचनेषु रूपाणि लिखन्तु।
(६) कृ-धातोः लङ्-लकारे उत्तमपुरुषस्य त्रिषु वचनेषु रूपाणि लिखन्तु।
(७) दा-धातोः लृट्-लकारे मध्यमपुरुषस्य त्रिषु वचनेषु रूपाणि लिखन्तु।
(८) लभ्-धातोः लोट्-लकारे प्रथमपुरुषस्य त्रिषु वचनेषु रूपाणि लेखनीयानि।
(९) नृत्-धातोः लट्-लकारे मध्यमपुरुषस्य त्रिषु वचनेषु रूपाणि लिखन्तु।
(१०) धाव्-धातोः विधिलिङ्-लकारे त्रिषु वचनेषु रूपाणि लेखनीयानि।

## (घ) निबन्धात्मकाः प्रश्नाः –

(१) बालक-शब्दस्य रूपाणि सर्वासु विभक्तिषु लेखनीयानि।
(२) लता-शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखन्तु।
(३) जगत्-शब्दस्य रूपाणि सर्वासु विभक्तिषु लेखनीयानि।
(४) भवत्-शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखन्तु।
(५) अस्मद्-शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखन्तु।
(६) तत्-शब्दस्य रूपाणि त्रिषु लिङ्गेषु सर्वासु विभक्तिषु लिखन्तु।
(७) जि-धातोः लोट्-लकारस्य रूपाणि लेखनीयानि।

(८) चुर्-धातोः लृट्-लकारस्य रूपाणि लिखन्तु

(९) लभ्-धातोः लङ्-लकारस्य रूपाणि लेखनीयानि।

(१०) पृच्छ्-धातोः विधिलिङ्-लकारस्य रूपाणि लेखनीयानि।

## बहुविकल्पात्मकानां प्रश्नानाम् उत्तरमाला

| | | | |
|---|---|---|---|
| १. क | २. ख | ३. ख | ४. क |
| ५. ख | ६. ख | ७. क | ८. घ |
| ९. क | १०.ग | ११.क | १२.ख |
| १३.ग | १४.घ | १५.क | १६.ख |
| १७.ख | १८.ग | १९.ख | २०.ख |
| २१.ख | २२.ग | २३.ख | २४.ग |
| २५.ख | | | |

× × ×